NOTICES

OF

SANSKRIT MSS.

BY

RÁJENDRALÁLA MITRA, LL. D., C. I. E.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, of the Physical Class of the Imperial Academy of Sciences, Vienna, of the Italian Institute for the Advancement of Knowledge, of the American Oriental Society, and of the Bombay Branch of the Royal Asiatic Society; Corresponding Member of the German Oriental Society, of the Royal Academy of Science, Hungary, and of the Ethnological Society of Berlin; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME IX.

CALCUTTA:

PRINTED BY G. H. ROUSE, AT THE BAPTIST MISSION PRESS.

1888.

15/2/89

NOTICES No. XXII.

OF

SANSKRIT MSS.

BY

RAJENDRALALA MITRA, LL. D., C. I. E.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, of the Physical Class of the Imperial Academy of Sciences, Vienna, of the Italian Institute for the Advancement of Knowledge, of the Italian Oriental Society, and of the Bombay Branch of the Royal Asiatic Society; Corresponding Member of the German and of the American Oriental Societies, of the Royal Academy of Science, Hungary, and of the Ethnological Society of Berlin; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME IX. PART I.

For the Year 1886-87.

CALCUTTA:

PRINTED BY J. W. THOMAS, AT THE BAPTIST MISSION PRESS.

1887.

INDEX TO VOL. IX.

NOTICES

OF

SANSKRIT MSS.

BY

RA'JENDRALA'LA MITRA, LL. D., C. I. E.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, of the Physical Class of the Imperial Academy of Sciences, Vienna, of the Italian Institute for the Advancement of Knowledge, of the Italian Oriental Society, and of the Bombay Branch of the Royal Asiatic Society; Corresponding Member of the German and of the American Oriental Societies, of the Royal Academy of Science, Hungary, and of the Ethnological Society of Berlin; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME IX. PART I.

CALCUTTA:

PRINTED BY J. W. THOMAS, AT THE BAPTIST MISSION PRESS.

1887.

INDEX TO VOL. IX. PART I.

NOTICES OF SANSKRIT MSS.

No. 2890. कल्पलता, (अष्टमव्याख्यानम् ।) Substance, country-made paper, 12 × 4 inches. Folia, 25. Lines, 7 on a page. Extent, 459 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect.

Kalpalatá. The work professes to be an elaborate commentary on the Kalpa S'útra of the Jains, but it greatly exceeds the limit of a mere commentary, and dwells largely on historical illustrations of the text. The codex under notice is the 8th part of the work *(Ashṭamasthána)*, and gives accounts of three Sthaviras, who bore the name of Kálikáchárya. By Samayasundara Upádhyáya; he is elsewhere described to have borne the title of Gaṇi.

The first Kálikáchárya is said to have lived in the year 376 of the era of Mahávíra. He was the 23rd in descent from Saudharma S'vāmí *alias* S'yámáchárya, the author of the Prajnápaná S'útra. The second lived in the 453rd year of that era. He was the brother of Sarasvatí, destroyer of Gardabhilla, and the introducer of the rite of Paryáshaṇá or the rainy weather fast. The third was born in the 993rd year of Mahávíra, which corresponded with the 523rd year of the era of Vikrama. This would make the era of Mahávíra to begin 470 years before Vikramáditya, or on the 527th year before Christ. The bulk of the work is devoted to the wars of the second Kálikáchárya for the overthrow of Gardabhilla.

Beginning. प्रणम्य श्रीगुरुं गद्यपद्यवार्त्ताभिरङ्कृतम् ।
कालिकाचार्य्यसम्बन्धं वच्येऽहं शिष्यहेतवे ॥

तत्र श्रीकालिकाचार्य्योऽपि महाप्रभावकः स्थविरो बभूव । तेन तस्यापि सम्बन्धो व्याख्यायते । इत्यादि ।

End. व्याख्यानं कल्पसूत्रस्य अष्टमं सुगमं स्फुटम् ।
शिष्यार्थं पाठकाश्चक्रुः समयादिमसुन्दराः ॥

Colophon. इति श्रीसमयसुन्दरोपाध्यायविरचितायां कल्पलतायामष्टमं व्याख्यानं सम्पूर्णम्।

विषयः। प्रबन्धोऽयं कल्पसूत्रस्य कालिकाचार्य्योपाख्यानमवलम्ब्य गुम्फितः। तत्र खलु कालिकाचार्य्याभिधानास्त्रय एव स्थविराः समजायन्त। तत्रैकः महावीरनिर्व्वाणात् परं संवत् ३७६ वर्षे श्रीश्यामाचार्य्यापरनामधेयः श्रीप्रज्ञापनासूत्रकर्त्ता पूर्व्वविदां वंशे श्रीसौधर्म्मस्वामिन आरभ्य त्रयोविंशतितमः पुरुषो जातः। द्वितीयस्तु महावीरनिर्व्वाणात् संवत् ४५३ वर्षे सरस्वतीभ्राता गर्द्दभिल्लोच्छेदकः पर्य्युषणापर्व्वप्रवर्त्तक आसीत्। तृतीयः खलु श्रीवीरनिर्व्वाणात् संवत् ९९३ वर्षे श्रीविक्रमसंवत्सराच्च ५२३ वर्षे समजनि। येन हि श्रीमहावीरवाक्यानुसारेण पर्य्युषणापर्व्व भाद्रशुक्लपञ्चम्यामानीतं। तत्र द्वितीयतृतीययोरेकीभूतेव कथा विख्यातिमाययौ। अत एव कालिकाचार्य्यस्य गर्द्दभिल्लोच्छेदकरणवृत्तान्तकथनपूर्व्वकं प्रसङ्गेन कालिककुमारस्य सरस्वत्याश्च विवरणकथनम्।

No. 2891. वैराग्यशतकम्। Substance, country-made paper, 12 × 4 inches. Folia, 10. Lines, 7 on a page. Extent, 148 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Paṇḍit S'yámalála Duve. Appearance, new. Verse. Correct.

Vairágya-śataka. A century of verses in praise of dispassion. By Apyaya Díkshita. This work of course is quite distinct from the works of Bhartṛihari and others, though they all bear the same name. Like the other S'atakas, the work under notice is not a single complete work, written ou a systematic plan; but a mere collection of casual and unconnected stanzas. The author was a great grammarian, but not a poet of any note.

Beginning. आस्ते कश्चन भिक्षुः संघटलव्ययानि दश।
न समेत्यव्ययसुगलं याचामस्तं किमस्त्यन्यत्॥ १॥
धीमच्चिवं धैर्य्यबलं संकल्पविरोधि शान्तिधनम्।
विश्वत्रयविषयमिदं वैराग्यं नाम साम्राज्यम्॥ २॥
राज्ञो बिभेति लोको राजानः पुनरितोऽपि वैरिभ्यः।
आब्रह्मणः कृतान्तादकुतोभयमस्मदाराज्यम्॥ ३॥ इत्यादि।

End. बद्धः कस्तं वक्ष्यति मुक्तो मुक्तिं विजानाति।
यास्यसि यदविमृश्यं ज्ञास्यसि विश्वेश्वरस्य मुखात्॥ १००॥

न गृहीतं श्रुतिहृदयं न च गृहीतं परिस्रवं हृदयम्।
इच्छामि च धाम परं गच्छामि तु विश्वनाथपुरीम्॥ १०१॥

Colophon. इति श्रीमदप्ययदीक्षितविरचितं वैराग्यशतकं सम्पूर्णम्॥

विषयः। संसारस्य नश्वरत्वकथनमुखेन तत्त्वज्ञानोपदेशकीर्त्तनम्।

No. 2892. सुधालहरी। Substance, country-made paper, 11 × 4 inches. Folia, 6. Lines, 6 on a page. Extent, 94 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Paṇḍit S'yámalála Duve. Appearance, new. Verse. Correct.

Sudhálaharí. A hymn in praise of the sun, describing in detail the orb, the rays, the light, and the greatness of Súrya. By Jagannátha. The author was a great poet, remarkable for richness of diction and wealth of rhetorical ornamentations. His hymn to the River Ganges is hold in high esteem.

Beginning. उल्लासः फुल्लपङ्केरुहपटलपतन्मत्तपुष्पान्धयानां
निस्तारः शोकदावानलविकलहृदां कोकसीमन्तिनीनां।
उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः
सङ्घातः कोऽपि धाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत्॥
दर्पं द्राग्द्रावयन्ती विदलदरुणिमोद्रेकरेदीप्यमानः
पद्मद्रोहोन्मुराणां धवलितहरितामैन्दवीनां दुतीनाम्।
दूरादेवान्धकारान्धितधरणितलद्योतने बद्धदीक्षा-
स्ते दैन्यध्वंसदक्षा मुदमुदयदिनेद्रोद्गत्दुन्ना दिशन्तु। इत्यादि।

End. ऊर्द्ध्वं पापावलीभ्यः स्थित इति जगदे यस्य वेदैरुदाख्या
निम्नः कोऽप्यासनार्थं खलु सह चरतां नेत्रयोः पुण्डरीकम्।
श्रीष्टाष्टक् माम यस्य द्रुतकनकनिभश्मश्रुकेशाखिलाङ्गः
सोऽयं सर्व्वान्तरात्मा तव दिशतुतरां वासरेशः शिवानि॥

Colophon. इति पण्डितराजश्रीजगन्नाथविरचिता सुधालहरी समाप्ता।

विषयः। स्तोत्रव्याजेन सूर्य्यस्य रश्मिमण्डलादिवर्णनं तन्माहात्म्यवर्णनञ्च।

No. 2893. मेरुत्रयोदशीव्याख्यानम्। Substance, country-made paper, 11 × 4 inches. Folia, 8. Lines, 8 on a page. Extent, 184 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

Merutrayodaśí-vyákhána. Description of an optional fast called Merutrayodas'í. The proper day for it is the thirteenth of the wane in the month of Mágha. In the course of describing the merits of the fast an account is given of a pious king of the Iksháku race of the name of Anantavírya who reigned in Ayodhyá. By Kshamákalyána.

Beginning. पार्श्वदेवजिनं नत्वा स्मृत्वा सद्गुरुभारतीं।
मेरुत्रयोदशी + + व्याख्यानं लिख्यते मया॥

इहाष्टमहाप्रातीहार्य्यविराजितेन जगद्गुरुणा श्रीवर्द्धमानस्वामिना श्रीगौतमादीनामग्रे यथा माघवदित्रयोदश्या माहात्म्यमुक्तं तथा परम्परायातमस्माभिरप्युच्यते। इत्यादि।

End. भो भव्याः शुद्धभावेन विधिवदेतद्व्रतं कर्त्तव्यं येन इह परत्र सर्व्वसुखसम्पत्तिः प्रादुर्भवेदिति श्रेयः॥

संवद्व्यामरसाष्टेन्दुमिते फाल्गुनमासके।
असितैकादशीतिथ्यां वीकानेराख्यसत्पुरे॥
व्याख्यानं प्राकृतं वीक्ष्य निबद्धं लोकभाषया।
अलेखि संस्कृतीकृत्य क्षमाकल्याणपाठकैः॥
संविग्नवाचनाचार्य्यपदस्थानां सुधीमतां।
श्रीमुक्तामृतधर्म्माणां शिष्यैरामोद + + तः॥

Colophon. इति श्रीमेरुत्रयोदशीव्याख्यानं सम्पूर्णम्।

विषयः। माघकृष्णत्रयोदश्या मेरुत्रयोदशीत्यपरनामिकायाः माहात्म्यकथनमुखेन अयोध्याधिपतेरिक्ष्वाकुकुलप्रदीपस्य राजर्षेरनन्तवीर्य्यस्य वृत्तान्तकीर्त्तनम्॥

No. 2894. होलिकाकथानकम्। Substance, country-made paper, 11 × 4 inches. Folia, 6. Lines, 6 on a page. Extent, 70 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect.

Holikákathánaka. A Jain version of the story of the origin of the Holi festival. (*Cf.* No. 2706, Vol. VIII, p. 159).

Beginning. ऋषभस्वामिनं वन्दे + + + + वृषोऽपि सन्।
सप्तक्षेत्रेषु यश्चक्रे भव्यानां वाञ्छितप्रदः।
देवी श्रीभारती नाम सा जगत्त्रितयेश्वरी।
तस्यै नत्वा कथां वच्मि चातुर्मासिकहोलिकां॥
अत्रैव भरतक्षेत्रे वसन्तपुरपत्तनं। इत्यादि।

End. धर्म्मतो मङ्गलानि स्युर्धर्म्मतः सौख्यसम्पदः।
धर्म्मतो व्याधयो यान्ति यतो धर्म्मस्ततो जयः॥

Colophon. इति होलिकाकथानकं समाप्तम्।

विषयः। होलिकाया उत्पत्त्यादिवृत्तान्तकीर्त्तनं। तत्र द्रव्यभेदात् भावभेदाच्च होलिका द्विविधा। अथ अज्ञानिन एव धूलिक्रीडनावाच्यवाचनादिकं कुर्व्वन्ति ज्ञानिनस्तु तपोरूपवह्निना कर्म्मगणभस्मीकरणरूपां भावहोलिकामनुतिष्ठन्ति। तत्र लौकिकहोलिकाया उत्पत्तिकथनप्रसङ्गेन वसन्तपुराधिपतेः जितशत्रोरुपाख्यानकथनं। देवशर्म्माभिधानस्य विप्रवर्य्यस्य होलीति नाम्ना विख्यातायाः कन्याया विवरणकथनञ्च।

No. 2895. ज्ञानपञ्चमीमाहात्म्यम्। Substance, country-made paper, 12 × 4 inches. Folia, 15. Lines, 6 on a page. Extent, 202 ślokas. Character, Nágara. Date, ? Place of Deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect.

Jnánapanchamí-máhátmya. Merits of a Jain fast called Jnánapanchamí, or Saubhágya-panchamí, which is observed on the 5th of the waxing moon in the month of Kártika. It is founded on a story of Guṇamanjarí and Varadatta and designed to extol transcendental knowledge. By Kanahakuśala.

Beginning. श्रीमत्पार्श्वजिनाधीशं फलवर्द्धिपुरस्थितम्।
प्रणम्य परया भक्त्या सर्व्वाभीष्टार्थसाधकम्॥
शुक्लकार्त्तिकपञ्चम्या माहात्म्यं वर्ण्यते तथा।
भव्यानामुपकाराय यथोक्तं पूर्व्वसूरिभिः॥
भुवने हि परं ज्ञानं ज्ञानं सर्व्वार्थसाधकम्।
अनिष्टवस्तुविस्तारवारकं ज्ञानमीरितम्॥
ज्ञानादासाद्यते लक्ष्मीर्ज्ञानात् स्वर्गोद्भवं सुखम्।
लभन्ते प्राणिनो यस्मात्तज्ज्ञानं स्वर्द्रुमोपमं॥ इत्यादि।

End. एवं विभाव्य भो भव्याः पञ्चम्याराधनोद्यमः ।
भवभीतिविभेदाय कार्य्यो भवद्भिरद्भुतः ॥
श्रीमत्तपागणगगनाङ्गणदिनमणिविजयसेनसूरीणाम् ।
शिष्याणुना कथेयं विनिर्म्मिता कनककुशलेन ॥
बुधपद्मविजयगणिभिः प्रवरैर्भीमादिविजयगणिभिश्च ।
संशोधिता कथेयं भूतपुरसेन्दुमिते वर्षे ॥
गणिविजयसुन्दराणामभ्यर्थनया कृता मयका ।
प्रथमादर्शे लिखिता तैरेव मेड़तानगरे ॥

Colophon. इति श्रीज्ञानपञ्चमीमाहात्म्यं परिपूर्णम् ।

विषयः । सौभाग्यपञ्चमीत्यपराभिधानायाः कार्त्तिकशुक्लपञ्चम्या माहात्म्यकीर्त्तनप्रसङ्गेन गुणमञ्जरीवरदत्तयोराख्यानकथनेनास्याः ज्ञानदातृत्वकथनं ।

No. 2896. आत्मप्रबोधः । Substance, country-made paper, 11 × 4 inches. Folia, 312. Lines, 8 on a page. Extent, 6,220 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Jain Sádhu. Appearance, fresh. Prose and verse. Generally correct.

A'tmaprabodha. An elaborate treatise on the metaphysics and religious duties of Jains. By Jinalábha Súrí.

Beginning. अनन्तविज्ञानविशुद्धरूपं निरस्तमोहादिपरस्वरूपम् ।
नरामरेन्द्रैः कृतचारुभक्तिं नमामि तीर्थेशमनन्तशक्तिम् ॥
अनादिसम्बद्धसमस्तकर्म्ममलीमसत्वं निजकं निरस्य ।
उपात्तशुद्धात्मगुणाय महो नमोऽस्तु देवार्य्यमहेश्वराय ॥
— — — — — — — — ।

अथ तावद्ग्रन्थादौ संक्षिप्तरुचिनापि प्रायः शिष्टसमयसमाचरणाय समाप्तिप्रतिबन्धकीभूतप्रभूतप्रत्यूहव्यूहव्यपोहाय—इत्यादि ।

End. इहादौ भ्रान्त्यादिनेति शेषः ।
यावन्महीमण्डलमध्यदेशे विराजते शैलपतिः सुमेरुः ।
तावन्मुनीन्द्रैरभिवाच्यमानो जीयादसौ ग्रन्थवरात्मबोधः ॥

Colophon. इति श्रीमदात्मप्रबोधग्रन्थः सम्पूर्णः ।

विषयः । प्रथमे प्रकाशे,—भव्य-अभव्य-जातिभव्यभेदेन जीवानां त्रैविध्यकथनं । आत्म-

बोधस्वरूपकथनं। तत्र अतति सातत्येन गच्छति तान् तान् भावानिति आत्मा। स च त्रिविधः वहिरात्मा अन्तरात्मा-परमात्मा चेति। तत्र यो मिथ्यात्वोदयवशतः इष्टानिष्टवस्तुषु रागद्वेषबुद्धिं दधाति स प्रथमगुणस्थानवर्त्ती जीवो वाह्यदृष्टितया वहिरात्मा इत्युच्यते। अथ यः तत्त्वश्रद्धानसमन्वितः सन् कर्म्मबन्धनिबन्धनादिस्वरूपं सम्यग्जानाति तथा आवश्यकादिधर्म्मकृत्येषु विशेषत उद्यमवान् भवति, स चतुर्थादिद्वादशपर्य्यन्तगुणस्थानवर्त्ती जीवोऽन्तर्दृष्टितया अन्तरात्मा इत्युच्यते। अथ पुनर्यः शुद्धात्मस्वभावप्रतिबन्धकान् कर्मशत्रून् निहत्य निरुपमोत्तमकेवलज्ञानादिस्वसम्पदं प्राप्य करतलामलकवत् समस्तवस्तुस्तोमं निःशेषेण जानाति पश्यति च स त्रयोदशगुणस्थानवर्त्ती जीवः सिद्धात्मा च शुद्धस्वरूपत्वेन परमात्मा इत्युच्यते। अथ आत्मबोधमाहात्म्यकीर्त्तनं। सम्यक्त्वोत्पत्तिप्रकारकथनं। तदन्तर्गत एव अभव्यादेर्द्रव्यसाधुत्वादिप्राप्तिविवेक इति निरूपणं। पुञ्जत्रयसंक्रमादिविधिकथनं। एकविधादिपञ्चविधपर्य्यन्तसम्यक्त्वस्वरूपनिरूपणं। सम्यक्त्वपञ्चककालनियमकथनं। कस्मिन् गुणस्थाने कीदृक् सम्यक्त्वमितिनिरूपणं। एकस्यैव जीवस्य भवविशेषे आकर्षभेदादिकथनं। अथ दशविधसम्यक्त्वकथनं। तद्यथा,— निसर्गरुचिः, उपदेशरुचिः, आज्ञारुचिः, सूत्ररुचिः, वीजरुचिः, अभिगमरुचिः, विस्ताररुचिः, क्रियारुचिः, संक्षेपरुचिः, धर्मरुचिरिति। अथ सम्यक्त्वेन आत्मभूमिशुद्धिविधौ प्रभासचित्रकरोपनयकथनं। अथ क्रमेण सम्यक्त्वस्य सप्तषष्टिभेदकथनं। अथ भक्त्यादिदशविधविनयनिरूपणं। तत्र पञ्चविधचैत्यनिरूपणं। अथ गृहपूज्यप्रतिमास्वरूपकथनं। तत्र विविधपूजाविधिकथनं। पूजामाहात्म्यकथनेन धनसारश्रेष्ठिन उपाख्यानकथनं। नित्यानित्यजिनविम्बस्वरूपकथनं। आभरणदानादिना जिनविम्बपूजायां दमयन्त्या उपाख्यानकथनं। दीपदाने देवसेनजनन्या उपाख्यानकथनं। पञ्चविधभक्त्यधिकारे चैत्यद्रव्यभक्षणरक्षणयोः विधानकथनमुखेन सागरश्रेष्ठिन उपाख्यानकथनं। तीर्थयात्रामाहात्म्यकथनप्रसङ्गेन धनश्रेष्ठिनो वृत्तान्तकथनं। अथ शङ्कारागादिरूपपञ्चविधदोषनिरूपणं। कुदृष्टिसंसर्गनिन्दाकीर्त्तनं। अथ प्रभावकाष्टकनिरूपणं। आक्षेपणादिकथाचतुष्टयकथनं। भूषणपञ्चककथनं। लक्षणपञ्चककथनं। तत्र तत्र उपाख्यानकथनञ्च।

द्वितीये प्रकाशे,—देशविरतिप्राप्तिविवेकः। तत्र देशविरतिकालनियमकथनं। एकविंशतिसंख्यकाः श्रावकगुणा इति कथनं। देशविरतियोग्यस्वरूपकथनं। त्रिविधश्रावकस्वरूपकथनं। द्वादशव्रतकथनं। तत्र साधुश्राद्धयोर्भेदविवेकः। सामयिकोचितस्थानस्वरूपकथनं। अथ दानविधिकथनादिकं। दानविषये पञ्च दूषणानि भूषणानि चेति निरूपणं। तीर्थङ्करदानविधिकथनं। अथ समुचितद्वादशव्रताराधने दशश्रावकदृष्टान्तकथनं। एकादशोपासकप्रतिमास्वरूपादिकथनं। निशायां भोजनत्यागमाहात्म्यादिकथनं। श्राद्धनिवासयोग्यस्थानविवेचनम्। श्राद्धस्य अहोरात्रकृत्यनिरूपणं। श्राद्धस्य चतस्रो विश्रामभूमय इति निरूपणं।

तृतीये प्रकाशे,—सर्व्वविरतिप्राप्तिस्वरूपकथनं। तत्कालनियमादिकथनं। तत्प्रतिपत्तौ स्त्रीपुरुषनपुंसकानां योग्यायोग्यत्वस्वरूपकथनं। तत्र बालदीक्षायामतिमुक्तकदृष्टान्तकथनं। दीक्षानर्हादिनिरूपणं। अथ क्षमा-मार्द्दवादिरूपदशविधयतिधर्मकथनं। अथ बाह्याभ्यन्तरभेदेन द्विविधतपःकथनं। अथ आलोचन-परिक्रमणरूपदशविधप्रायश्चित्तस्वरूपकथनं। सप्तविधविनयविवेचनं। अथ वाचनादिभेदेन सप्तविधस्वाध्यायभेदनिरूपणं। तत्र द्वादशाङ्गकथनञ्च। षोड़शवचनविचारः। आर्त्तरौद्रादिभेदेन चतुर्व्विधध्यानस्वरूपनिरूपणं। सप्तदशविधसंयमस्वरूपकथनं। चतुर्व्विधमृषावादस्वरूपकीर्त्तनं। जीवादत्तादिचतुर्व्विधादत्तस्वरूपकथनं। अष्टादशविधमैथुनस्वरूपकथनं। पञ्चेन्द्रियशुभाशुभविषयस्वरूपकथनं। कषायचतुष्टयस्वरूपादिकथनं। वाग्गुप्तिकथनं। संसारभावनादिद्वादशभावनास्वरूपकथनं। शरीरोत्पत्तिभवस्थितिकायस्थित्यादिविचारः। तत्र गर्भोत्पत्तौ स्त्रीपुरुषयोर्योग्यायोग्यत्वस्वरूपादिनिरूपणं। शरीरनिरूपणं। संसारस्थसर्व्वरोगनामकथनं। द्रव्यादिषट्कनिरूपणं। द्वादशसाधुप्रतिमास्वरूपकथनं। साधुगुणवर्णनञ्च।

चतुर्थे प्रकाशे,—भवस्थपरमात्मता सिद्धस्थपरमात्मता चेति द्विविधपरमात्मतानिरूपणं। तत्र तत्प्राप्तिस्वरूपकथनं। तत्कालकथनञ्च। सिद्धशिलास्वरूपादिकथनं। सिद्धपरमात्मस्वरूपादिकथनं। तदन्तर्गतसिद्धिस्थानगमनविवेचनं। सिद्धानां संस्थानमानविवेचनं। तेषां सुखस्वरूपकथनं। तेषामेकत्रिंशद्गुणादिकथनञ्च।

No. 2897. अष्टाह्निकाख्यानम्। Substance, country-made paper, 12 × 4 inches. Folia, 17. Lines, 8 on a page. Extent, 424 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh Bahádur. Appearance, new. Prose. Incorrect.

Ashṭáhikákhyána. On the duties to be observed at the Paryáshaṇá; the propriety of observing the duties illustrated by a number of stories or anecdotes. By Kshemakalyána.

Beginning. शान्तीशं शान्तिकर्त्तारं नत्वा स्मृत्वा च मानसे।
अष्टाह्निकाया व्याख्यानं लिख्यते गद्यबन्धतः॥

इह च सकलदुष्कर्म्मवारिणि विमलधर्म्मकर्म्मकारिणि इह परत्र च कृतप्रभूतशर्म्मणि श्रीपर्य्युषणादिपर्व्वणि समागते सति सकलसुरासुरेन्द्राः सम्भूय श्रीनन्दीश्वरनाम्नि अष्टमद्वीपे धर्म्ममहिमानं कर्त्तुं गच्छन्ति। इत्यादि।

End. इत्थं धर्म्मकर्म्माणि विधाय तत्पर्व्व आराधनीयं।
येन इह परत्र च सर्व्वेष्टसिद्धिः॥

संवद्गोमरसाष्टरा + + मिते मासे शुचौ शोभने
पक्षे प्रोज्ज्वलतायुते सुविहिते सम्यग्द्वितीयातिथौ।
पूज्यश्रीजिनहर्षसूरिगणभृद्राज्ये + दष्टाहिका-
व्याख्यानं सुगमं हितं सुविहितं श्रीजेशलाद्रौ पुरे॥
श्रीमन्तो गुणशालिनः समभवन् प्रीत्या + + सागराः
तच्छिष्यामृतधर्म्मवाचकवरा आसन् स्वधर्म्मादराः।
तच्छिष्यैर्ज्जिनराजराजिचरणाम्भोजप्रसक्तैः क्षमा-
कल्याणाभिधपाठकैः सुमनसां श्रद्धावतां प्रीतये॥
मुनेरुदयरङ्गस्याग्रहाद्व्याख्यानमादरात्।
इदं व्यधायि प्राचीनं पद्यबन्धं विलोक्य तत्॥

Colophon. इति श्रीअष्टाहिकाख्यानं समाप्तम्॥

विषयः। पर्य्युषणापर्व्वान्तर्गताष्टाहिकपर्व्वणि सन्निरुद्धाश्रवकषायैः श्रावकैः पुष्पचन्दन-धूपदीपनैवेद्यादिभिर्जिनेन्द्रप्रतिमाः पूजनीयाः। तत्र आश्रवाः पञ्च प्राणातिपात-मृषावाद-दत्तादान मैथुन-परिग्रहभेदात्। अथ अहिंसासदृशत्वेन अभयदानस्य माहात्म्यकथनप्रसङ्गेन वसन्तपुराधिपतेररिदमननामधेयस्य राज्ञः उपाख्यानादिकथनं। अथ क्रोध-मान-माया-लोभ-भेदेन कषायस्यापि चातुर्व्विध्यकथनं। अथास्मिन् अष्टाहिके पर्व्वणि श्रावकाणां जिनप्रतिमा-पूजादर्शनादिविधिकथनं। तत्प्रसङ्गेन अभयकुमारस्य उपाख्यानकीर्त्तनं। आर्द्रकुमारस्य वृत्तान्तकथनं। अथास्मिन् पर्व्वणि तपोविधिकथनं। तत्र तपोमाहात्म्यकथनमुखेन अयोध्याधिपतेः सूर्य्ययशसो नरपतेरुपाख्यानकथनं। तेन सह ऊर्व्वशीरम्भादीनां संवादकथनादिकञ्च।

No. 2898. अक्षयतृतीयाव्याख्यानम्। Substance, country-made paper, 12 × 4 inches. Folia, 6. Lines, 6 on a page. Extent, 78 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Text, Mágadhí; commentary, Sanskrit.

Akshaya-tṛitíyá-vyákhyána, with a commentary named **Chintámani.** On the origin and merits of the Jain fast called *Akshaya-tṛitíyá*, which is observed on the third of the waxing moon in the month of Vais'ákha. The day is held by the Hindus to be very auspicious for the commencing of new works and commercial enterprises. The text anonymous, commentary by Kshamákalyána.

Beginning. टीकायाः—प्रणिपत्य प्रभुं पार्श्वं श्रीचिन्तामणिसंज्ञकम्।
अक्षयादितृतीयाया व्याख्यानं लिख्यते मया।

मूलस्य — श्रोमभस्सय पारणए इक्खुरसो आसिलोगनाहस्स ।
सेसाणं परमन्नं अमियरससरिसोवमं आसी ॥

इहादौ श्रीऋषभस्वामी सर्व्वार्थसिद्धविमानाच्युत्वा आषाढ़वदि चतुर्थ्यां श्रीमरुदेवीकुक्षावुत्पन्नः नवमासान् चतुर्दिनाधिकान् गर्भे स्थित्वा चैत्रवदि अष्टम्यां अर्द्धरात्रे जन्म संप्राप्तः विंशतिपूर्व्वलक्षवर्षाणि कुमारत्वे स्थित्वा त्रिषष्टिपूर्वलक्षाणि महाराजपदं भुक्त्वा चैत्रवदि अष्टम्यां दीक्षां जग्राह । तदा हस्तिनापुरे श्रीबाहुबलपुत्रस्य सोमयशोनृपस्य पुत्रः श्रेयांस आसीत् इत्यादि ।

End. टीकायाः — भो भव्या रत्नत्रयात्मके मोक्षमार्गे वक्षादरेण यतध्वमिति श्रेयः ।
अक्षयादितृतीयाया व्याख्यानं वीक्ष्य प्राक्तनं ।
अलेखि सुगमं कृत्वा क्षमाकल्याणपाठकैः ॥

Colophon. इत्यक्षयतृतीयाव्याख्यानम् ।

विषयः । प्रथमतीर्थङ्करस्य ऋषभनाथस्य प्रथमपारणे इक्षुरस एव घटपूर्ण आसीत् । एतच्च भगवतो जिनेन्द्रस्य पारणकं श्रेयांसगृहे वैशाखशुक्लतृतीयायामभूत् । अत एव तत्र तद्दानस्य अक्षयसुखजनकत्वेन तद्दिनस्य अक्षयतृतीयेतिसमाख्या बभूवेत्यादिवृत्तान्तकथनम् ।

No. 2899. पौषदशमीकथा । Substance, country-made paper, 12 × 4 inches. Folia, 7. Lines, 6 on a page. Extent, 97 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siṅh, Bahádur. Appearance, new. Verse. Incorrect. Sanskrit.

Paushadaśamí-kathá. A legend illustrative of the sanctity of the 10th of the wane in the month of Pausha. It is a fast day with the Jains, and marks the anniversary of the birth of Párśvanátha. By Jivarája. The legend is said to have been told by Mahávíra to a king of the name of Bhambhására.

Beginning. ध्यात्वा वामेयमर्हन्तममेयमहिमास्पदम् ।
वक्ष्ये कथां पौषमासमत्कृष्णदशमीतिथेः ॥
अत्रैव भरतक्षेत्रे राजद्राजगृही पुरी ।
धनधान्यसमाकीर्णा बभौ स्वर्गपुरी यथा ॥
एकदा विहरन् भूमावुद्याने समवसृतः ।
भगवान् श्रीमहावीरः केवलज्ञानभास्करः । इत्यादि ।

End. माहात्म्यमेतद्विधिना जना ये शृण्वन्ति पौष + + + दशम्याः ।
सदा लभन्तेऽद्भुतसम्पदस्ते सौभाग्यसद्भाग्ययशःप्रतिष्ठाः ॥

Colophon. इति श्रीपौषदशमीकथा सम्पूर्णा ।

विषयः । महावीरेण सार्द्धं भम्भासारनामधेयस्य नरपतेः संवादेन पौषकृष्णदशमीमाहात्म्यकीर्त्तनप्रसङ्गात् वाराणसीपतेरश्वसेनभूपालस्य पुत्रत्वेन तत्तिथौ पार्श्वनाथजिनेन्द्रस्य जन्मादिकथनम् ।

No. 2900. चैत्रपूर्णिमा मनोरमानामव्याख्यासहिता। Substance, country-made paper, 12 × 4 inches. Folia, 8. Lines, 6 on a page. Extent, 108 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Text, Mágadhi ; commentary, Sanskrit.

Chaitra-púrṇimá, with a gloss named **Manoramá.** A Mágadhí legend illustrative of the merits of the day of the full-moon in the month of Chaitra, and the religious duties to be observed on that day. Author's name not given. The gloss in Sanskrit is by Jivarája a disciple of Amarachandra Gaṇi.

टीकायाः —

Beginning. तीर्थराजं नमस्कृत्य श्रीसिद्धाचलसंज्ञितम् ।
चैत्रशुक्लपूर्णिमाया व्याख्यानं क्रियते मया ॥

मूलस्य—

सिद्धा विद्याधरच्की नमिविनमि मुणी पुण्डरीश्रो मुणिंदो
वालीपज्जुसंबो भरह सुकुमुणी सेलगोपंथगोवा ।
रामोकोड़ीयपंचद्रवड़नरवई नारश्रो पंडपुत्ता
एववं श्रन्ने + + + विमलगिरिमहं तित्यमेयं नमामि ॥

श्रहमेतत्तीर्थं नमामि यत्रानेके प्राणिनः सिद्धा बभूवुः । इत्यादि ।

टीकायाः—

End. दुर्गे जेसलमेरौ च कृतावाससुशोभिना ।
गणिनामरचन्द्रेण वाचकेन सुसाधुना ॥
तच्छिष्यजीवराजेन कृता व्याख्या मनोरमा ।
चैत्रशुक्लपूर्णिमायाः कान्तिरत्नसहायतः ॥

Colophon. इति श्रीचैत्रपूर्णिमाव्याख्यानं समाप्तम् ।

विषयः । चैत्रपूर्णिमादिने उपवासं कृत्वा गत्वा च श्रीसिद्धाचलं जिनेन्द्रपूजाध्यानदानादिपरायणाः पुरुषा रामनारदपञ्चपाण्डवादिवत् नरतिर्य्यगादिविच्छेदं प्राप्य पुरुषार्थसिद्धिं सम्यक् प्राप्नुवन्तीतिकथनम् ।

No. 2901. पदार्थचन्द्रिका। Substance, palm-leaf, 12 × 2 inches. Folia, 28. Lines, 5 on a page. Extent, 588 ślokas. Character, Maithili. Date, ? Place of deposit, Sháhpur, Post Darbháñgá, Zilá Darbháñgá, Paṇḍit Mádhava Jhá. Appearance, decayed. Prose. Correct.

Padártha-chandriká. Explanations of the categories of the Nyáya and the Vais'eshika systems. By Misaru Mis'ra.

Beginning. वन्दे श्रीकण्ठवैकुण्ठावकुण्ठौ + + नन्दने।
प्रत्यूहव्यूहशमनौ गिरिजाजलजान्वितौ॥
श्रीचन्द्रसिंहन्टपतेर्द्दयिता लखिमा महादेवी।
रचयति पदार्थचन्द्रं मिसरुमिश्रोपदेशेन॥

अथ द्रव्यगुणकर्म्मसमवायसामान्यविशेषाणां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानान्निःश्रेयसाधिगम इति पारमर्षं सूत्रं। इत्यादि।

End. लिङ्गशरीरस्य अजन्यत्वे अनादिभावत्वेन नित्यत्वापत्तौ मुक्तावपि तत्सत्त्व-प्रसङ्ग इति निष्कर्ष इति सर्व्वमवदातं।

Colophon इति महामहोपाध्यायश्रीमिसरुमिश्रविरचिता पदार्थचन्द्रिका समाप्ता।

विषयः। वैशेषिकन्यायमतयोः समावेशेन निर्म्मितोऽयं ग्रन्थः। तत्र द्रव्यपदार्थनिरूपणं। पृथिव्यादिपदार्थानां साधर्म्यवैधर्म्यनिरूपणं। लक्षणादिविवेचनञ्च। एवं गुणादीनां प्रत्येकं लक्षणादिकथनं। अभावपदार्थनिरूपणं। प्रागभावादीनां प्रत्येकं लक्षणादिनिरूपणं। प्रत्यक्षल-क्षणादिविवेचनं। एवमनुमानादीनां लक्षणादिविवेचनं। अर्थापत्त्यादिनां पृथक्प्रामाण्यखण्डन-पूर्वकं अनुमानादावन्तर्भावकथनं। शब्दप्रमाणनिरूपणमुखेन संक्षेपेण शक्तिवादकथनं। ईश्वर-निरूपणं। मोक्षस्वरूपादिकथनं। एकजीववादखण्डनञ्च।

No. 2902. भक्तिरत्नम्। Substance, country-made paper, 16 × 4 inches. Folia, 84. Lines, 6 on a page. Extent, 1,543 ślokas. Character, Maithili. Date, ? Place of deposit Sháhpur, Post Darbháñgá, Zilá Darbháñgá, Paṇḍit Mádhava Jhá. Appearance, new. Prose and verse. Correct.

Bhaktiratna. On the preëminence of faith in Vishṇu, and the duties of good Vaishṇavas. By Bhánunátha, son of Chandanánanda Upádhyáya, of the clan of Bhowála.

Beginning. नत्वा मुकुन्दस्य पदारविन्दं वृन्दारवृन्दार्थितनन्दकन्दं।
श्रीभाननाथः क्षतचारुयत्नं करोम्यहं सम्प्रति भक्तिरत्नं॥

दुर्ज्जनैरपि चन्तव्यमपराधद्वयं मम ।
सज्जनानां विनोदाय यतो ग्रन्थं करोम्यहं ॥

अथ भक्तिस्वरूपं तावद्विविच्यते, तत्र भगवान् शाण्डिल्यः। सा परानुरक्तिरीश्वरे इत्यादि ।

End. नाधीतं शब्दशास्त्रं नवरसरुचिरं काव्यरत्नादिकं वा
कोषो वालङ्कृतिर्वा स्मृतिरपि सकला भक्तिविद्यापि नैव ।
राधाकृष्णप्रसादादविकलमनसा शास्त्रसारं निरुक्तं
प्रध्वस्तं तत्र यद्यत् + + + + + धिया सज्जनैः चम्यतां तत् ॥

Colophon. इति श्रीश्रीत्रालकुलानन्दचन्दनानन्दोपाध्यायसुतश्रीभानुनाथविरचितं भक्तिरत्नं परिपूर्णं ॥

विषयः। भक्तिस्वरूपविवेचनं। ज्ञानापेक्षया भक्तेः श्रेष्ठत्वनिरूपणं। तत्त्वज्ञानस्य भक्त्यङ्गत्वकथनं। भगवद्भक्तलक्षणादिकथनं। भक्त्यङ्गानि। भगवत्पूजायां सर्ववर्णानामधिकारकथनं। विष्णुपूजाफलं। शालग्राममाहात्म्यं। पूजादिकर्मणि तिलकादीनामावश्यकतानिरूपणं। षोड़शोपचारविधिकथनं। श्रवणकीर्त्तनध्यानादिलक्षणविवेचनं। जपमालाविधिः। अहिंसामाहात्म्यकीर्त्तनं। वैष्णवनियमकथनं। विष्णोरपराधाः। प्रेमभक्तिनिरूपणं। मुक्त्यपेक्षया तस्याः प्राधान्यनिरूपणञ्च।

No. 2903. स्मृतिमञ्जरी। Substance, country-made paper, 16 × 4 inches. Folia, 128. Lines, 6 on a page. Extent, 2,688 ślokas. Character, Maithili. Date, ? Place of deposit, Ṭabká, Post Delsiñsarái, Zilá Darbháñgá, Paṇḍit Chittradhara Miśra, Mímáñsaka. Appearance, old. Prose and verse. Correct.

Smṛiti-manjarí. On fasts, festivals and ritual duties to be observed by Hindu householders. By Ratnadhara Mis'ra.

Beginning. नत्वा सीतापतिं रामं भवाब्धितरणे तरिं।
रत्नधरेण धीरेण क्रियते स्मृतिमञ्जरी ॥

मनुः। वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदां। आचारश्चैव साधूनामात्मनस्तुष्टिरेव च। इत्यादि ।

End. अपि तु तत्कार्य्यानुष्ठाने श्रेष्ठतरवर्णस्यैव अधिकार इति शम्।

Colophon. इति महोपाध्यायश्रीरत्नधरमिश्रविरचिता स्मृतिमञ्जरी समाप्ता ।

विषयः। स्मृत्यादिप्रामाण्यकथनं। कालनिरूपणं। मासादिनिर्णयः। अधिमासादिनिरूपणं। सौरादिमासलक्षणं। संक्रान्तिनिरूपणं। मन्दामन्दाकिन्यादिसप्तविधसंक्रान्तिस्वरूपक-

थनं। ग्रहणनिरूपणादिकं। प्रतिपदादितिथिषु विहितानां कर्मणां व्यवस्थादिकथनं। एकादशीव्रतविधानं। वैशाखकृत्यनिरूपणं। तत्र गङ्गास्नानविधिकथनं। युगाद्याश्राद्धविधानं। ज्यैष्ठकृत्यनिरूपणं। सावित्रीव्रतव्यवस्थाकीर्त्तनं। आरण्यषष्ठीविधानं। दशहराकृत्यनिरूपणं। स्नानयात्राविधिकथनं। आषाढ़कृत्यनिरूपणं। हरिशयनविधिः। चातुर्मास्यविधिः। श्रावणकृत्यनिरूपणं। अशून्यशयनव्रतविधानं। नागपञ्चमीविधिः। भाद्रकृत्यनिरूपणं। जन्माष्टमीविधानं। हरितालिकाविधिकथनं। अघोरचतुर्दशीविधिः। दूर्व्वाष्टमीव्रतं। तालनवमीव्रतं। अनन्तव्रतं। आश्विनकृत्यनिरूपणं। अपरपक्षविधिः। गजच्छायादिनिरूपणं। दुर्गोत्सवादिविधिः। खञ्जनदर्शनविधिः। व्रीहिपाकश्राद्धविधिः। कोजागरकृत्यं। कार्त्तिककृत्यनिरूपणं। सुखरात्रिविधिः। द्यूतप्रतिपद्विधिः। भ्रातृद्वितीया। उत्थानविधिः। मार्गशीर्षकृत्यनिरूपणं। नवान्नश्राद्धविधानं। पौषकृत्यनिरूपणं। अष्टकाश्राद्धादिविधानं। माघकृत्यनिरूपणं। प्रातःस्नानविधिः। पञ्चम्यां श्रीपूजनविधिः। माघसप्तमीविधिः। भीष्माष्टमीविधिः। शिवरात्रिकृत्यनिरूपणं। फाल्गुनकृत्यनिरूपणं। दोलयात्राविधिः। चैत्रकृत्यनिरूपणं। वारुण्यादिविधिकथनं। अशोककलिकापानविधिः। अनङ्गार्च्चनविधिः। सामान्यतस्तिथिकृत्यनिरूपणं। शूद्रकृत्यनिरूपणञ्च।

No. 2904. पुरश्चर्य्यारसाम्बुधिः। Substance, country-made paper, 15 × 3½ inches. Folia, 68. Lines, 7 on a page. Extent, 879 ślokas. Character, Maithili. Date, ? Place of deposit, Sháhpur, Post Darbhañgá, Zilá Darbháñgá, Paṇḍit Mádhava Jhá. Appearance, new. Prose and verse. Correct.

Puraścharyá-rasámbudhi. Rituals for S'ákta worship for the purification of the worshipper's body. Compiled from various Tantras. By S'ailajá Mantri.

Beginning. शिवोपरि समासीनां त्रिनेत्रां चन्द्रशेखरां।
महामेघप्रभां तन्वीं घोररूपां भयापहां॥
चतुर्भुजां विवसनां वक्षोजयुगलान्वितां।
खड्गमुण्डधरां वामे सव्येऽभयवरप्रदां॥
पञ्चदशाक्षरमध्यस्थां मारयुद्धपरां शिवां।
दक्षिणां कालिकामाद्यां रक्तचर्च्चितविग्रहां॥
मुण्डमालावलीकीर्णां करकाञ्चीविभूषितां।
स्मरामि सर्व्वसिद्ध्यर्थं भवपाशनिकृन्तिनीं॥
तन्त्रमारोद्धृतयोगिनीहृदये, गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः। इत्यादि।

End. अथमाः सिद्धयः प्रोक्ता मन्त्रिप्रथमभूमिकाः ।
सिद्धमन्त्रस्तु यः साक्षात् स शिवो नात्र संशयः ॥

Colophon. इति श्रीमन्त्रशास्त्रप्रवीणश्रीशैलजामन्त्रिणा विरचितः पुरश्चर्यारसाम्बुधिः समाप्तः ।

विषयः । पुरश्चरणविधिः । इन्द्रादीनामावाहनविधिः । क्षेत्रपालादिबलिदानविधिः । पापनिवृत्त्यर्थं सावित्रीजपविधिः । सामान्यपूजा । सङ्कल्पजपादिक्रमकथनं । कुल्लुकासेतुप्रभृतिनिरूपणं । जिह्वाशोधनादिविधिः । श्यामा-तारा-त्रिपुरसुन्दरी-भुवनेश्वरी-भैरवी-छिन्नमस्ता-धूमावती-बगला-मातङ्गीप्रभृतीनां जपसंख्यादिनिरूपणं । होम-तर्पण-ब्राह्मणभोजनादिविधिः । मन्त्राणां स्वप्नजागरादिनिरूपणं । बलिदानविधिः । वैधहिंसाविवेचनं । जातिभेदेन बलीनां वर्णविशेषकथनं । बलिदानकालादिनिरूपणं । खड्गप्रमाणतद्ध्यानादिकथनं । छेदनक्रमादिकथनं । शीर्षदानादिक्रमकथनं । क्षत्रियादीनां स्वगात्ररुधिरबलिदानविधिः । रहस्यपुरश्चरणविधिः । तारिणीस्तोत्रं । चौरमन्त्रादिकथनं । कामिनीतत्त्वं । मन्त्रसिद्धिलक्षणतदुपायादिकथनञ्च ।

No. 2905. कालकौमुदी । Substance, country-made paper, 16 × 4⅓ inches. Folia, 72. Lines, 12—13 on a page. Extent, 2,792 ślokas. Character, Maithili. Date, ? Place of deposit, Harinagara, Post Madhuvaní, Zilá Darbháṅgá, Paṇḍit Halí Jhá. Appearance, new. Prose and verse. Generally correct.

Kála-kaumudí. Appropriate times for religious observances and rituals for various fasts. By Nilámbara A'chárya. This is distinct from No. 2501, (Vol. VII, p. 254).

Beginning. हस्तावलम्बनीकृत्य यः कालं संप्रवर्त्तते ।
जगन्निर्माणसंहारस्थितिष्वीशमुपास्महे ॥
कर्मणोऽपूर्वनिष्पत्तौ विशिष्यन्नधिकारिणः ।
यः कालो गण्यतामेति तस्मै कालात्मने नमः ॥

— — — — — — — अथ कालस्तावत् परमार्थेन एकोऽप्युपाधिभेदाद्भिद्यते । स चोपाधिभेदभिन्नश्च कर्माङ्गमतस्तादृशस्यैव निरूपणं युज्यते । इत्यादि ।

End. विण्मूत्रभोजनस्नानैः प्रयाति नरकं नरः ।
अशेषपर्व्वस्वेतेषु तस्मात् संयमिभिर्नरैः ॥
— — — — — — — — — — ।

Colophon. इति श्रीनीलाम्बराचार्य्यविनिर्मिता कालकौमुदी परिपूर्णा ।

विषयः । कालस्वरूपविवेचनं । तिथ्यादिलक्षणं । युग्मादितिथिप्रवृत्तिनिमित्तनिरूपणं । व्यस्तनिन्दनादिकथनं । मासपदशक्यतावच्छेदकनिरूपणं । कर्मविशेषे सौरादिमासविशेषनियमनं । अधिमासोत्पत्तिबीजकथनं । नित्यव्रतविधिकथनादिकं । प्रतिपदादिषु प्राशनविधिकथनं । प्रतिपत्तिथिकृत्यनिरूपणं । एवं द्वितीयादितिथिकृत्यनिरूपणं । तत्र विशेषेण एकादशीविधिप्रपञ्चनं । हरिशयनादिविधिप्रपञ्चनं । चातुर्मास्यव्रतविधानञ्च । नक्तव्रतादिविधिनिरूपणं । सूर्य्यादिप्रतिमाप्रतिष्ठादिविधिनिरूपणं । श्रवणाद्वादशीकथनं । अनन्तव्रतकथनं । शिवचतुर्दशीव्रतविधानं । प्रेतचतुर्दशीविधिकथनं । विशेषेण शिवरात्रिविधिकथनं । महाज्यैष्ठ्यादिनिरूपणं । उत्सर्गापाकर्मविधिनिरूपणं । तत्र ऋषिवंशादिनिरूपणञ्च । अपरपक्षनिरूपणं । तत्र श्राद्धादिविधिकथनञ्च । अगस्त्यार्घदानविधिः । कोजागरकृत्यनिरूपणं । सुखरात्रिविधिकथनं । नवान्नविधिनिरूपणं । अष्टकाश्राद्धनिरूपणं । अमावास्यानिरूपणं । तत्र अन्वाहार्य्यादिविधिकथनञ्च । चन्द्रादिग्रहणकृत्यनिरूपणं । संक्रान्तिनिरूपणादिकं । ग्रहशान्तिविधिकथनं । तिथिविशेषे निषिद्धानि च ।

No. 2906. तत्त्वचन्द्रिका । Substance, country-made paper, 13 × 4 inches. Folia, 88. Lines, 9 on a page. Extent, 2,349 ślokas. Character, Nágara. Date, Sk. 1678. Place of deposit, Sháhpur, Post Darbháṅgá, Zilá Darbháṅgá, Paṇḍit Mádhava Jhá. Appearance, fresh. Prose. Correct.

Tattva-chandriká. A manual of Vedánta doctrine. By Ráma A's'rama, pupil of Nṛisiṁha A's'rama. This is distinct from No. 2314, (Vol. VII, p. 86).

Beginning. प्रणम्य परमात्मानं सच्चिदानन्दविग्रहं ।
मुमुक्षूणां हितायैषा क्रियते तत्त्वचन्द्रिका ।

अथ खल्वात्मा वा अरे श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चेतिश्रुत्या आत्मनः श्रवणमननादिकं विधीयते । तत्र तावदात्मनि बहवो विप्रतिपन्ना उपलभ्यन्ते,—इत्यादि ।

End. न स पुनरावर्त्तते इति श्रुतेरिति दिक् ।

Colophon. इति परमहंसपरिव्राजकाचार्य्यभगवन्नृसिंहाश्रमपूज्यपादशिष्यश्रीरामाश्रमविरचिता तत्त्वचन्द्रिका सम्पूर्णा । शकाब्दाः १६७८ ।

विषयः । आत्मनिरूपणं । अत्र चार्वाकमतखण्डनं । बौद्धजैनादिमतखण्डनञ्च । जीवपरात्मनोरभेदनिरूपणं अनेकजीववादखण्डनपुरःसरमेकजीववादव्यवस्थापनं । जीवस्य ब्रह्मप्रतिबिम्बत्वकथनं । मायानिरूपणं । अविद्यानिरूपणं । मायाया आवरणविक्षेपभेदेन द्विविध-

शक्तिनिरूपणं। अध्यारोपापवादस्वरूपनिरूपणं। जगतः स्वप्नोपमत्वकथनं। विवर्त्तवादनिरूपणं। अत्र नैयायिककापिलादिमतखण्डनं। तुरीयहिरण्यगर्भादिचतुर्व्यूहनिरूपणं। तत्त्वमस्यादि-महावाक्यार्थनिरूपणं। निर्गुणत्ववादव्यवस्थापनपूर्वकं तार्किकादिमतखण्डनं। प्रमाणप्रमेयभावस्य व्यवहारिकत्वकथनं। अद्वैतवाद एव वेदान्ततात्पर्य्यमितिनिरूपणं। जीवस्य उत्क्रान्त्यादि-चिन्तनं। प्रतीकोपासनादिनिरूपणं। शाण्डिल्यविद्याकथनं। तत्त्वज्ञाननिरूपणं। मोक्षस्वरूप-निरूपणमुखेन विविधमतखण्डनञ्च।

No. 2907. त्रिपुरोपनिषद्भाष्यं। Substance, country-made paper, 16 × 5 inches. Folia, 16. Lines, 9 on a page. Extent, 531 ślokas. Character, Nágara. Date, ? Place of deposit, Harinagara, Post Madhuváṇí, Zilá Darbhángá, Paṇḍit Halí Jhá. Appearance, new. Prose. Generally correct.

Tripuropanishad-bháshya. A commentary on the Tripuropanishad. By Bháskara Ráya. The text of the Upanishad has been noticed under No. 2197, (Vol. VI, p. 259). The codex under notice includes the text.

ॐ शान्तिः।

Beginning. भाष्यस्य,—सहस्रदलपद्मे स्वे नाथाङ्घ्र्यब्जद्वये सति।
कमले कमलोत्पत्तिर्न दृष्टेत्युक्तयः कथं॥
श्रीसाङ्ख्यायनकल्पसूत्रविधिभिः कर्माणि ये कुर्वते
येषां शाकल एव मन्त्रनिचयः कौषीतकब्राह्मणं।
तैरारण्यकमध्यतन्त्रविततिर्या पठ्यते बह्वृचैः
ऋग्भिः षोडशभिर्महोपनिषदं व्याचक्ष्महे तां वयं॥

इह खलु त्रैवर्णिकैरध्येतव्यो वेदः। इत्यादि।

मूलस्य,—त्रिस्रः पुरस्त्रिपथा विश्वचर्षणी।
यत्राकथाक्षरा संनिविष्टा। इत्यादि।

End. मूलस्य,—इयं महोपनिषत् त्रिपुराया इदमक्षरं परमे गोभिरीड़े। एषा ऋग्यजुः-परमेतच्च सामैवायमथर्वेयमन्या विद्या ॐ। इत्युपनिषत्समाप्ता।

भाष्यस्य,—तस्य ब्रह्मैकरूपत्वात् तत्र वाचामप्रवृत्तेरित्याशयेन श्रुत्या मौनमास्थितं। इत्युपनिषत्समाप्तेत्यर्थः। इतोऽधिकस्य रहस्यस्य वक्तव्यांशस्याभावादिति भावः॥ १६॥

Colophon. इति भास्कररायेणाग्निचिता त्रिपुरामहोपनिषदोऽर्थाः ।
प्रकटयितुमयोग्या अपि विदुषां तोषाय कतिपये कथिताः ॥
इति त्रिपुरोपनिषद्भाष्यं सम्पूर्णं ।

विषयः । त्रिपुराया ब्रह्मरूपत्वकथनपूर्वकं तन्माहात्म्यकथनं ।

No. 2908. वैष्णवकुतूहलम् । Substance, country-made paper, 13 × 4 inches. Folia, 44. Lines, 8 on a page. Extent, 979 ślokas. Character, Nágara. Date, Sk. 1703. Place of deposit, Ájimganj, Paṇḍit S'yámalála Duve. Appearance, decayed. Prose and verse. Incorrect.

Vaishṇava-kutúhala. Salvation according to the Bhakti system and its pre-eminence. Anonymous.

Beginning. वृन्दारकेन्द्रसंवन्द्यं फुल्लेन्दीवरसुन्दरं ।
वन्देऽहं जगदानन्दकन्दलं नन्दनन्दनम् ॥

इह खलु दुःखदुर्द्दिनभरोपद्रुतानां विद्रुतानामपि द्रविण + + + तरङ्गदर्शनात् भगवत्पादपद्मद्वयीकाणां + + कथमपि संलब्धजीविकानां—इत्यादि ।

End. अत एव भगवच्चरणारविन्दध्यानादेव सर्व्वं + + ++ + सिद्ध्यतीति ।

Colophon. इति श्रीवैष्णवकुतूहलं सम्पूर्णं । शकाब्दाः १७०३ ।

विषयः । संसारस्य दुःखमयत्वकथनमुखेन वैराग्यनिरूपणं । भगवान् नन्दनन्दन एव मुमुक्षुभिर्ध्येय इतिनिरूपणं । भगवच्छब्दार्थनिरूपणं । ब्रह्मपदार्थकथनं । भगवानेव ब्रह्मशब्दवाच्य इतिनिरूपणं । ब्रह्मणो निर्व्विशेषत्ववादनिरसनमुखेन सगुणत्वादिनिरूपणं । जीवानां ब्रह्मांशत्वमणुत्वमितिनिरूपणं । शाङ्कर-तार्किक-सांख्यादिमतनिरूपणं । भगवतः सच्चिदानन्दरूपत्वकथनं । ज्ञानाद्भगवद्भक्तेरुत्कर्षकथनं । भक्तिरूपतामापन्नं ज्ञानमेव भगवत्प्राप्तिनिदानमितिनिरूपणं । सालोक्यादिमुक्तिपञ्चकस्वरूपकथनं । उपासनादिकर्त्तव्यतानिरूपणं । तत्र ध्यानस्यैव श्रेष्ठत्वप्रतिपादनञ्च ।

No. 2909. विचारषट्त्रिंशिका, अवचूर्णिटीकासहिता । Substance, country-made paper, 12 × 4 inches. Folia, 22. Lines, 13 on a page. Extent, 549 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Text, Mágadhi verse; commentary, Sanskrit prose. Incorrect.

Vichára-shaṭtriñśiká. With a Sanskrit commentary called Avachúrṇi, on the classification of created objects and the redemption of living beings, from a Jain point of view. By S'rítírtha, copied by, Gajasára Gaṇi, pupil of Dhavalachandra Mahopádhyáya.

Beginning. मूलस्य—भुवणपईवं वीरं नमिउण भणामि अवहं वोहत्थं ।
जीवसरूपं किं चिविजह भणिग्रं पूर्व्वसूरीहिं ॥

टीकायाः—अहं किञ्चिदपि जीवस्वरूपं भणामि कथयामीत्यन्वयविशेषः। कथं भणामि यथा पूर्व्वसूरिभिः सुधर्म्मस्वाम्यादिभिः भणितं कथितं। इत्यादि ।

End. मूलस्य—सिरिजिणहंसमुणिसर रज्जे सिरिधवलचन्दसीसेण ।
गजसारेणं लिहिया एसा विन्नत्ति अप्पहिश्रा ॥

टीकायाः—श्रीजिनहंससूरिनामानो ये जिनसमुद्रसूरिपट्टप्रतिष्ठिता मुनीश्वराः खरतर-गच्छाधिपतयः तेषां राज्यमिव राज्यं गच्छाधिपत्यलक्षणं। तस्मिन् विजयिनि सैद्धान्तिक-शिरोमणीनां श्रीधवलचन्द्रमहोपाध्यायपुङ्गवानां शिष्येण संविग्नपण्डिताभयोदयगणिलालित-पालितेन गजसारगणिनाम्ना साधुना एषा विचारषट्त्रिंशिकारूपा श्रीतीर्थकृता विज्ञप्ति-र्लिखितेतिपदेनौद्धत्यं परिहृतं — — — इति सूक्तं स्थापितम्।

Colophon. इति विचारषट्त्रिंशिकावचूर्णिः ।

विषयः। संसारिमुक्तभेदेन जीवानां द्वैविध्यकथनं। संसारिणोऽपि त्रसस्थावरभेदेन द्वि-विधा इति निरूपणं। अथ स्थावरा अपि पृथिवी-जल-ज्वलन-वायु-वनस्पतिरूपाः पञ्चविधा इति कथनं। एवं क्रमेण तत्तदवान्तरभेदकथनपूर्व्वकं सूच्यग्रभेदस्थाने अनन्ता जीवास्तिष्ठन्तीति-कथनं। अथ एकेन्द्रियाः, द्वीन्द्रियाः, त्रीन्द्रियाः, चतुरिन्द्रियाः, पञ्चेन्द्रिया इति पञ्चविधजीव-भेदादिकथनं। तत्र तेषां जलचरस्थलचरत्वादिभेदनिरूपणं। अथ जीवानां शरीरायुःस्थि-त्यादिनिरूपणं। अथ मनुष्याणां वैराग्यावलम्बनमेव श्रेयःसाधनमितिनिरूपणं। सम्यग्ज्ञान-दर्शनचारित्रमाहात्म्यकीर्त्तनं। अथ जीवानां गत्यागत्यादिनिरूपणं। जीवाल्पबहुत्वादिनि-रूपणं। जिनप्रतिविम्बपुरस्तात् प्रार्थनाविधिनिरूपणञ्च।

No. 2910. सूक्तिमुक्तावली। Substance, country-made paper, 12 × 4 inches. Folia, 80 Lines, 16 on a page. Extent, 3,120 ślokas. Character, Nágara. Date, Sᴍ. 1894. Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Generally correct.

Súkti-muktávali. A collection of Jain moral maxims. Anonymous.

Beginning. वीरं विश्वगुरुं नत्वा ज्ञात्वा यत्नेन सङ्ग्रहं ।
सदोपकारी सूक्तालो स्वान्यपाठाय लिख्यते ॥
पूज्यपूजा दया दानं तीर्थयात्रा जपस्तपः ।
श्रुतं परोपकारश्च मर्त्यजन्मफलाष्टकं ॥
शिष्टे सङ्गः श्रुतौ रङ्गः सद्ध्याने धीर्द्धृतौ मतिः ।
दाने शक्तिर्गुरौ भक्तिः षड़ेते सुकृताकराः ॥
देवपूजा गुरूपास्तिः स्वाध्यायः संयमस्तपः ।
दानञ्चेति गृहस्थानां षट् कर्म्माणि दिने दिने ।
जिनपूजनं विवेकः सत्यं शौचं सुपात्रदानञ्च ।
महिमक्रीड़ागारः शृङ्गारः श्रावकत्वस्य ॥ इत्यादि ।

End. शुनः कुक्कुटमार्ज्जारान् ये पोषन्ति दिने दिने ।
तेषां पापेन लिप्येऽहं यद्यहन्या + + + + ॥
वेदाः प्रमाणं स्मृतयः प्रमाणं धर्म्मार्थयुक्तं वचनं प्रमाणम् ।
नैतत् त्रयं यस्य भवेत् प्रमाणं कस्तस्य कुर्य्याद्वचनं प्रमाणम् ॥

Colophon. इति श्रीविविधोक्तसूक्तिमुक्तावली सम्पूर्णा । संवत १८९४ ।

विषयः । विविधविषयकश्लोकसङ्ग्रहः ।

No. 2911. सुबोधिनी । Substance, country-made paper, 12 × 3½ inches. Folia, 152. Lines, 13 on a page. Extent, 4,907 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Generally correct.

Subodhiní. A commentary on Rámachandra A'śramas Siddhánta-chandriká—a treatise on grammar. By Sadánanda Gaṇi.

Beginning. पुराणपुरुषं ध्यात्वा नत्वा चार्हतनायकं ।
सिद्धान्तचन्द्रिकावृत्तिं वक्ष्येरीमितरामहं ॥
विद्यारत्नपयोनिधौ खरतराम्नाये जगत्पूज्यके
श्रीभट्टारकसम्पदो गुणगणैः सत्यां धर + + + ।
पूज्यः श्रीजिनभक्तिसूरिरधिपो वर्वर्त्ति विद्यानिधिः
सोऽयं शीतकरायते च यशसा सूरायते तेजसा ॥

श्रीकीर्त्तिरत्नसूर्य्याह्वो यतीन्द्रोऽभूत्तरां नमः ।
श्रीमत्सुमतिरङ्गाख्यः पाठकप्रवरस्ततः ॥
श्रीपाठकाः श्रीशुभलाभसंज्ञका जगत्प्रभावा विलसत्प्रतिज्ञाः ।
तच्छिष्यवर्य्याः क्षतिराजिधूर्य्याः श्रीपाठकाः पाठकवारणेन्द्राः ॥
— — — — — — ।
तेषां हितेषां (हितैषी) विनयप्रधानोऽनवद्यविद्याभ्यसनैकतानः ।
प्राज्ञः सदानन्दगणिः सुशिष्यः सुबोधिनीं संविदधाति वृत्तिं ॥
तत्र ग्रन्थादौ ग्रन्थमध्ये ग्रन्थान्ते च मङ्गलमाचरणीयमिति शिष्टाचारः । इत्यादि ।

End. इति तद्धितप्रक्रिया ।
श्रीमत्पाठकवर्य्यभक्तिविनयाविख्यातकीर्त्तिप्रभा
राजेन्द्रैः परिपूजिताः सुकृतिनः पुण्यावदाग्देवताः ।
मन्तारो जगतां पतिं गुणगणैर्विभ्राजमानाः सनत्-
संवेगादियुजो जयन्तु सततं षट्शास्त्रविद्याविदः ॥
तेषां शिष्यः सदानन्दस्सदनुग्रहभूषितः ।
सिद्धान्तचन्द्रिकावृत्तिं पूर्व्वार्द्धेऽचकरीदिमां ॥

Colophon. इति श्रीसिद्धान्तचन्द्रिकाव्याख्यायां पण्डितप्रवरश्रीसदानन्दगणिकृतायां सुबोधिन्यां पूर्व्वार्द्धं समाप्तं ॥

विषयः । रामचन्द्राश्रमविरचितायाः सिद्धान्तचन्द्रिकायाः पूर्व्वार्द्धस्य व्याख्यानम् ।

No. 2912. पिङ्गलसारः, टीकासहितः । Substance, country-made paper, 12 × 3 inches. Folia, 6. Lines, 10 on a page. Extent, 124 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Text, verse; commentary, prose. Generally correct.

Piñgala-sára. The elements of versification. By Hariprasáda. Attached to the text is an anonymous gloss.

Beginning. टीकायाः,—गोकुलवधूमुखाम्बुजविकाशमार्त्तण्डमण्डलं किमपि ।
अतिकठिनं मम मानसमद्रयाद्रिमिव प्रकाशयतु ॥
आदौ मात्रावर्णप्रस्तारज्ञानार्थं मात्राप्रस्तारं व्युत्पादयति द्वाभ्यां षट्पञ्चेति ।

मूलस्य,—षट्पञ्चचतुस्त्रिद्विप्रमिताष्टठडढणपञ्चगणमात्राः ।
विश्वेवसुपञ्चाग्निद्वाविति भेदाः क्रमेण विस्तारे ॥
दद्याल्लघुमाद्यगुरोरधस्ततः सदृशमग्रतः पंक्त्या ।
शेषकलाः पश्चादपि गुरुमेव च वर्णविस्तारे ॥

End. मूलस्य,—प्रस्तारज्ञानार्थं कौतुकहेतोश्च निखिलसुधियां ।
मेरुपताकादीनां लक्षणमुक्तं समासेन ॥

इति नष्टोद्दिष्टलक्षणम् ।

इति पिङ्गलसारः समाप्तः ।

टीकायाः,—नष्टोद्दिष्टादीनां हेतुमाह प्रस्तारेति ।
गङ्गेशगुरुपादाब्जमकरन्दप्रसादतः ।
सारोद्धारः कृतोऽनेन प्रीयतां परमेश्वरः ॥

Colophon. इति हरिप्रसादोन्नीते पिङ्गलसारे नष्टोद्दिष्टादिलक्षणम् ।

विषयः । मात्रोद्दिष्टप्रकारकथनं । मात्रानष्टप्रकारकथनं । वर्णोद्दिष्टप्रकारकथनं । वर्णनष्टप्रकारकथनं । वर्णमेरुप्रकारकथनं । वर्णपताकाप्रकारकथनं । मात्रामेरुप्रकारकथनं । मात्रापताकाप्रकारकथनं । वर्णमर्कटीप्रकारकथनं । मात्रामर्कटीप्रकारकथनं । नष्टोद्दिष्टादिहेतुकथनञ्च ।

No. 2913. न्यायप्रदीपः । Substance, country-made paper, 13 × 4 inches. Folia, 14. Lines, 7 on a page. Extent, 307 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Paṇḍit S'yámalála Duve. Appearance, new. Prose. Generally correct.

Nyáyapradípa. An exposition of the Nyáya categories. By Gopíkánta.

Beginning. नत्वा श्रीविश्वनाथं विरचयति मतां सम्मुदे न्यायदीपं
मत्तर्कस्नेहयुक्तं श्रुतिविमुखजनध्वान्तविध्वंसदक्षं ।
गोपीकान्तो नितान्तं विबुधगणसभाभाजने भासमानं
सत्सिद्धान्तच्छदो + + कलित + + विद्याकज्जलावर्ज्जितञ्च ॥
इह निर्व्विघ्नपरिसमाप्तिमुद्दिश्य क्रियमाणस्य मङ्गलस्य समाप्तिं प्रति कारणत्वमिति नैया-

यिकाः, तत्र नैयायिकानामयमाशयः। यथा दण्डेन घटो जन्यते, यथा अग्निसंयोगेन रूपान्तरं जन्यते तथा मङ्गलेन समाप्तिर्जन्यते—इति। तदपरे न सहन्ते। मङ्गलस्य कारणत्वे प्रमाणाभावात् इत्यादि।

End. प्राचीनग्रन्थसन्दर्भमतानुमतयुक्तिभिः।
सम्भृते न्यायदीपे तु प्रीतिरातन्यतां बुधैः॥
नैयायिकमणिः कोऽपि गोपीकान्तपरान्तकः।
तदीयन्यायदीपोऽयं परिपूर्णो विराजते॥
विद्वद्वृन्दविवादवर्द्धितमना मेधालयो मौलिना
लीलालालितनीलकण्ठललिताङ्घ्रिद्वन्द्वपङ्केरुहः।
श्रीमद्याज्ञिकवंशरत्नमुदितश्रीवेणीदत्तात्मजो
गोपीकान्त इतीरितप्रकटितः सन्न्यायदीपोऽधुना॥
बालानुजप्रेमनिविष्टचेतसा कृतं मया यत्कुतुकाच्च किञ्चित्।
इदं ह्यसूयाविषयस्य नोचितं सुचेतनैश्चेतसि भावनीयं॥

Colophon. इति श्रीगोपीकान्तविरचितन्यायप्रदीपः समाप्ततामगमत्॥

विषयः। मङ्गलवादः। तत्र शिष्टाचारस्वरूपादिविवेचनम्। द्रव्यत्वादिस्वरूपनिरूपणं। पदार्थलक्षणकथनं। भावाभावभेदेन तस्य द्वैविध्यनिरूपणं। तत्र द्रव्यलक्षणादिकथनं। क्षित्यादिनवलक्षणादिनिरूपणं। इन्द्रियादिलक्षणकथनं। प्रत्यभिज्ञालक्षणं। जीवेश्वरयोः लक्षणादिनिरूपणं। अन्धकारस्य द्रव्यत्ववादनिरसनं। अथ चतुर्विंशतिविधगुणपदार्थविवेचनं। तत्र सामान्यतो गुणलक्षणादिकथनं। समवायि-असमवायि-निमित्तकारणस्वरूपादिकथनं। अथ संयोगादिस्वरूपकथनपूर्व्वकमवान्तरभेदकथनं। स्मृत्यनुभवयोः स्वरूपादिकथनं। प्रमाणलक्षणादिकथनं। क्रमेण प्रत्यक्षानुमानोपमानशाब्दलक्षणादिनिरूपणं। धर्म्माधर्म्मादिलक्षणकथनञ्च।

No. 2914. बलिनरेन्द्राख्यानकम्। Substance, country-made paper, 12 × 4 inches. Folia, 96. Lines, 7 on a page. Extent, 1,870 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Very incorrect. Sanskrit.

Balinarendrákhyánaka. An allegorical tale on the wars between good and evil: the good is the Jain religion. Anonymous.

Beginning. अस्तीह जम्बूद्वीपे मेरोः पश्चिमायां दिशि गन्धिलावती नाम विजयः। तत्र च निवासः सर्व्वसम्पदां, निलयो निःशेषविलासानां, गृहं समस्तसद्व्यवहाराणाम्, अना

स्पदमशेषपापव्यापाराणां, धाम धर्म्मकर्म्मणां, वलयितं प्रांशुप्राकारेण, दुर्गीकृतमतिगभीरप-रिखया, समस्ताश्चर्य्यनिकेतनम्, अतिविस्तीर्णमवनीवनितायास्तिलकभूतं विजयपुरं नाम नगरं। तत्र चाराध्यः पार्थिवसहस्राणां, प्रथमः सत्त्ववताम्, अग्रेसरो विक्रमिणां, पात्रं सम-प्रसन्नदां—इत्यादि।

End. निःशेषचारित्रधर्म्मसैन्यं सर्व्वप्रकर्षवतीमुन्नतिं नीत्वा समस्तसंसारदुःखप्रपञ्च-विप्रमुक्तः सर्व्वशरीरकर्म्मसंबन्धं छित्वा सञ्जातो निर्वृत्ति + + परमेश्वरो बलिमहानरेन्द्रर्षि केवली॥

Colophon. इति बलिनरेन्द्राख्यानकं सम्पूर्णम्।

विषयः। विजयपुराधिनाथस्य चन्द्रमौलेः भुवनभानुनाम्ना यतिवरेण सह संवादेन (रूपकतया) मोहराजस्य तथा धर्म्मसैन्यनायकस्य चारित्रधर्म्मनामधेयस्य राज्ञ उपाख्यान-कथनं। तत्र तयोर्जयपराजयविवरणकथनमुखेन बलिराजाय केवलिनो भगवतो जैनधर्म्मत-त्त्वकीर्त्तनवृत्तान्तकथनं। अथ बलिनरेन्द्रस्य केवलिनः सकाशात् जैनधर्म्मदीक्षाग्रहणादिवृत्ता-न्तकीर्त्तनञ्च।

No. 2915. अध्यात्मचन्द्रिका। Substance, country-made paper, 13 × 4 inches. Folia, 64. Lines, 8 on a page. Extent, 1,323 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Paṇḍit S'yámalála Duve. Appearance, fresh. Prose. Incorrect.

Adhyátma-chandriká. A dissertation on the Vedántic doctrine of Non-duality. By Advaitánanda Paramahañsa Parivrájakáchárya.

Beginning. प्रणम्य परमात्मानं सच्चिदानन्दमव्ययम्।
सुधियां सुखबोधाय क्रियतेऽध्यात्मचन्द्रिका॥

अथ आत्मा वारे श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चेति श्रवणात् आत्मनः श्रवणमनननि-दिध्यासनानि विधेयानि इत्यवगम्यते। इत्यादि।

End. अत एव अभ्यर्हितत्वेन मोक्षसाधनतया तत्त्वज्ञानमेव समधिगम्यमिति शि-वम्।

Colophon. इति परमहंसपरिव्राजकाचार्य्यश्रीमदद्वैतानन्दविरचिताध्यात्मचन्द्रिका परिपूर्णा।

विषयः। श्रवणमननादिविधिविवेचनं। विधिस्वरूपादिचिन्तनं। तत्र वाचस्पति-विवरणकारादीनां मतभेदकथनं। प्रमाणलक्षणतद्भेदादिकथनं। प्रस्थानानन्तरनिरुक्तप्रमाणलक्षणादिनिरसनं। आत्मलक्षणादिकथनं। जीवस्य ब्रह्मप्रतिबिम्बत्वनिरूपणं। परिमाणवादखण्डनमुखेन विवर्त्तवादसंस्थापनं। जीवस्य औपाधिक एव बन्ध इति निरूपणं। मायाविद्यादिस्वरूपकथनं। अध्यारोपादिनिरूपणं। ब्रह्मणो निर्व्विशेषत्वादिनिरूपणं। अत्र सांख्य-नैयायिकादिमतखण्डनं। तुरीयहिरण्यगर्भादिचतुर्व्व्यूहनिरूपणं। अपवर्गस्वरूपादिकथनं। तत्त्वज्ञानादिनिरूपणञ्च।

No. 2916 दीधितिटीप्पनी। Substance, country-made paper, 13 × 3 inches. Folia, 260. Lines, 7 on a page. Extent, 7,962 ślokas. Character, Bengali. Date, ? Place of deposit, Zilá Vírabhúma, Tháná Duvarájapura, S'ríkanṭhapura, S'áradáprasáda Bhaṭṭáchárya. Appearance, old. Prose. Correct.

Dídhiti-ṭippaní. A gloss on Raghunátha S'iromaṇí's *Dídhiti*, a commentary on the *Anumána-khaṇḍa*, of Gañgesa's Chintámaṇi. By Siddhántavágís'a Mahámahopádhyáya. (*Vide* Vol. I.)

Beginning. (१प्रथमपत्रं नास्ति।) तथैवार्थपरीक्षापूर्व्वकमेव प्रत्येकनिरूपितसामानाधिकरण्यविवक्षणे मूलोक्ताप्रसिद्ध्यभावात्। इत्यादि।

End. नीलविशिष्टधूमेऽपि विशेष्यत्वस्य उपाधिसत्त्वेन निरुपाधित्वसाधनव्यापकत्वादिति विशेष्यपर्य्यन्तस्य प्रामाणिकत्वात् तदुपेक्षितं।

Colophon. इति महामहोपाध्यायसिद्धान्तवागीशकृतदीधितिटीप्पनी समाप्ता।

विषयः। रघुनाथशिरोमणिकृतानुमानखण्डदीधितिनामकटीकाया व्याख्यानं।

No. 2917. ब्रह्मवैवर्त्तपुराणं, श्रीकृष्णजन्मखण्डः। Substance, palm-leaf, 22 × 2 inches. Folia, 368. Lines, 8 on a page. Extent, 7,570 s'lokas. Character, Bengali. Date, Sk. 1654. Place of deposit, Zilá Vírabhúma, Tháná Duvarájrpura, S'ríkanṭhapura, Tárakanátha Bhaṭṭácharya. Appearance, old. Verse. Correct.

Brahma-vaivartta-purána. The Puráṇa is divided into four parts, of which the last, entitled *Kṛishṇajanma-khaṇḍa* is comprised in the MS. under notice. The text bears date S'aka 1654, and is consequently two hundred and fifty-two years old. It is also remarkably correct. It extends to 132 chapters, and abstracts of the contents of these are given below in Sanskrit.

4

Beginning. श्रुतं प्रथमतो ब्रह्मन् ब्रह्मखण्डं मनोहरं।
ब्रह्मणो वदनाम्भोजात् परमाद्भुतमेव च॥
ततस्त्वद्वदनात् तूर्णं समागत्य तवान्तिकं।
श्रुतं प्रकृतिखण्डञ्च सुधाखण्डात् परं वरं॥
ततो गणपतेः खण्डमखण्डभवखण्डनं।
न मे तृप्तं मनो लोलं विशिष्टं श्रोतुमिच्छति॥
श्रीकृष्णजन्मखण्डञ्च जन्मादिखण्डनं नृणां।
प्रदीपं सर्व्वतत्त्वानां कर्म्मघ्नं हरिभक्तिदं॥
सद्यो वैराग्यजननं भववासनिकृन्तनं।
कारणं मुक्तिबीजानां भवाब्धितारणं परं॥
कर्म्मोपभोगरोगाणां खण्डने च रसायनं।
श्रीकृष्णचरणाम्भोजप्राप्तिसोपानकारणं॥

End. नमो देव्यै सरस्वत्यै पुराणगुरवे नमः।
सर्व्वविघ्नविनाशिन्यै दुर्गादेव्यै नमो नमः॥
युष्माकं पादपद्मानि दृष्ट्वा पुण्यानि शौनक।
अद्य सिद्धाश्रमं यामि यत्र देवो गणेश्वरः॥

Colophon. इति ब्रह्मवैवर्त्ते महापुराणे श्रीकृष्णजन्मखण्डे सूतशौनकसंवादे द्वात्रिंशदधिकशततमोऽध्यायः। समाप्तमिदं। इति शकाब्दाः। १६५४।

विषयः। १, २, ३, ४ अध्याये,—नारायणनारदसंवादेन विष्णुवैष्णवयोः गुणप्रशंसाकीर्त्तनं। नवधाभक्तिलक्षणनिरूपणं। भक्तलक्षणं। गोलोके श्रीदाम्ना समं राधायाः कलहवर्णनं। ‘गोपिका भवेति’ राधिकां प्रति श्रीदाम्नः शापदानं। विरजाजन्मकथनं। श्रीकृष्णस्य करुणविलापेन विरजासलिलात् राधाया आविर्भावकथनं। विरजागर्भे सप्तपुत्रोत्पत्तिकथनं। तस्याः शापेन तेषां लवणेक्षुसुरादिसप्तसमुद्ररूपप्राप्तिकथनं। विरजाकृष्णयोः विलासादिकं निशम्य राधाया क्रोधमन्दिरादिगमनविवरणं। पुनः राधाश्रीदाम्नोरन्योन्यं शापदानवृत्तान्तकथनं।

मुखरोगाधिकारे,—शुष्कलेपनादिकं। सौगन्धिवटिका। घृतयोगः। रसकवटिका। कर्पूरेश्वरवटिका। चन्द्रभागिकं। मूकदोषप्रक्रिया। बधिरदोषप्रक्रिया। गण्डमालारोगप्रक्रिया।

अङ्गुलिरोगाधिकारे,—मदनकण्टकप्रलेपः। दूर्व्वाप्रलेपः।

स्वरभङ्गाधिकारे,—मधुरस्वरमोदकं। चित्रकुटरसः।

शोथोदराधिकारे,—वास्तुयोगः। वृहत्योगेश्वररसः। वृहद्वीरभद्ररसः। वहन्मृत्युञ्जयरसः। पञ्चेश्वररसः। शोथशार्दूलतैलं। महाभैरवेश्वररसः। महाशोथशार्दूलतैलं।

कामरोगाधिकारे,—लोहरसामृतसिन्धुः। वृहत्कनकसिन्दूरं। पञ्चेश्वरचूर्णं। दाड़िम्बे-

श्वरचूर्णं। चन्द्रामृतरसः। सिद्धवीजचूर्णं। त्रिफलादिमोदकं। अपामार्गचूर्णयोगः। तालिशा-दिमोदकं। कटुत्रयवटिका।

यक्ष्मश्वासाधिकारयोः,—श्वासान्तकरसः। शृङ्गेश्वरवटिका। वृहद्द्रामावलेहः। रससागरः। वृहत्तालिशादिमोदकं। चन्दनेश्वरमोदकं। वासकेश्वरघृतं। कण्टकार्य्यादिघृतं। रसकल्पवटिका। चन्दनादितैलं। वृहच्चन्दनादितैलं। वृहत्तालिशादिचूर्णं। वृहल्लौहेश्वररसः। वृहदर्केश्वररसः। वृहद्दालिम्बेश्वरघृतं। वृहच्चन्दनेश्वरतैलं। रत्नामृतयोगः।

वातरोगाधिकारे, वातान्तकरसः। वातारिरसः। सैन्धवेश्वररसः। लौहेश्वररसः। मरि-च्यादिचूर्णं। रङ्गराजरसः। योगराजघृतं। कैशराजघृतं। रत्नेश्वरघृतं। सिंहेश्वरघृतं। पञ्च-रत्नघृतं। अमृतार्णवघृतं। सर्व्वेश्वरघृतं। विष्णुतैलं। वृहद्विष्णुतैलं। कुब्जप्रसारणीतैलं। वृह-न्माषतैलं। निरामिषमांसतैलं। वृहद्वीजतैलं। पारिजाततैलं। योगराजगुग्गुलुः। रससुन्दरं। रसकज्जली। नानायोगाः। चिन्तामणिरसः। वदरीरावियोगः। प्रवालनियोगः। पुष्परसतैलं। वृहदेरण्डतैलं। सैन्धवादितैलं। वृहत्सैन्धवादितैलं।

उन्मादरोगे,—शिवाघृतं। नारायणघृत। छागलादिघृतं। वृहत्कल्याणमोदकं। वृहत्-शिवाघृतं। वृहल्लौहघृतं। उडुम्बरघृतं। मध्यमनारायणतैलं। वृहत्हिमसागरतैलं। वृहत्कु-मलपारिजाततैलं। वाट्यालादिमोदकं। मेथीश्वरमोदकं। वृहत्शतमूल्यादिमोदकं।

मूत्रकृच्छ्राधिकारे,—मूत्रकृच्छ्रान्तकमोदकं। कौमुदेश्वररसः। वृहत्कल्याणसिन्धुः। इन्द्रेश्वर-मोदकं। वृहत्पाणिभद्रमोदकं। वृहद्वङ्गेश्वरघृतं।

प्रमेहाधिकारे,—रससारचूर्णं। कैशोरेश्वरतैलं। वृहत्तरुणेश्वरतैलं। वृहत्कदल्यादिघृतं। वृहद्धात्रीघृतं। वृहत्हरीतकीश्वरः। वृहत्तरुणेश्वरः। कल्पतरुमोदकः। वदरेश्वरयोगः। कर्पूरमोदकं। मेहमुद्गरमोदकं। सुरेश्वरीयोगः। कैशोरचूर्णं। ईशावलेहः। इन्द्रेश्वरघृतं। वृहन्मकरध्वजः। लक्ष्मीनारायणतैलं। वङ्गेश्वरघृतं।

प्रदराधिकारे,—हरीतकीयोगः। माधवेन्द्रयोगः। रामदन्तिमूलयोगः। वज्रपुष्पकलियो-गः। कुमुदयोगः। रक्तपङ्कजवीजयोगः। श्वेतपङ्कजवीजयोगः। वृहत्कमलाद्यतैलं।

सूतिकारोगाधिकारे,—दार्व्वादियोगः। शिवाधात्रीघृतपिष्टं। शतावरीप्रलेपः। धन्या दिपाचनं। सूतिकाभरणवटिका। शुण्ठीखण्डः। तालमूल्यादिमोदकं। वृहत्पुनर्नवादितैलं। दूर्व्वादियोगः। पिङ्गलादियोगः। पिप्पल्यादिपाचनं।

गर्भस्रावाधिकारे,—गर्भस्थापनोपायकथनं। मेथियोगः। पुरातनपत्रयोगः। बन्ध्यादोष-प्रतीकारकथनं। बाधकचिकित्सा। लक्षणादिकं। तुलस्यादियोगः। मेथिकादियोगः। कार्पा-सादियोगः। योगेश्वरमोदकं।

मृतवत्सादिचिकित्सा,—कर्णामृतयोगः। जीवितयोगधारणं। गन्धपुष्पकं। कुमारेश्वरमो-दकं।

स्तनरोगे—वाजिगन्धादिप्रलेपः।

रक्तपित्ताधिकारे,—हरीतकीयोगनस्यं। नागरादियोगः। वासादिखण्डः। कुष्माण्डखण्डः। वृहद्वासादितैलं। योगेन्द्रमोदकं। हरीतक्यवलेहः।

भगन्दराधिकारे,—गुग्गुल्वीश्वररसः। प्रलेपयोगः। फणिफेनतैलं। जम्बीरेश्वररसः।

दाहरोगाधिकारे,—ताम्बूलेश्वररसः। मुस्तकादिक्वाथः। अमृताक्वाथः। धान्यादिमोदकं। प्राणवल्लभमोदकं। वृहत्प्राणेश्वरमोदकं। धन्यादिघृतं। वृहद्गुडूचीतैलं।

अम्लवाताधिकारे,—अम्लपित्ताधिकारे च—पटोलादिचूर्णं। अजमोदादिमोदकं। शङ्खेश्वरवटिका।

दन्तरोगाधिकारे,—दासीपचादियोगः। तुलस्यादियोगः।

गुल्मरोगाधिकारे,—प्लीहगुल्मान्तकरसः। वृहत्ताम्रेश्वररसः। वृहत्रसकुमारीरसः। निर्गुण्ठियोगः। वृहच्चतुर्मुखरसः। वृहत्हिङ्गुलेश्वररसः। अत्तड़ामूलयोगः। अपामार्गेश्वरचूर्णं। स्फटिकेश्वरवटिका। अमृतार्णवरसः। द्रावकः। योगरत्नचूर्णं। सर्व्वजयचूर्णं। राजेश्वरवटिका।

कामलहलीमकाधिकारे,—कामलारिरसः। लौहेश्वररसः। वृहद्रसमण्डूर्य्यं। वृहत्त्रिकद्रादिलौहः। हरीतकीरसः। वृहद्भूनिम्बादिरसः। नस्ययोगाः। मूलकर्कयोगः। पुरन्दरतैलं।

पाण्डुरोगाधिकारे,—पाण्डवान्तकरसः। अङ्कुरत्वग्योगः। सौभद्रवटिका। पञ्चस्वररसः। रसहिङ्गुलवटिका। मण्डूकेश्वररसः।

तृष्णाधिकारे,—सैन्धवादिवटिका। नानायोगाः।

विस्फोटाधिकारे,—खदिरादियोगः। सोमराजादिक्वाथः। दधिगुड़ामृतयोगः। विड़ङ्गादिमोदकं। भार्ग्यादियोगः।

विषाधिकारे,—यज्ञाङ्गयोगः। जैपालयोगः। समर्थ्यादिमूलयोगः। क्षुद्रमूलादियोगः। कुमुद्योगः। व्रीह्यादियागः। चिन्तामणिवटिका। सहामूलयोगः। अपामार्गपत्रयोगः। कर्णमलायोगः। लौहजङ्गादियोगः।

हिक्काधिकारे,—होमदानादिक्रिया। विभीतकावलेहः। पञ्चरत्नघृतं।

हृद्रोगाधिकारे,—पिप्पल्यादिप्रलेपः। मरिचादिचूर्णं। वृहद्रसामृतवटिका। पुष्करादिवटिका।

दद्रुरोगाधिकारे, गलकण्टकादिघृतं। दधिमस्तुयोगः। विविधलेपनानि। चक्रदधिकर्द्दमादियोगाः। कुक्कुटवटिका। शिंसपामोदकं। अपामार्गवटिका।

गात्रगन्धचिकित्सायां,—विल्वादिप्रलेपः। पुष्पयोगः। यमानीयोगः। आर्द्रकयोगः। उशीरादियोगः। हरीतक्यादियोगः।

विषमज्वरचिकित्सायां,—पानभक्षणादियोगः। चौरादियोगः। पुनर्णवायोगः। निर्द्दिग्धिकायोगः। जयन्तीयोगः।

राजयक्ष्मचिकित्सायां,—विभीतकफलादियोगः। रोगाणामुत्पत्तिवृत्तान्तकीर्त्तनं। कलिकालमाहात्म्यकथनं।

वाजीकरणाधिकारे,—श्वेतार्कादियोगः। शतमूल्यादियोगः। पारिभद्रयोगः। कैशोरेश्वरवटिका। शाल्मलयोगः। अर्कश्वरसहायोगः। त्वक्सिन्धुयोगः। वृहद्वङ्गवीजमोदकं। वृहत्स्वर्णगुटिका। दरिद्रदोषापायचिकित्सा।

पुष्टाधिकारे,—वृहत्कान्तीश्वरः। वृहदिन्द्रेश्वरः। वृहत्लोहेश्वरमोदकं। वृहद्भुवनेश्वरमोदकं। हैमवतीमोदक। त्रिफलामोदकं। पारिभद्रमोदकं। कुष्माण्डमोदकं। श्रीफलादिमोदकं। धात्रीमोदकं। वृहत्कमलेश्वरतैलं। कामरूपेश्वरतैलं। वृहन्नारायणतैलं। वृहच्चन्द्रप्रभातैलं। त्रैलोक्यमोहनतैलं। वहत्पुष्पेश्वरतैलं। वहत्श्रीगोपालतैलं। जीवनारायणतैलं। अमृतार्णवमोदकं। ग्रन्थेऽस्मिन् सर्व्वत्र रोगाणां कर्म्मविपाकादिकथनपूर्व्वकमुत्पत्तिप्रकारादिकीर्त्तनञ्च।

No. 2941. मानससेवासंक्षेपः। Substance, country-made yellow paper, 12 × 6 inches. Folia, 2. Lines, 16 on a page. Extent, 72 ślokas. Character, Bengali. Date ? Place of deposit, Zillá Vírbhúma, Gráma Poḍo, Vinodavihárí Kaviréja. Appearance, new. Prose. Correct.

Mánasasevá-saṅkshepa. Intellectual worship of Rádhá and Krishṇa, by imagining oneself as a serving-maid to them, no ritual or offering of any kind being resorted to. Anonymous.

अथ मानससेवा।

Beginning. आत्मानं प्राणसखीसमनुगां तत्परिचारिकां सखीं मत्वा ब्राह्मे मुहूर्त्ते तदाज्ञया वामन्तोकुञ्जमध्यकेलिशय्यास्थितौ श्रीराधाकृष्णौ प्राकशिक्षितशुकशारिकावाक्येन विनिद्रौ कृत्वा—इत्यादि।

End. तदनन्तरं वहिर्निर्गत्य कुञ्जद्वारि स्थित्वा तयोः गुणलीलाप्रेमकथनं कृतवतीति।

Colophon. इति मानससेवासंक्षेपः।

विषयः। वाह्यपूजोपकरणादिकं विना मनोराज्यविजृम्भणमात्रेण सखीभावमवलम्ब्य राधाकृष्णयोः सेवनादिप्रकारकीर्त्तनं।

No. 2842. साधनपद्धतिः। Substance, country-made yellow paper. 12 × 6 inches. Folia, 2. Lines, 16 on a page. Extent, 100 ślokas, Character, Bengali. Date, ? Place of deposit, Zillá Vírbhúma, Gráma Poḍo, Vinodavihári Kavirája. Appearance, new. Prose and verse. Correct.

Sádhana-paddhati. Directions for the worship and service of Rádhá and Kṛishṇa—a Vaishnavite manual, as ordained by Rúpa Gośvámí.

Beginning. ध्यायेत् श्रीगुरुमेवमनुगं श्रीमच्छचीनन्दनं
प्रेष्ठं दासमथ प्रकाशमपि तद्धामैकदेशस्थितं।
संसेव्यैतदनुज्ञया परपरादींस्तादृशान् भावयन्
श्रीचैतन्यकृपागुरूक्तिपथुपीनाम्ना व्रजं प्रव्रजेत्॥

End. भ्रमरालिदुकूलधारिणी मुदिता मेऽस्तु विलासमञ्जरी॥

Colophon. इति श्रीरूपगोस्वाम्युक्तसाधनपद्धतिः।

विषयः। राधाकृष्णयोः साधनप्रकारकथनं।

No. 2943. स्तवमालाभूषणम्। Substance, country-made paper, 11 × 5 inches. Folia, 97. Lines, 16 on a page. Extent, 4,341 ślokas. Character, Bengali. Date, ? Place of deposit, Zillá Vírbhúma, Gopalpura, Rámamohana Kavirája. Appearance, old. Prose. Correct.

Stava-mábá-bhúshaṇa. A gloss on certain hymns composed by Rúpa Gos'vámí, and compiled by Jíva Gośvámí. By Vanamálí Vidyábhushaṇa.

Beginning. विचित्रविरक्तिश्रीहरिकथानुकीर्त्तनकृतात्ताम्यात्।
प्राकमूचुर्यं सन्तः तं स्तवमालार्थदेशिकं वन्दे॥
पुत्रमिति। उदारं सामुद्रिकोक्तेः।

End. श्रीरूपदेवः करुणैकसिन्धुस्तवालिमेतां यदि नाकरिष्यत्।
भक्ता यथावद्व्रजराजसूनोर्नावागमिष्यन् गुणरूपलीलाः॥
विद्याभूषणरचिते स्तवमालाभूषने भाष्ये।
परितुष्यतु वनमाली वररुचिशाली-रते तस्मिन्॥

Colophon. इति स्तवमालाव्याख्या समाप्ता।

विषयः। रूपगोस्वामिकृताया जीवगोस्वामिसंगृहीतायाः स्तवमालाया व्याख्यानं।

No. 2944. पदामृतसमुद्रटीका। Substance, country-made paper, 14 × 5 inches. Folia, 95. Lines, 4 on a page. Extent, 4,370 ślokas. Character. Bengali Date, Sk. 1704. Place of deposit, Zillá Vírbhúma, Gopálapura, Rámmohana Kavirája. Appearance, old. Prose. Correct.

Padámṛita-samudra. An anthology of Vaishṇavite hymns, some in Sanskrit, others in Bengali, together with glossorial and explanatory notes in Sanskrit. Anonymous.

श्रीश्रीराधाकृष्णः।

Beginning. ग्रन्थारम्भे निजेष्टदेवतानिष्ठाभीष्टसिद्धाकाङ्क्षी कोऽपि श्रीयुक्तमित्यादिना प्रणमति।

End. अत्र 'तोमार' इति यदस्ति तदभेदेनेति बोध्यं। विषयविशेषस्य भोगकाले स्वादुविशेषात् परकाले महापीड़ादायकत्वात्। स्वोडारपूर्व्वकं प्रेमयाचञा स्पष्टास्ति।

Colophon. समाप्तोऽयं ग्रन्थः। शकाब्दाः १७०४।

विषयः। जयदेव सनातन-चण्डिदास-विद्यापतिप्रभृतीनां संस्कृतवाङ्गलोभयविधपद्यानि संगृह्य गुम्फितस्य पदामृतसमुद्रस्य संस्कृतभाषया रागादिलक्षणप्रदर्शनपूर्व्वकं व्याख्यानं।

No. 2945. युगलकिशोरसहस्रनामस्तोत्रम्। Substance, country-made yellow paper, 16 × 5½ inches. Folia, 13. Lines, 6 on a page. Extent, 146 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva, Zilá Vírbhúma, Brajavásír Maṭha. Appearance, old. Verse. Correct.

Yugalakiśora-sahasranáma stotra. A hymn in which a thousand epithets in praise of Rádhá and Kṛishṇa are strung together. Each epithet is accepted as a name. The hymn is attributed to the saint Nárada.

श्रीराधाकृष्णाभ्यां नमः।

Beginning. अस्य श्रीयुगलकिशोरसहस्रनामस्तोत्रस्य श्रीनारद ऋषिः श्रीराधावल्लभो देवता श्रीराधावल्लभचरणकमलप्राप्तये जपे विनियोगः। इत्यादि।

End. तस्माद्वृन्दावने गोप्यो गोविन्दनिकटे स्थिताः।
यथापूर्व्वं विक्रीड़न्त्यो ज्ञातपूर्व्वा मया मुने॥

Colophon. इति श्रीयुगलकिशोरसहस्रनाम समाप्तं।

विषयः। श्रीराधाकृष्णयोर्युगलनामस्तोत्रं।

No 2946. संक्षिप्तसारपरिशिष्टम् । Substance, palm-leaf, 16 × 2 inches. Folia, 46. Lines, 4 on a page. Extent, 1,219 ślokas. Character, Bengali. Date, ? Place of deposit, Yayadeva Gráma, Zillá Vírabhúma, Brajavásís' Maṭha. Appearance, old. Prose. Correct.

Saṅkshiptasára-pariśishṭa. A supplement to the *Saṅkshiptasára* grammar. It supplies such rules as are not given in the original text. By Goyichandra, revised by Jumaranandi.

Beginning. जुमरनन्दिपरिशोधितभागात् परिशिष्टमस्ति यत्किञ्चित् ।
तत् सम्पूर्णं कुरुते गोयीचन्द्रः प्रकीर्णया टत्त्या ॥
स्त्री पुं । तद्वन्द्वाद्यो यावन्त एवार्थाः प्रागुक्ता इत्यादि ।

End. आकारस्य स्थाने इति कृते विकल्पः स्यात् नित्यमखट्टिकेति ॥

Colophon. इत्यौत्थासनिकश्रीगोयीचन्द्रविरचितं जुमरनन्दिपरिशोधितं परिशिष्टं समाप्तं ।

विषयः । संक्षिप्तसारव्याकरणमूलानुक्तानां प्रक्रियाणां प्रदर्शनं ।

No. 2947. हंसदूतटीका । Substance, country-made paper, 15 × 3½ inches. Folia, 30. Lines, 5 on a page. Extent, 787 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva Gráma, Zillá Vírabhúma, Brajavásís' Maṭha. Appearance, old. Prose. Correct.

Haṅsadúta-ṭíká. A commentary on a poem called *Haṅsadúta* or "messenger drake," an imitation of the *Meghadúta* of Kalidása. Its subject is a message from Nala, king of *Vidarbha*, to his long-separated wife, Damayantí. By Viśvanátha Chakravartí.

Beginning. वन्दे गौरं कृपासिन्धुं स्वगुणैर्ग्रथितं स्वयं ।
नामचिन्तामणेर्हारं योऽजिग्रहदिदं जगत् ॥
वन्दे श्रीराधिकापादान् श्रीकृष्णप्रेमदर्शकान् ।
भवसिन्धुमिमं मन्ये गोष्पदं यत्समाश्रयः ॥
अथ नानाप्रकारश्रीभगवल्लीलावर्णनं प्रारिप्सुः श्रीरूपगोस्वामी हंसदूताख्यं कुर्व्वाणो विहिताचारपरम्पराप्राप्तं मङ्गलं स्वेष्टदेवतास्मरणरूपमित्यादि ।

End. सान्द्रां घनीभूतां प्रमदलहरीमानन्दधारां प्रथयतु जनयत्वित्यर्थः । एतेनास्याचिन्त्यमहिमत्वं सूचितं ।

8

Colophon. इति श्रीविश्वनाथचक्रवर्त्तिविरचिता हंसदूतटीका समाप्ता ।

विषयः । रूपगोस्वामिकृतहंसदूतस्य व्याख्यानं ।

No. 2948. अभिसाराद्यष्टरसः । Substance, country-made paper, 14 × 5 inches. Folia, 21. Lines, 8 on a page. Extent, 400 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva Gráma, Zillá Vírabhúma, Brajavásís' Maṭha. Appearance, old. Prose and verse. Incorrect.

Abhisárádyashṭarasa. An amatory poem describing the eight conditions of women in love. By Gopáladása.

अथाभिसारिका ।

Beginning. कान्तार्थिनी तु या याति सङ्केतं साभिसारिका ।

इयं द्वादशविधा । तथाहि,—

स्फारिकुज्झटिहेमन्तरजनीध्वान्तसञ्चयाः ।

ग्रीष्ममध्याह्नवातालीकोलाहलविधूद्याः ॥ इत्यादि ।

End. यदुनाथ भवन्तमागतं कथयिष्यन्ति कदा मदालये ।

युगपत्त्वरितः प्रधाविता विकसद्भिर्वदनेन्दुमण्डलैः ॥

Colophon. इति श्रीगोपालदासकृतोऽभिसाराद्यष्टरसः सम्पूर्णः ।

विषयः । अभिसारिकाद्यष्टविधनायिकानिरूपणं ।

No. 2949. प्रायश्चित्तसारकौमुदी । Substance, palm-leaf, 16 × $2\frac{1}{2}$ inches. Folia, 82. Lines, 4 on a page. Extent, 558 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva Gráma, Zillá Vírabhúma, Yádavachandra Gośvámí. Appearance, old. Prose. Correct.

Práyaśchittasára-kaumudí. A summary of the rules and rituals regarding expiations. Anonymous.

Beginning. सान्द्रानन्दमयं रामं प्रणम्य वनमालिना ।

वितन्यते प्रायश्चित्तसारकौमुदी सुन्दरी ॥

अथ प्रायश्चित्तनिरुक्तं ।

तत्र मान्याः । पापक्षयमात्रसाधनं कर्म्म प्रायश्चित्तमिति । तच्चिन्त्यं चान्द्रायणादीनां पापक्षयातिरिक्तस्वर्ध्वंसादीनामपि जनकत्वासम्भवात् । इत्यादि ।

End. श्राद्धदिने स्त्रीगमने अहोरात्रमभोजनं दिवामैथुने दिनमेकं व्रती भवेदिति ॥

Colophon. इति प्रायश्चित्तसारकौमुदी सम्पूर्णा ॥

विषयः। नानाविधवचनानां मीमांसापूर्व्वकं कृतोऽयं ग्रन्थः। प्रायश्चित्तलक्षणनिरूपणं। परिभाषाकथनं। प्रायश्चित्तपूर्व्वाह्णकृत्यकीर्त्तनं। प्रायश्चित्तापदेशः। गोवधप्रायश्चित्तनिरूपणं। गोवधापवादः। अज्ञानकृतरोधादिनिमित्तगोवधप्रायश्चित्तकथनं। अपालनवधप्रायश्चित्तं। प्रायश्चित्ताभावनिरूपणं। प्रतिलोमजातिवधप्रायश्चित्तकथनं। स्त्रीवधप्रायश्चित्तं। व्यभिचारिणी-स्त्रीवधप्रायश्चित्तं। गर्भवधप्रायश्चित्तं। धेनुमङ्कलनादिनिरूपणं। भोजनलक्षणं। चाण्डालाद्यन्न-भोजनप्रायश्चित्तं। तत्स्पृष्टान्नभोजनप्रायश्चित्तं। अन्त्यजस्त्रीगमनप्रतिग्रहादिप्रायश्चित्तं। शूद्रान्न-भोजनप्रायश्चित्तं। कापालिकान्नभोजनप्रायश्चित्तं। केशकीटोपहतान्नादिभोजनप्रायश्चित्तं। गो-मांसभक्षणप्रायश्चित्तं। तदन्ते पुनरुपनयनविधानं। लशुनादिभक्षणे प्रायश्चित्तं। रेतोमूत्रपुरी-षादिभक्षणप्रायश्चित्तं। तद्दूषितफलादिभक्षणप्रायश्चित्तं। स्वक्षौद्रभक्षणप्रायश्चित्तं। पर्य्युषित-शुष्कद्रव्यभक्षणप्रायश्चित्तं। शूद्रभाजन-भग्नप्राप्तकांस्यपात्रे भोजनप्रायश्चित्तं। सूतकमृतकान्नभो-जनप्रायश्चित्तं। हस्तदत्तशूद्रादत्तघृतादिभक्षणप्रायश्चित्तं। अकृताचमनस्य पानभोजनादिप्राय-श्चित्तं। देवतातिथिभृत्यादिवर्ज्जनभोजनप्रायश्चित्तं। भोजनकाले पुरीषाद्युत्सर्गप्रायश्चित्तं। तैला-भ्यङ्गादिपूर्व्वक भोजनप्रायश्चित्तं। स्त्रीयोच्छिष्टभोजनप्रायश्चित्तं। ब्राह्मणोच्छिष्टभोजनप्रायश्चित्तं। विडालकाकाद्युच्छिष्टभोजनप्रायश्चित्तं। कुत्सितपङ्क्तिशूद्रपङ्क्त्यादिभोजनप्रायश्चित्तं। पीत-शेषजलदुग्धादिपानप्रायश्चित्तं। महापातकनिरूपणं। अतिपातकादिनिरूपणं। ब्राह्मणवधप्रा-यश्चित्तं। गोब्राह्मणवर्ज्जमाततायिवधे प्रायश्चित्ताभावकथनं। सुरापानादिप्रायश्चित्तकथनं। गुरु-लघुसंसर्गकालनिरूपणं। शत्रुस्त्रीणामप्यवध्यत्वकथनं। संसर्गप्रायश्चित्तं। व्रात्यप्रायश्चित्तं। सन्ध्या-वन्दनादिनित्यकर्म्माकरणप्रायश्चित्तं। शूद्रप्रतिग्रहप्रायश्चित्तं। असत्यभाषणप्रायश्चित्तं। स्वभार्य्या-यां मातृ-भगिन्यादिवचनप्रायश्चित्तं। उच्छिष्टस्य चाण्डालादिदर्शनप्रायश्चित्तं। एवं सूर्य्यादिदर्श-नस्य प्रायश्चित्तं। विप्रादिमध्यगमनप्रायश्चित्तं। अग्नौ पादप्रतापनस्य कुशे पादमार्ज्जनस्य च प्राय-श्चित्तं। गुरु-ब्राह्मणतिरस्कारे प्रायश्चित्तं। मिथ्याशपनादिप्रायश्चित्तं। जलादिभ्रष्टप्रायश्चित्तं। जलाग्न्यादावशुचिप्रक्षेपप्रायश्चित्तं। शक्रधनुः-पलाशाग्न्योर्दर्शनप्रायश्चित्तं। देवागारादिकृतेष्टका-दिना स्वगृहकरणप्रायश्चित्तं। ष्ठीवनादिप्रायश्चित्तं। व्रतभङ्गप्रायश्चित्तं। चाण्डालादिस्पर्शनप्रा-यश्चित्तं। उच्छिष्टविप्रेण सह विप्रादिस्पर्शनप्रायश्चित्तं। उच्छिष्टस्य मानुषादिपुरीषस्पर्शप्रायश्चित्तं। रजःस्वलास्पर्शप्रायश्चित्तं। रजस्वलायाः शूद्रीकुक्कुरशूकरादिस्पर्शनप्रातश्चित्तं। सामान्यतः स्पर्शप्रायश्चित्तापवादः। सर्व्वेषां प्रायश्चित्तानां संक्षेपतो व्यवस्थाकथनञ्च।

No. 2950. यमुनाष्टकम् । Substance, country-made paper, 14¼ × 4½ inches. Folium, 1. Lines, 10. Extent, 17 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva Gráma, Zillá Vírabhúma. Jádavachandra Gosvámí; another copy at S'onapura-grám, Post Boyáliyá, Zillá Rájasáhí. Sáhá Bábu. Appearance, very old. Verse. Correct.

Yamunáshṭaka. A hymn in eight stanzas in praise of the river Yamuná. By Rúpa Gosvámí.

Beginning. भ्रातुरन्तकस्य पत्तने विपत्तिहारिणी
प्रेक्षयातिपापिनोऽपि तापमिश्रुतारिणी ।
नीरमाधुरीभिरप्यशेषचित्तबन्धिनी
मां पुनातु सर्व्वदारविन्दबन्धुनन्दिनी ॥

End. तुष्टबुद्धिरष्टकेन निर्म्मलोर्म्मिचेष्टितां
त्वामनेन भानुपुत्रि सर्व्वदेववेष्टितां ।
यः स्तवीति वर्द्धयस्व सर्व्वतापमोचने
भक्तिपूरमस्य देवि पुण्डरीकलोचने ॥

Colophon. इति श्रीरूपगोस्वामिना विरचितं श्रीयमुनाष्टकं समाप्तं ।

विषयः । यमुनायाः स्तवनं ।

No. 2951. कृष्णाह्निककौमुदी । Substance, country-made paper, 10 × 4 inches. Folia, 52. Lines, 9 on a page. Extent, 1,404 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva Gráma, Zillá Vírabhúma, Jádavachandra Gosvámí. Appearance, very old. Verse. Correct.

Krishṇáhnika-kaumudí. Poetical descriptions of Kṛishṇa's amatory career in Vrindávana. By Vilvamañgala Ṭhákura.

Beginning. रजनिचरमयामे स्तोकताराभिरामे
किमपि किमपि वृन्दादेशजाताभिनन्दा ।
विततिरकृत राधाकृष्णयोः स्वापबाधा-
मतिमृदुवचनानां शारिकाणां शुकानां ॥
प्रथममनुरोधा बोधयामास राधा-
ममकृदममकल्पैः शारिकालिः सुजल्पैः ।
अथ कृतसुखदोहः कृष्णमुद्दनमोहः
किमपि शुकसमूहः प्रेमदक्षापगूहः ॥ इत्यादि ।

End. तन्त्रास्मिन्त्रे सति मधुमदे किञ्चिदङ्गावशिष्टे
प्रत्यासन्नः समदनमदो यः समस्तः परीष्टे।
तत्तत्सन्धौ समजनि जनीमण्डले माधुरीया
सा वाग्देवी + + + + + + + + + ॥

Colophon. इति श्रीविल्वमङ्गलविरचितायां श्रीकृष्णाह्निककौमुद्यां षष्ठः प्रकाशः।

विषयः। १ प्रथमप्रकाशे,—शारिकाशुकाभ्यां राधाकृष्णयोर्निकुञ्जमधितिष्ठतोः प्रबोधादिवर्णनं। प्रबोधितयोस्तयोश्चेष्टादिवर्णनं। २य प्रकाशे,—स्वगृहमागतयोः कपटनिद्रयोस्तयोः पुनः प्रबोधनादिवर्णनं। बाल्यभोगभाजनादिवर्णनं। गोचारणवर्णनं। जलविहारवर्णनं। वनविहारवर्णनं। अभिषेकादिवर्णनं। ३ये,—नन्दगृहे पाकक्रियापारिपाट्यकथनं। तत्र व्यञ्जनलड्डुकादीनां नामादिकथनं। भोजनादिवर्णनं। निकुञ्जवर्णनं। तत्र षड़्तुवर्णनं। कृष्णस्य तत्र गोपीभिः सह साक्षात्कारादिवर्णनं। ४ र्थे,—श्रीकृष्णस्य रूपभूषादिवर्णनं। मुरलीनिनादेन स्वाकृष्टाया सवयस्याया राधायाः कुसुमचयनव्याजेन निकुञ्जप्रवेशादिवर्णनं। राधाया वेशविन्यासादिवर्णनं। राधाकृष्णयोर्विलासादिवर्णनं। तत्र अक्षक्रीड़ादिकथनं। ५ मे,—६ष्ठे च,—श्रीकृष्णस्य वृन्दावनप्रवेशवर्णनं। गृहप्रत्यागमनपूर्व्वकं वेशभूषापरिवर्त्तनादिवर्णनं। गोदोहनवर्णनं। गोष्ठशोभावर्णनं। शयनवर्णनं। राधाया अभिसारादिवर्णनं। मधुपानादिवर्णनं। रासलीलादिवर्णनञ्च।

No. 2952. गौरचन्द्राष्टकम्। Substance, country-made paper, 10 × 3½ inches. Folium, 1. Lines, 16. Extent, 25 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva Gráma, Zillá Vírabhúma, Vinodavihári Chaṭṭarája. Appearance, old. Verse. Incorrect.

Gaurachandráshṭaka. A hymn in eight stanzas in praise of Gaurachandra *alias* Chaitanya. Anonymous.

Beginning. स्वर्धुन्याश्चारुतीरे स्फुरितमतिबृहत्कुर्म्मपृष्ठाभगात्रं रम्यं रामावृतं सन्मणिकनकमहासद्मसंघैः परीतं।
नित्यं प्रत्यालयोद्यत्प्रणयभरलसत्कृष्णसंकीर्त्तनाद्यं श्रीवृन्दाटव्यभिन्नं त्रिजगदनपश्रीनवद्वीपमीडे॥ इत्यादि।

End. श्रीमत्स्वीयाङ्गभासोऽज्ज्वलितदशदिशः स्फीतसद्वस्त्रवीतान्, श्रीमत्कण्ठीसुमालासुतिलकभगवन्नाममुद्राङ्किताङ्गान्।

प्रेम्ना सस्वेदवाष्पोत्पुलकमुखतनूत्कीर्त्तनानन्दमत्तान्, श्रीवासादीन् स्मरामि प्रभवरमभितः संस्थितान् सर्व्वभक्तान्॥

Colophon. इति गौरचन्द्राष्टकं सम्पूर्णं।

विषयः। गौराङ्गमहिम्न तत्परिकरादिवर्णनरूपं स्तोत्रं।

No. 2953. अष्टकालसेवानिरूपणम्। Substance, country-made paper, 12 × 4 inches. Folia, 3. Lines, 5 on a page. Extent, 56 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva Gráma, Zilla Vírabhúma, Vinodavihári Chaṭṭarája. Appearance, old. Prose. Generally correct.

Ashṭakála-sevá-nirúpaṇa. The service due to Kṛishṇa from his female associates at the eight watches of the day and night. Anonymous.

Beginning. अथ सेवापरायणसखीनां क्रिया।

वस्त्रालङ्कारपाद्यादिनीरताम्बूलसंस्क्रिया॥ इत्यादि।

End. कृष्णपक्षे नीलमणिचूड़ा-नीलपट्टवस्त्रकस्तूरीचर्च्चा-नीलमणिहारेत्यादि समयानुरूपवेशकरणेन सेवापरायणा सखीति।

Colophon, इति अष्टकालसेवानिरूपणं॥

विषयः। सामान्यतः-सखीकृत्यकथनपूर्व्वकं प्रातः-सङ्गव-मध्याह्नाद्यष्टसमयेषु श्रीकृष्णसेवनरूपसखीकार्य्यनिरूपणं।

No. 2954. विलापकुसुमाञ्जलिः। Substance, country-made paper, 10 × $3\frac{1}{2}$ inches. Folia, 12. Lines, 8 on a page. Extent, 216 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva Gráma, Zillá Vírabhúma, Brahmacháris' Maṭha. Appearance, fresh. Verse. Incorrect.

Vilápa-kusumáñjali. A poem describing the laments of a devotee for his not being able to offer his services to Kṛishṇa personally. By Rúpa Gośvámí.

Beginning. त्वं रूपमञ्जरि सखि प्रथिता पुरेऽस्मिन्
पुंसः परस्य वदनं न हि पश्यसीति।
विम्बाधरे चतमनागतभर्त्तृकाया
यत्ते व्यधायि किमु तत् शुकपुङ्गवेन॥ इत्यादि।

End. अयि प्रणयशालिनि प्रणयपुष्टदास्याश्रये
प्रकाममतिरोदनैः प्र+र दुःखदग्धात्मना ।
विलापकुसुमाञ्जलिर्हृदि निधाय पादाम्बुजे
मया तव समर्पितस्तव तनोतु तुष्टिं मनाक् ॥

Colophon. इति श्रीमद्रूपगोस्वामिना विरचितो विलापकुसुमाञ्जलिः सम्पूर्णः ।

विषयः । साक्षात् श्रीकृष्णसेवनाशंसया कस्यचिद् भक्तस्य मनोराज्यविजृम्भनमिदं ।

No. 2955. कृष्णकर्णामृतव्याख्या । Substance, country-made paper, 14 × 5 inches. Folia, 26. Lines, 9 on a page. Extent, 1,228 ślokas. Character, Bengali. Date, ? Place of deposit, Jayadeva Gráma, Zillá Vírabhúma, Brahmacháris' Maṭha. Appearance, fresh. Prose. Correct.

Kṛishṇakarṇámṛita-vyákhyá. A gloss on Liláśuka's poem entitled *Kṛishṇakarṇámṛita*. By Vṛindabanadása.

Beginning. यद्भावे भावितधियः प्रणयोऽथ वाचं
मुद्रापि दुर्गमतमा मुनिपुङ्गवानां ।
रासीत्सुकं मदनमोहनमच्युतं तं
राधासमेधितरसोल्लसितं नतोस्मि ॥
कृपासुधासरिद्यस्य विश्वमाप्लावयत्यपि ।
नीचगेव सदा भाति तं श्रीचैतन्यमाश्रये ॥
वसन्तो कृष्णमाधुर्य्यकेलिसौन्दर्य्यसम्पदं ।
केश्चिन्न भावज्ञा सम्यग्ज्ञेया लीला शुकस्य गीः ॥
मन्दोऽपि कश्चित् श्रीरूपपदाम्भोजमधून्मदः ।
कृष्णकर्णामृतव्याख्यां विवृणोति यथामति ॥ इत्यादि ।

End. अतस्त्रिभुवनकमनीयं तदिदं यन्नेत्रगोचरमित्यहो भाग्यमिति भाव इति ।

Colophon. इति श्रीवृन्दावनदासकृता कृष्णकर्णामृतव्याख्या ।

विषयः । लीलाशुककृतकृष्णकर्णामृताभिधानकाव्यस्य व्याख्यानं ।

No. 2956. कालीतत्त्वसुधासिन्धुः । Substance, country-made yellow paper, 21 × 5 inches. Folia, 230. Lines, 12 on a page. Extent, 13,972 ślokas. Character, Bengali. Date, Sk. 1774. Place of deposit, Siuḍi, Zillá Vírabhúma, Kuladánanda Mukhopádhyáya. Appearance, fresh. Prose and verse. Correct.

Kálítattva-sudhásindhu. An elaborate work on the worship of Kálí, compiled from the Tantras. By Kálíprasáda Kávyachanchu.

Beginning. गुरुकृष्णभवानीशगणेशब्रह्मभास्करान् ।
अभेदरूपान् वन्देऽहं धर्म्मकामार्थमोक्षदान् ॥
या वृन्दारकवृन्दवन्द्यजननी काली करालानना ।
भक्ताभीष्टविधायिनी हरहृदम्भोजे सदाह्लादिनी ॥
भक्तानां भवभीमभीतिहरणी दैत्येन्द्रसंहारिणी ।
तत्पादाब्जयुगामृतं पिबतु मच्चेतश्चकोरः सदा ॥
नत्वा कालीपदं कालीप्रसादेन द्विजन्मना ।
कालीतत्त्वसुधासिन्धुस्तन्यते ज्ञानहेतवे ॥
कालीतत्त्वसुधाम्बुधाविह सदा योगीन्द्रवृन्दारकैः ।
सान्द्रानन्दसुधारसः सहृदयैरास्वाद्य सम्पीयतां ॥
ये केचित् पिशुना विदूषणपराः कल्माषबुद्ध्यापि चेत् ।
दृष्ट्वामीममहो तथापि सुखदास्तेषां स्वशक्तेरसौ ॥ इत्यादि ।

End. व्योमस्थं तालजङ्घास्थं विन्दुनादविभूषितं । ह्रूँ० ।
ॐ तत्सत् ॐ अन्नपूर्णायै नमः ।

Colophon. इति स्फुलीयमुख्यकुलोद्भवविरचिताचिन्त्यश्रीचण्डीचरणाश्रितश्रीचण्डी-चरणाम्बुजमधुमधुपायितचेतःश्रीकालीप्रसादकाव्यचञ्चुविरचिते कालीतत्त्वसुधासिन्धौ द्वात्रिंशत्तरङ्गः समाप्तः ॥

वेदाब्धिसिन्धुचन्द्राङ्के माघे दिनचतुष्टये ।
समाप्तिमगमद्ग्रन्थः कालीतत्त्वसुधार्णवः ॥
व्यलेखि वङ्गयत्नेन पद्मलोचनशर्म्मणा ।
काश्यां सुरधुनीतीरे स्थित्वा सूर्य्यजवासरे ॥

विषयः । १प्रथमतरङ्गे,—भूमिकाकथनं । तरङ्गनियमः । पशुलक्षणं । आस्थालक्षणादिकं । दीक्षाशब्दनिर्व्वचनं । गुरुं विना पुस्तकस्थमन्त्रग्रहणे दोषः । दीक्षाया अभावे दोषः । अगुरादिभ्यो मन्त्रग्रहणे दोषः । सिद्धमन्त्रे दोषाभावः । सिद्धमन्त्रनिरूपणं । निषिद्धगुरोर्मन्त्रग्रहणे मन्त्रत्यागः प्रायश्चित्तञ्च । स्वप्नलब्धमन्त्रसंस्कारः । निषिद्धप्रसिद्धलक्षणादियुक्तगुरुनिरूपणं । मन्त्रविशेषे गुरुविशेषः । पञ्चादिमन्त्रभेदे गुरुगोचरमाहात्म्यं । गुरुमाहात्म्यादिकथनं । गुरुशब्दार्थकथनं । शिष्यलक्षणादिकं । ब्राह्मणस्य शूद्रशिष्यकरणे शूद्रादिमन्त्रग्रहणे च दोषकथनं । स्त्रीशूद्रयोः प्रणवस्वाहायुक्तमन्त्रदानविचारः । कलावागमोक्तदीक्षावश्यकता । तन्त्रादिशास्त्रे हेतुवाद-संशय—निन्दादिकरणे दोषकथनं । तन्त्रतद्वक्तृप्रशंसा । तन्त्रागमशब्दयोर्व्युत्पत्तिकथनं । २, ३, ४र्थे

तरङ्गे,—निराकारस्य ब्रह्मणः साकारत्वनिरूपणं। शक्त्यादीनामभेदनिरूपणं। द्वात्रिंशदक्षर-नामार्थकथनं। दक्षिणापदव्युत्पत्तिः। कालीमन्त्रप्रशंसा। दक्षिणकाली-सिद्धकालीप्रभृतीनां मन्त्रकथनं। वीरभावलक्षणं। पशुभावलक्षणं। दिव्यादिभावनिरूपणं। सप्तविधाचारनिरूपणं। कलौ पशुभावप्राशस्त्यं। प्रतिनिधिद्रव्यनिरूपणं। पशुभावादौ पूजाकालव्यवस्था। पूजाधिकारिनिरूपणं। पुरोहितप्रतिनिधिनिषेधः। पशुभावेऽपि बलिदानप्राशस्त्यं। विष्णवे मांसदानविधानं। अवैधहिंसायां दोषः। पूजाधारप्रतिमादिनिरूपणं। पुष्यचन्द्रयोः पूजनं प्राणप्रतिष्ठानिषेधः। ५, ६, ७, ८, ९म तरङ्गे,—कालीतारादिविषये चक्रादिविचाराभावकथनं। अकथह—ऋणिधनि—नक्षत्रराशि-कुलाकुल-हर-अकडम-षट्पद-वर्गचक्रनिरूपणं। दीक्षाकालस्थानादिकथनं। सप्तपरिधानप्रकारः। मन्त्रशब्दव्युत्पत्तिः। षट्चक्रविधिः। दीक्षा-प्रयोगः। कलसप्रमाणं। कलसशब्दनिरुक्तिः। सर्व्वौषधिः। नवरत्नानि। पञ्चपल्लवाः। उपदेशः। विशेषकुलदीक्षा। स्वकुलदीक्षा। मन्त्रस्य षट्साधनप्रकाराः। मन्त्रस्य दशसंस्काराः। मातृका-यन्त्रं। कुलीनानां संस्कारप्रयोगः। मालाविधानं। अक्षमालोत्पत्तिः। वर्णमालोत्पत्तिः। तज्ज-पप्रकारः। करमालाविधानं। विष्णुविषये विशेषादिकथनं। गुटिकानिर्म्माणं। अक्षतादिना संख्यानिषेधः। महाशङ्खमालाविधिः। मणिनियमः। मुखपुच्छनियमः। शोधनविधिः। गन्धा-ष्टकप्रभेदः। जपप्रकारः। मालासंस्कारः। पञ्चगव्यकथनं। पुरश्चरणलक्षणं। तत्स्थानं। कूर्म्म-चक्रं। भक्ष्यादिनियमः। पुरश्चरणे भोजनपरिमाणं। भोजनपात्रं। जपस्नानादिनियमः। तर्पणहोमाद्यनुकल्पकथनं। सावित्री गायत्री। तज्जपप्रकारः। वैदिकगायत्रीजपे मालाविधानं। घटस्थापनप्रयोगः। १०; ११, १२, १३, १४श तरङ्गे,—वीरपुरश्चरणविधिः। तत्प्रयोगः। ग्रहपूजाविधिः। ग्रहाणां वर्णभेदः। नवग्रहहोमकाष्ठनिरूपणं। ग्रहकवचं। कुमारीपूजास्थान-क्रमोपचारदानक्रमनिरूपणं। तत्प्रयोगः। ग्रहणपुरश्चरणविधिः। ग्रस्तास्ते ग्रस्तोदये वा दीक्षापु-रश्चरणयोर्निषेधः। सूर्य्योदयास्तपुरश्चरणविधिः। एवं चन्द्रस्य। राशि-वार-तिथि-नक्षत्र-योग-करणपुरश्चरणविधिः। संक्रान्तिपुरश्चरणं। शरत्कालपुरश्चरणं। जपरहस्यं। मुखशोधनं। कुल्लुकामन्त्रादिकथनं। सेतुप्रकरणं। तत्साधनादिप्रयोगः। महासेतुसाधनादिप्रकरणं। निर्व्वा-णसाधन-तत्प्रयोगः। मन्त्रार्थचैतन्यं। प्राणयोगः। दीपनी। अशौचभङ्गमन्त्रकथनं। मन्त्रशि-खा। षड़ध्वसन्न्यासकथनं। मन्त्रस्य अमृतीकरणं। सप्तच्छदाप्रयोगः। मन्त्रस्य निद्राभङ्गः। आद्या-या एकाक्षरमन्त्रप्रयोगः। रहस्यान्तरप्रयोगः। मन्त्रसिद्ध्युपायः। अकारादिवर्णानां ध्यानं। मन्त्रशुद्धिप्रयोगः। योनिमण्डलध्यानं। ककारतत्त्वभावना। प्रफुल्लवीजध्यानं। मन्त्रस्थानध्यानं। मन्त्रध्यानं। कालीवीजध्यानं। श्यामाया द्वाविंशाक्षरमन्त्रध्यानं। एवं तारायाः। पञ्चोपचार-दानादिमुद्रा। कुलवृक्षनिरूपणं। १५, १६, १७, १८, १९, २०श तरङ्गे,—प्रातः कृत्यं। शौच-विधिः। दन्तकाष्ठपरिमाणकथनादिकं। गुरुध्यान-स्तोत्र-कवचादिकथनं। चौरमन्त्रकथनं। स्नानविधिः। गङ्गामाहात्म्यादिकं। तान्त्रिके कर्म्मणि सौरोल्लेखः। तिलकविधिः। रुद्राक्षधा-

9

रणं। रुद्राक्षसंस्कारः। सन्ध्याप्रयोगादिकथनं। पार्थिवशिवपूजाविधिः। मृत्तिकाप्रमाणं। बिल्वपत्रदानादिक्रमः। बिल्वपत्रचयननिषिद्धदिनकथनं। प्रणाममन्त्रः। पुष्पादिदानफलं। नृत्यवाद्यविधानं। प्रदक्षिणफलं। निर्म्माल्यधारणफलं। पूजाप्रयोगः। बिल्ववृक्षस्य उत्पत्तिः। बिल्वमूले मृत्युफलं। पुष्पप्रतिनिधिः। वासुदेवविषये रक्तचन्दनदानफलं। तुलसीचयननिषिद्धदिनं। वीरकल्पे विशेषपुष्पकथनं। २१, २०, २३श तरङ्गे,—श्यामाया नित्यपूजाविधिः। पूजास्थाननिरूपणं। आसननिरूपणं। भूतशुद्ध्यादिनिरूपणं। प्राणप्रतिष्ठा। मातृकादिन्यासाः। प्राणायामः। ध्यानान्तरकथनं। अन्तर्यजनविधिः। यन्त्रनिर्म्माणाधारादिकथनं। श्रीचक्रनाशे प्रायश्चित्तं। अर्घ्यपात्रपरिमाणं। तत्र क्रमः। कामकलानिरूपणं। लेलिहानमुद्रादिकथनं। अष्टादशोपचारादिकथनं। तत्तन्मन्त्राः। गन्धदाने अङ्गुलिनियमः। पाद्यादिनिर्म्माणक्रमः। निर्व्विकल्पकमर्घ्यं। मधुपर्कपरिमाणादिकथनं। षोड़शाङ्गादिधूपनिर्म्माणं। नैवेद्यपात्रादिनिरूपणं। ब्राह्म्यादिमातृकाणां ध्यानं। लोकपालमन्त्राः। अस्त्रमन्त्राः। महाकालध्यानं। तर्पणविधानं। नवदीपविधिः। आरात्रिकविधिः। नित्यहोमविधिः। विष्णुविषये नित्यहोमः। माषभक्तबलिविधिः। नित्यजपविधानं। प्रणामविधिः। आत्मसमर्पणं। संहारमुद्रा। प्रार्थनामुद्रा। नैवेद्यमाहात्म्यं। पादोदकमाहात्म्यं। श्यामापूजाप्रयोगः। बलिदानप्रकरणं। शिरोदानविधिः। रुधिरदानविधिः। स्वगात्ररुधिरदानं। कुण्डविधिः। स्रुकस्रुवविधिः। २४, २५, २६, २७, २८, २९, ३०, ३१, ३२श तरङ्गे,—होमविधिः। स्थण्डिलनिर्म्माणं। होमद्रव्यप्रमाणं। अभिषेकविधिः। तत्फलं। पूर्णाभिषेके विशेषकथनं। संविदासाधनपरिपाटी। शक्तिं विना अर्च्चनपाने दोषः। शक्तयः। वर्ज्जनीयाः शक्तयः। विजयापाने कालनियमः। वीराणां स्नानसन्ध्योपासनतर्पणादिनिरूपणं। युवतीवेशधारणविधिः। सुधाघटस्थापनं। कारणस्य त्रैविध्यकथनं। वह्न्यादीनां कलानिरूपणं। द्रव्यशोधनं। शापविमोचनं। हंसमन्त्रः। पात्रपरिमाणं। असंस्कृतकारणे दोषः। कर्पूरादिस्तोत्रं। अन्यविधस्तोत्रं। कवचं। सहस्रनाम-शतनामादिस्तोत्रं। भूतलिपिः। अस्याः प्राणप्रतिष्ठादिप्रयोगः। लतासाधनप्रयोगः। शक्तिशुद्धिः। पञ्चतत्त्वानि। कुण्डगोलग्रहणादिविधिः। दूतीयजनं। कुलनायिकाः। चितासाधनं। शवसाधनं। तत्र स्थानासनादिनिरूपणं। एतत्प्रयोगः। दुर्गानाममाहात्म्यं। वर्णकोषः। वीजकोषकीर्त्तनञ्च।

No. 2957. ज्ञानसङ्कुली। Substance, country-made paper, 19 × 4 inches. Folia, 12. Lines, 9 on a page. Extent, 297 ślokas. Character, Bengali. Date, ? Place of deposit, Siuḍi, Zillá Vírabhúma, Kuladánanda Mukhopádhyáya. Appearance, old. Verse. Correct.

Jnána-sankulí. A treatise on essoteric Yoga. Apparently a Tantra.

Beginning नमोऽस्मात्यक्तपुरुषं परं ब्रह्म च सर्व्वदा ।
शब्दस्पर्शरूपरसगन्धाकाशविवर्ज्जितं ॥
सात्त्विकानान्तु चिह्नानामेतद्भेदस्य तत्त्वतः ।
सृष्टिपालनसंहारं तत्कृतं त्रितयात्मकं ॥
प्रथमं सर्व्वलोकानां सर्व्वराज्यसुखप्रदं ।
प्राचीनावस्थमव्यक्तं शिवाकारन्तनामयं ॥
कैलासशिखरासीनं देवदेवं जगद्गुरुं ।
पृच्छत्यस्मिन्नुमा देवी ब्रूहि ज्ञानं महेश्वर ॥ इत्यादि ।

End. वदन्ति सारसर्व्वस्वमुमाग्रे शिवभाषितं ।
सिद्ध्यन्ति सर्व्वयोगीनां नात्र कार्य्या विचारणा ।

Colophon. इति योगशास्त्रे उमामाहेश्वरसंवादे ज्ञानसङ्कुलाग्रन्थः समाप्तः ।

विषयः । चतुर्द्दशविद्यानिरूपणं । अध्यात्मविद्यानिरूपणं । शाम्भवीविद्याप्रशंसा । खेचरीमुद्राकथनं । शाम्भवामुद्राकथनं । त्रिदण्डि-बौद्ध-चार्व्वाकाणां मतकीर्त्तनं । क्षित्यादिपञ्चभूतानां प्रत्येकं पञ्चगुणनिरूपणं । पञ्चतत्त्वेभ्यः सृष्टिप्रक्रिया । निराकारभजनावश्यकता । पञ्चशरीरधातुकथनं । शिव-शक्तिनिरूपणं । त्रिधाशक्तिस्थानकथनं । षट्चक्रस्थानं । देहस्थदशविधवायुकथनं । नाड़ीभेदनिरूपणं । त्रिदेव-त्रिभाव-त्रिगुणकारणकथनं । ज्ञान-दयादीनां पितृप्रसूत्वादिना उल्लेखनं । ब्रह्मज्ञानस्वरूपनिरूपण । यतिधर्म्मकीर्त्तनं । योगनियमकथनं ।

No. 2958. दायभागव्यवस्था । Substance, country-made paper, 14 × 4 inches. Folia, 10. Lines, 7 on a page. Extent, 258 ślokas. Character, Bengali. Date, ? Place of deposit, Siuḍi, Zillá Vírabhúma, Kuladánanda Mukhopádhyáya. Appearance, old. Prose. Correct.

Dáyabhága-vyavasthá. A *Responsa prudentum* on the Dáyabhága or the law of inheritance. By Sárvabhauma.

Beginning. अथ दायभागव्यवस्था । पित्राद्यनन्तरं तद्धने पुत्रादिभिः सम्बन्धाधीनो विभागः क्रियते । इत्यादि ।

End. शाकेऽग्निमङ्गलहरास्यकलानिधाने
श्रीराधवावनिपतेर्बुधवत्सलस्य ।
प्रीत्यर्थमाशु रचिते + + दायभाग
+ + व्यवस्थितिमयोऽष्टम उत्तरङ्गः ॥

भिन्नदेशागतानामित्यविरुद्धमिति ।
धीरेषु साञ्जलिपुटं विनिवेदनं मे
दृष्ट्वादृशोऽत्र गुणतां प्रथयन्तु दोषे ।
यन्निर्णयान्तनहतः पथि मे प्रयाणं
तस्मादियं चपलतापि न दूषणीया ॥
ये ग्रन्थनिर्म्मितिपरिश्रमदूनचित्ता
ताद्दङ्मणोपिजनकर्म्मणि चानुरक्ताः ।
तेषाममल्परह्नदां मथुरेशतर्क-
पञ्चाननात्मकहतिर्मुदमातनोतु ॥

Colophon. इति सकलहितार्थं वन्द्यवंशावतंसः
हतवमतिरमुष्मिन् विश्रुतोल्लासमाजे ।
सकलमुनिमतैर्यं निर्म्ममे सार्व्वभौमः
स खलु रुचिरबन्धो ग्रन्थराजः समाप्तः ।

विषयः । पितृकृतविभागव्यवस्था । उपरते पितरि भागव्यवस्था । विभागानधिकारिणः । विभाज्याविभाज्ययोर्व्यवस्था । वित्तविभागः । चिरप्रोषितवंशस्थागतस्य विभागः । स्त्रीधनादिनिरूपणञ्च ।

No. 2959 कालीसहस्रनामस्तोत्रम् । Substance, country-made yellow paper, 15 × 5 inches. Folia, 11. Lines, 8 on a page. Extent, 220 ślokas. Character, Bengali. Date, ? Place of deposit, Siudi, Zillá Vírabhúma, Kuladánanda Mukhopádhyáya. Appearance, fresh. Verse. Correct.

Kálí-sahasranáma-stotra. A complete copy of the hymn noticed under No. 409 (Vol. I, p. 233). It is a part of the Kálíkula-sarvasva Tantra.

श्रीशिव उवाच ।

Beginning. कथितोऽयं महामन्त्रः सर्व्वमन्त्रोत्तमोत्तमः ।
यमासाद्य मया प्राप्तमैश्वर्य्यपदमुत्तमं ॥
कथितेयं महाविद्या सर्व्वविद्यासूनुत्तमा । इत्यादि ।

End. स्तोत्रं पठेदेतदनन्तपुण्यं कालीपदाम्भोजपरो मनुष्यः ।
विधानपूजाफलमस्य सम्यक् प्राप्नोति सम्पूर्णमनोरथोऽसौ ॥
मुक्ताः श्रीचरणारविन्दविमुखाः स्वर्गामिनो भोगिनो
ब्रह्मोपेन्द्रशिवाम्बिकार्च्चनसुखं नो केऽपि संलेभिरे ।

श्रीमत्सद्गुरुभक्तिपूर्व्वकमहाकालीपदाध्यायिनो
मुक्तिर्मूर्त्तिमती स्वयं स्तुतिपरा भुक्तिः करस्थायिनी ॥

Colophon. इति कालीकुलसर्व्वस्वे शिवरामसंवादे कालीसहस्रनामस्तोत्रं समाप्तं ।

विषयः । कालिकायाः स्तुतिः ।

No. 2960. उत्पत्तितन्त्रम् । Substance, country-made paper, 14 × 3 inches. Folia, 57. Lines, 7 on a page. Extent, 642 ślokas. Character, Bengali. Date, ? Place of deposit, Siuḍi, Zillá Vírabhúma, Kuladánanda Mukhopádhyáya. Appearance, old. Verse. Correct.

Utpatti-tantra. An original Tantra treating both of the S'ákta and the Vaishṇava rituals.

Beginning. स्वघो + माद्यां जगतां विधात्रीं
कालीं महाकालकृताकृताङ्गीं ।
ध्यायेच्छिवां शङ्करमेव नित्यं
गौरीधृताङ्गार्द्धमहेशमाद्यं ॥
श्रीदेव्युवाच ।
यदुक्तं शाम्भवीतन्त्रे उत्पत्तौ यन्मया श्रुतं ।
इदानीं वद देवेश साधनं कलिसम्मतं ॥ इत्यादि ।

End. एतत्ते कथितं तुभ्यं लिङ्गचिह्नं महेशितुः ।
एकेनैव कृतार्थः स्याद्‌बहुभिः किम् सुव्रते ।

Colophon. इति उत्पत्तितन्त्रे त्रिशतैकाशीतिपटलः समाप्तः ।

विषयः । दिव्यवीरभावप्रशंसा । बलियोग्यपशुनिरूपणं । तत्र नर-छाग-महिष-मेष-शूकर-शशक-शल्लकि-गोधा-खड्गि-कूर्म्म-वानर-खराश्व-गज-विहङ्गमादिविधानं । असंस्कृत-सुरापाने दोषकथनं । मातृयोनिं विना यवनान्यादियोनिगमनेऽपि कौलिकस्य न दोष इति कथनं । भावलक्षणं । कलौ सुरापानेन भारतवर्षे वर्णभ्रंशकथनं ।

म्लेच्छराजाधिकारे कलिस्वभावकथनं । कलौ पशुभावविधानं । मद्यपानादिनिषेधः । एतदनुकल्पोऽपि निषिद्ध इति कीर्त्तनं । करमालाप्रशंसा । कामरूपे विष्णोः शवसाधनवृत्तान्त-कथनं । साधारणकलिधर्म्मकथनं । महाकालमहाकाल्योरेकात्मभावकथनं । शिवपूजाविधिः । शिवस्य परब्रह्मत्वकथनं । आत्मसमर्पणप्रकारः । वाणलिङ्गे आवाहनादिकं नास्तीतिकथनं । शिवनिर्म्माल्यजलपानादिफलश्रुतिः । प्रातःकृत्यादिनिरूपणं । शिवनिन्दादिकरणे दोषकथनं । दुर्गापूजामाहात्म्यं । अर्घ्यदानविधिः । गङ्गाजले देवतावाहनं नास्तीतिकथनं । ध्यानतत्त्वक-

यनं। विष्णुतत्त्वकथनं। दशावतारवर्णनं। म्लेच्छराज्यकालवर्णनं। गौड़देशे गर्गपुरे कल्क्यवतारकथनं। तस्य विवाहादिवर्णनञ्च। शिवतत्त्वकथनं। वाञ्छासुडिनिरूपणं। जगन्नाथप्रमादमाहात्म्यं। परब्रह्मस्वरूपवर्णनं। ब्रह्माण्डोत्पत्तिकथनं। गङ्गामाहात्म्यादिकथनं। ब्रह्मादीनां जन्मविवाहादिकथनं। पञ्चविधमुक्तिनिरूपणं। गोलोकवर्णनं। शिवलोकमत्यलोकादिवर्णनं। कालिकाया निर्व्वाणदातृत्वकथनं। वाणलिङ्गप्रमाणं। इति (तत्र पटलसंख्याया वैषम्यतया तदुल्लेखो न कृतः।)

No. 2961. कुलोड्डीशमहातन्त्रम्। Substance, country-made paper. 16 × 4½ inches. Folia, 50. Lines, 6 on a page. Extent, 1,237 ślokas. Character, Bengali. Date, ? Place of deposit, Siuḍi, Zillá Vírabhúma, Kuladánanda Mukhopádhyáya. Appearance, fresh. Prose and verse. Correct.

Kuloḍḍíśa-mahátantra. An original Tantra, treating of the usual Sákta rituals, observances and incantations.

देव्युवाच।

Beginning. चतुःषष्टिश्च तन्त्राणि त्वद्वक्त्रान्निःसृतानि च।
अन्यान्यपि च तन्त्राणि श्रुतानि विविधानि च॥
जामलानि च सर्व्वाणि संहिता विविधास्तथा।
श्रुता हि देवदेवेश श्रीविद्या या मया प्रभो॥
भाव+ब्रह्मणो नाथ तन्त्राण्यपि च संहिताः।
तापनीयानि कल्पानि शिवादीनां तथैव च॥ इत्यादि।

End. कर्म्मयोगमिमं देवि ज्ञात्वा कर्म्माणि साधयेत्।
एतदभ्यासतो योगी सिद्धो भवति नान्यथा॥

Colophon. इति श्रीकुलोड्डीशे महातन्त्रे चतुर्थः पटलः समाप्तः। समाप्तमिदं महातन्त्रं।

विषयः। १प्रथमपटले,—पञ्चभूताधिष्ठातृदेवताकथनं। पञ्चमशक्तिनिरूपणं। पञ्चमशक्तेर्दीक्षाभेदतो वैष्णवशैवादिभेदकथनं। तस्या ब्रह्मरूपत्वकथनं। तदुपासनाप्रकारः। पञ्चकूटनिरूपणं। स्वप्नावतीविद्याकथनं। तत्साधनं। गन्धर्व्वविद्या। ब्रह्मविद्यायाः स्वरूपादिकथनं। नटी-कापालिक्याद्यष्टविधनायिकानिरूपणं। तत्र आकर्षणादिसाधनप्रकारः। कुण्डोद्भवद्रव्यलक्षणं। गोलोद्भवद्रव्यलक्षणञ्च। ब्रह्माण्डस्य शिवशक्त्यात्मकत्वकथनं। उपभोगेन मुक्तिलाभनिरूपणं। सुखमात्रस्य मोक्षत्वं। दुःखमात्रस्य नरकत्वकथनञ्च। समयाचारकथनं। कुलाचारकथनं। सुराशापविमोचनं। २,३ये,—पञ्चपञ्चाक्षरीविद्या। पञ्चमविद्या-गायत्र्यादिकथनं। भौतिकमनोमयादिविविधशरीरकथनं। मुद्रानामनिरुक्तं। मुद्रालक्षणादिकथनं।

षोड़शमहाविद्यानिरूपणं। कर्म्मसिद्धिकथनं। पीठनिरूपणं। ध्यानयोगकथनं। कर्म्मयोगकथनं। ४र्थ,—मन्त्रग्रामादिसाधनप्रकारः। आकर्षणवशीकरणादौ कालादिनियमकीर्त्तनं। सर्व्वकर्म्मसु होमावश्यकता। होमद्रव्यादिनिरूपणं। वशीकरणादौ पुष्पविशेषनियमकथनं। मानपरिमाषा। गुरुतोषणविधानं।

No. 2962. कालीतत्त्वामृतम्। Substance, country-made yellow paper, 22 × 5½ inches. Folia, 64. Lines, 7 on a page. Extent, 1,680 ślokas. Character, Bengali. Date, ? Place of deposit, Siuḍi, Zillá Vírabhúma, Kuladánanda Mukhopádhyáya. Appearance, new. Prose and verse. Correct.

Kálítattvámṛita. Tantric rituals. The codex is incomplete.

Beginning. नत्वा गुरुपदद्वन्द्वं बलभद्रेण धीमता।
कालीतत्त्वामृतं नाम तन्यते ज्ञानहेतवे॥
सहस्रारे पद्मे परमशिवगेहेऽतिकुहरे
मनोहंसस्त्रिचान्तरविवरमार्गे गतिवशात्।
तमःशान्ते कान्ते परिणतशरच्चन्द्रनिलये
परे हंसद्वन्द्वे गुरुचरणपद्मे विहरतु॥ इत्यादि।

End. आदौ व्याहृतिभिः पश्चाद्वह्निमन्त्रञ्च वर्त्तुलं। चित्पिङ्गल हन हन दह दह——

Colophon. इतः परं खण्डितं।

विषयः। पशोरग्रे एतत्तन्त्रशास्त्रप्रसङ्गादिनिषेधः। प्रतिमादौ शिलाबुद्धौ दोषनिरूपणं। श्रवणमनननिदिध्यासननिरूपणं। अदीक्षितस्य तन्त्रशास्त्रे नाधिकार इति निरूपणं। अत्र दोषनिर्द्देशः। विहिताविहितगुरुनिरूपणं। संस्कारकथनं। दिव्यवीरपशुभेदैर्गुरोर्दीक्षाविधानं। कौलिकानां पशुमन्त्रग्रहणे प्रायश्चित्तकथनं। कुलस्वरूपलक्षणं। वैष्णवादिमन्त्रं विहाय शक्तिमन्त्रग्रहणावश्यकता। तत्र कारणकथनं। विरुद्धवादनिरसनञ्च। कलौ काल्युपासनाकर्त्तव्यता। आगमोक्तदीक्षाग्रहणानन्तरं पुराणविधिना कर्म्मानुष्ठाने फलाभावकथनं। गुरुशिष्यलक्षणं। स्त्रीशूद्रेभ्यो मन्त्रदानविधिः। गुरौ शिष्यभक्तिः। दीक्षाविधानं। इति १मलहरी। चक्रविचारः। अकथह-कडिधनिचक्रादीनां संस्थाननिरूपणं। नक्षत्रचक्रं। नाड़ीनक्षत्रचक्रं। हरचक्रं। अकडमचक्रं। वर्गचक्रं। षट्पदचक्रं। अष्टवर्गचक्रं। दीक्षाकालः। वारतिथ्यादिनियमः। महाविद्यासु कालादिनियमाभावः। दीक्षाप्रयोगः। स्वकुलदीक्षाविधिः। मन्त्रस्य सुप्तजागरादिषड्विधसाधनप्रकारः। २या लहरी। जननजीवनादिदशविधमन्त्रसंस्काराः। कुलौ

नानां संस्कारे विशेषकथनं। यन्त्रसंस्कारः। मालासंस्कारः। मालानां परिमाणनियमः। ग्रथनादिक्रमः। शोधनप्रयोगः। निर्व्विकारचित्तानां धीराणां तत्र तत्र विशेषः। महाशङ्खमालाविधानादिकं। करमालानिरूपणं। ३या लहरी। पुरश्चरणावश्यकता। पुरश्चरणक्रमः। तत्र भक्ष्यादिनियमः। स्नानादिनियमः। मन्त्रस्य सूतकादिदोषनिरूपणं। दीपनीनिरूपणं। मन्त्रशिखा। षड़ध्वषड्वर्णभावनं। मानसोपांशुवाचिकानां लक्षणं। होमादिविधिः। अभिषेककथनं। पुरश्चरणपद्धतिः। इति ४र्थी लहरी। स्वतन्त्रतन्त्रादिमतसाधनं। सिद्धिप्रकारः। कुण्डविधिः। वास्तुनागविचारः। कुण्डदोषादिनिरूपणं। होमनियमकथनञ्च।

No. 2963. कालीविलासतन्त्रम्। Substance, country-made paper, 15 × 3½ inches. Folia, 37. Lines, 7—8 on a page. Extent, 925 ślokas. Character, Bengali. Date, ? Place of deposit, Siuḍi, Zillá Vírabhúma, Kuladánanda Mukhopádhyáya. Appearance, old. Verse. Correct.

Kálívilása-tantra. A modern Tantra treating of the usual S'ákta Tantric rites and ceremonies.

Beginning. श्रीदेव्युवाच।

देवदेव महादेव संसारार्णवतारक।
इच्छाम्येकं महाभाग कृपया कथय प्रभो॥
कानि कानि महाभाग जम्बूद्वीपस्य भारते।
शूद्रस्य सम्मतं तन्त्रं कृपया वद साम्प्रतं॥
सद्योजात उवाच।
साधु पृष्टं सुराराध्ये धन्यासि प्राणवल्लभे। इत्यादि।

End. इत्युक्त्वा प्रययौ शीघ्रं कैलासं शिवनन्दगः।

Colophon. इति शिवभाषितं कालीविलासतन्त्रं त्रिंशत्पटलेन समाप्तं।

विषयः। १प्रथमपटले,—शिवाशिवसंवादः। तन्त्रनामनिर्व्वचनं। शूद्रस्य प्रणवस्वाहोच्चारणादिनिषेधः। २ये,—शूद्रजातिषु प्रशस्तमन्त्रादिनिरूपणं। ३ये,—स्वाहाप्रणवयुक्तकवचपाठादौ शूद्रस्याधिकारः। तस्य वैश्यत्वप्राप्तिकथनञ्च। ४र्थे,—कलौ पशुभावकर्त्तव्यता। दिव्यवीरभावादिनिषेधः। ५मे,—कालीशतनामस्तोत्रं। त्रैलोक्यमोहनाभिधानकालीकवचं। ६ष्ठे,—दीक्षाकालकथनं। दिव्यादिभावलक्षणं। परशुराम-रावणादीनां क्रमेण वीरपश्वादिभावकथनं। ७मे,—कलौ सम्विदापाननियमः। कांस्यपात्रस्थनारिकेलोदकादीनां मद्यतुल्यत्वकथनं। कलौ अन्तःशाक्तत्वबहिःशैवत्वादिकथनं। तत्र वैष्णवाचारयुक्तेन मन्त्राभ्यासे सिद्धिकथनादि-

कं। ८,—प्राणायामलक्षणादिकथनं। ९, —सङ्केतस्तोत्रं। शिवविष्णोरभेदः। तयोर्भेदज्ञाने दोषः। १०,—भुवनेश्वरीशतनामस्तोत्रं। पीत्वा पीत्वा पुनः पीत्वा पुनः पतति भूतले इत्यादि-वचनानां कलौतरपरत्वं। ११,—त्रिपुरासुन्दरीशतनामस्तोत्रं। १२,—ताराशतनामस्तोत्रं। १३ —भैरवीशतनामस्तोत्रं। १४,—कलिसम्मतसामान्यपूजाविधानं। १५,—कलिसम्मतमोहन-वशीकरणकथनं। अपभ्रंशभाषा (वङ्गभाषा) विद्यानिरूपणं। १६,—वगलाशतनामस्तोत्रं। १७,—मातङ्गीशतनामस्तोत्रं। १८,—कार्त्तिकध्यानमन्त्रादिकथनं। जयाविजयादीनां ध्याना-दिकथनं। सिंह-मयूर-मूषिकध्यानादिकथनं। १९,—महिषमन्त्रकथनादिकं। गणेशमन्त्रकथनं। २०,—लक्ष्मीपूजाविधानं। सरस्वतीपूजाविधिः। ब्रह्मपूजा। साविचीपूजा। महिषमर्द्दिनी-पूजाविधिः। २१,—जम्बूद्वीपे महिषमर्द्दिन्या अस्त्रादिनिरूपणं। अन्यद्वीपीयास्त्रनिरूपणं। महिषमर्द्दिन्या ध्यानादिकं। २२,—अस्याः स्वगणनिरूपणं। २३,—कालिकायाः कृष्णमातृत्व-वृत्तान्तकथनं। तस्या ध्यानादिकं। २४,- कृष्णस्य कालिकास्तनपानवृत्तान्तकथनं। कृष्णसमीपे कालिकायाः कामवीजादिकथनं। २५,—ध्यानकथनं। मन्मथसाधनं। पञ्चवीजनिर्णयः। २६,—मायावीजादिसाधनं। रमावीजादिनिरूपणं। २७,—कूर्चध्यानादिकथनं। स्वाहा-पदादिनिरूपणं। शिञ्जिनीध्यानादिकं। २८,—शब्दब्रह्मनिरूपणं। कृष्णस्य कालिकां प्रति राधापरिचयजिज्ञासा। तत्कृतकालिकास्तोत्रं। २९,—कामवीजादिलेखनक्रमः। ३०,—स्त्रीवीजलेखनक्रमः। शारदीयपूजाया वोधननिरूपणं। ३१,—दुर्गाया ध्यानभेदकथनं। प्रण-वादिस्वरूपकथनं। ३२,—भावनाप्रकारकथनं। ३३,—यन्त्रस्वरूपकथनं। वीजानां कोणादि-निरूपणं। ३४,—अनुलोमविलोमाभ्यामकारादिचकारान्तजपप्रकारकीर्त्तनं। शिवकृतकालि-कास्तोत्रं। ३५,—कृष्णस्य मुरलीधारणविवरणं। कलौ पुरश्चरण-होमादिकरणप्रतिषेधः। गुरुपूजनेन सर्व्वसिद्धिर्भवतीतिकथनञ्च।

No. 2964. व्यवस्थासंग्रहः। Substance, country-made paper, 13 × 3 inches. Folia, 84. Lines, 6 on a page. Extent, 1,764 ślokas. Character, Bengali. Date, ? Place of deposit, Duvarájapura, Zillá Vírabhúma, Rámasadaya A'chárya. Appearance, old. Prose and verse. Correct.

Vyavasthá-sangraha. *Responsa prudentum* on diverse questions regarding Hindu law and usage. By Maheśa.

Beginning. प्रणम्य गोपालपदारविन्दं
विलोक्य मन्वादिकृतञ्च शास्त्रं।
अवश्यकर्त्तव्यविधानहेतुं
ग्रन्थं महेशो वितनोति धीरः॥

विहितस्य निषिद्धस्य कर्म्मणो ज्ञानकारकः ।
व्यवस्थासंग्रहः सर्व्वैः पण्डितैः परिलिख्यतां ॥ इत्यादि ।

End. ध्यानेन सदृशं नास्ति शोधकं पापकर्म्मणां ।
श्वपाकेनापि भुञ्जानो ध्यायी नैव तु लिप्यते ॥

Colophon. इति व्यवस्थासंग्रहः ।

विषयः । अशौचनिरूपणं । तद्व्यवस्था । यथाकथञ्चिद्दाहे पुनर्द्दाहनिषेधः । प्रेततर्पणविधिः । अशौचान्तदिनकृत्यनिरूपणं । मासिकसपिण्डीकरणविधानं । श्राद्धाधिकारिनिरूपणं । द्रव्यशुद्धिनिरूपणं । त्रिविधमासलक्षणादिनिरूपणं । युग्मादिव्यवस्था । एकोद्दिष्टश्राद्धविधिः । संक्रान्तिनिरूपणादिकं । महाज्यैष्ठ्यादिनिरूपणं । जन्माष्टम्यादिव्यवस्था । दुर्गोत्सवविधिः । नवान्नश्राद्धादिनिरूपणं । अर्द्धोदययोगादिनिरूपणं । युगाद्याव्यवस्था । प्रातःकृत्यादिनिरूपणं । आचमनस्नानतर्पणादिविधानं । पार्थिवशिवपूजनविधानं । तुलसीपत्रचयनादिनियमकथनं । चरणामृतव्यवहारप्रकारकीर्त्तनं । भोजनविधिः । कीदृशी कन्या उद्वाह्या तन्निरूपणादिकं । कन्याविक्रयादिदोषनिरूपणं । देवादिप्रतिष्ठाविधिः । दिव्यव्यवस्था । चौर्य्यादिदण्डविधानं । दायव्यवस्था । प्रायश्चित्तव्यवस्थादिनिरूपणञ्च ।

No. 2965. ज्योतिःसारः । Substance, palm-leaf, 11 × 1⅓ inches. Folia, 108. Lines, 4 on a page. Extent, 2,484 ślokas. Character, Bengali. Date, Sk. 1556. Place of deposit, Duvarájapura, Zillá Vírabhúma, Rámasadaya Ácharya. Appearance, old. Prose and verse. Correct.

Jyotihsára. Astronomy and astrology bearing on Hindu rites, beliefs and domestic ceremonies. By Raghunátha Paṇḍit, son of Kavírája Miśra. There are several works current of this name.

Beginning. तमोनिचयविध्वंसमशीतकिरणत्विषं ।
कमलोदयमानन्दाद्वन्दे + ङ्करं हरिं ॥
मिश्रश्रीकविराजराजपदवीविख्यातकीर्त्तिः पिता
यस्यासीद्गुणवान् गुणाकर इति प्रज्ञावतामग्रणीः ।
सोऽयं श्रीरघुनाथ इत्यभिहितो निर्म्माति यत्नादमुं
ज्योतिःसारमुपायवर्णसनगे १४४४ वर्षे शतघ्नाभुजः ॥
शास्त्राणामुत्तमं शास्त्रं ज्योतिषं नापरं भुवि ।
यत्र यत्नादविज्ञोऽपि सर्व्वज्ञः सुमतिर्भवेत् ॥

शास्त्रप्रशंसा ॥

अप्रदीपा यथा रात्रिरनादित्यं यथा नभः।

तथाऽसांवत्सरो राजा भवत्यन्ध इवाध्वनि ॥ इत्यादि ।

End. इति ब्रह्मसिद्धान्ते चक्रदीपः । चक्रदीपस्य न्यासो यथा ।

Colophon. इति कविराजमिश्रात्मजश्रीरघुनाथपण्डितकृते ज्योतिःसारे त्रयोदशोऽध्यायः । समाप्तश्चायं ग्रन्थः ।

अङ्गनेऽङ्गनिषङ्गसङ्गतशरैर्णाङ्के शशाङ्के गते

घस्रे कार्त्तिकपञ्चमे कुजदिने कृष्णस्य कृष्णे तिथौ ।

ज्योतिःसारसमुद्रपारसमरद्भास्वत्कृपाक्षेपणौ

लब्ध्वा लेखननौकया निजकृते श्रीरामचन्द्रो द्विजः । शकाङ्काः १५५४ ।

विषयः । १अध्याये,—पञ्जिकाक्रमः, तत्र वार-तिथि-नक्षत्र-तदधिप-करण-योग-नन्दा-भद्रा-जया-रिक्ता-सिद्धियोगप्रभृतिकथनं । अशुभनक्षत्रकथनं । देशविशेषे योगव्यवस्था । यम-घण्टादियोगकथनं । तिथिनक्षत्रविशेषे मरणादिफलकथनं । अवमत्र्यहस्पर्शविवेकः । रविसं-क्रान्तिनिरूपणं । विष्टिनिरूपणं । दग्धतिथिकथनं । त्रिपुष्करयोगः । चन्द्रताराबलकथनं । जन्मतारादिनिरूपणं । चन्द्रदोषशान्तिनिरूपणं । २ये,—ग्रहगोचरशुद्धिः । गोचरापवादः । ग्रहशान्तिस्नानं । ग्रहाणां त्रिविधशान्तिकथनं । जन्मनक्षत्रयोगे जन्मतिथिफलं । सर्व्वौषधिक-थनं । दिक्पतिकथनं । लग्नमानबोधः । दिनपञ्जिकागणनप्रकारकीर्त्तनं । ३ये,—राशि-तद-धिपकथनं । ग्रहोच्चस्थानकथनं । मूलत्रिकोणगृहकथनं । नवांशवर्गोत्तमकथनं । त्रिंशांशविवे-कः । षड्वर्गविवेकः । शीर्षोदयादिविवेकः । अरिमित्रादिकथनं । ग्रहाणां दृष्टिनिरूपणं । भाव-विवेकः । स्थानबलनिरूपणं । वर्ष-मास-दिन-काल-होराप्रभृतीनां यथोत्तरमधिकबलित्वं । ग्रहाणां दिक्काल-चेष्टा-बलादिनिरूपणं । अष्टवर्गकथनं । केन्द्रादिनामकथनं । त्रिकोणादि-विवेकः । उपचयविवेकः । उग्रादिसप्तगणनिरूपणं । वारप्रभृतिनिर्णयः । सत्यादियुगसंख्यानि-रूपणं । ४र्थे,—वर्षाधिपादिनिरूपणं । तदानयनादिप्रकारः । आवर्त्तादिमेघनिरूपणं । वृष्टि-लक्षणं । अनावृष्टिलक्षणं । कालाशौचादिकथनं । गुरोरतिचारकथनं । तदपवादः । लुप्तसंव-त्सरकथनं । तदपवादः । वक्रातिचारे ग्रहाणां पूर्व्वापरराशेः फलदातृत्वनिरूपणं । दिग्दा-हादिषु निषिद्धकर्म्मकथनं । मलमासनिर्णयः । समयाशुद्धिः । ५मे,—विवाहकथनं । तत्र जोटनकथनं । नवपञ्चकद्विर्द्वादशकथनं । षडष्टककथनं । प्रीतिषडष्टककथनं । जोटनापवादः । गणकथनं । नाडीशुद्धिः । नाडीयोगादिफलं । नाडीचक्रन्यासः । ग्रहशुद्धिः । कन्याया विवाहे युग्मायुग्मादिव्यवस्था । मार्गज्यैष्ठयोर्विवाहनिषेधापवादः । सिंहमकरस्थगुरोः फलं । दशयोगशु-द्धिः । नक्षत्रपादवर्ज्जनं । चन्द्रवेधकथनं । अस्तपादिवेधकथनं । सप्तशलाकावेधकथनं । एतच्च-क्रन्यासः । पञ्चशलाकचक्र-तन्न्यासः । खर्ज्जूरवेधकथनं । तन्न्यासः । लताचक्रं । पातवेधकथनं ।

चन्द्रशुद्धिः । यामित्रवेधकथनं । वैवाहिकतिथ्यादिनिरूपणं । सुतहिबुकयोगकथनं । गोधूलि-
निरूपणं । हस्तोदकविधिः । लग्नादिक्रमेण कुण्डलीव्यवस्था । नववधूगृहप्रवेशः । द्विरागमनलक्ष-
णादिकथनं । अथ पुरःशुक्रादिदोषापवादः । केशबन्धननिरूपणं । ऋतुनिरूपणं । गर्भा-
धानं । पुंसवनं । पञ्चामृतं । सुखप्रसवोपायकथनं । नामकरणं । निष्क्रमणं । शिशोः प्रथम-
क्षौरं । अन्नप्राशनं । चन्द्रसूर्य्यदर्शनं । भूम्युपवेशनं । चूड़ाकर्म्म । कर्णवेधः । नित्यक्षौरं । विद्या-
रम्भः । अनध्यायकथनं । धनुर्व्विद्यारम्भः । उपनयनं । ६ष्ठे,—हलप्रसारणं । हलचक्रनिरूपणं ।
वृषचक्रनिरूपणं । वृषलक्षणं । रेखाकरणं । वीजवपनं । चक्रन्यासः । रोपणविधिः । मुष्टिग्रह-
विधिः । मेध्यारोपणविधिः । मेधिवृक्षकथनं । धान्यादिस्थापनं । नवान्नकथनं । नववस्त्रपरि-
धानविधिः । राज्याभिषेककथनं । नृपदर्शनं । नवदोलादिकारोहनं । वृक्षादिरोपणविधिः ।
निषिद्धवृक्षनिरूपणं । काष्ठादिच्छेदनविधिः । आर्द्रादौ रोगजन्मदोषकथनं । औषधकरणविधिः ।
रोगिस्नानविधिः । मङ्गलगीत-मैत्रीकरणारम्भनक्षत्रनिरूपणं । वृषादिदमनादिनक्षत्रनिरूपणं ।
विषाग्निदानादिविहितनक्षत्रकथनं । अस्त्रशस्त्रारम्भणकथनं । धान्यादिवृद्धिदानं । सन्नाहादि-
धारणं । गजाश्वारोहणविधिः । कोटकरणविधिः । पुष्करिण्यारम्भः । जलाशयप्रतिष्ठा । देव-
तागठनविधिः । देवप्रतिष्ठाविधिः । वृषमहेश्वरप्रतिष्ठानक्षत्रकथनं । देवस्थापनविधिः । दीक्षा-
ग्रहणविधिः । पशुक्रयणविधिः । क्रयविक्रययोग्यनक्षत्रकथनं । गजाश्वकार्य्यकथनं । गुणगणा-
ज्ञानं । ऋणप्रयोगादिनक्षत्रकथनं । नौकागठनविधिः । नौयात्राविधिः । कूर्म्मचक्रन्यासः ।
वास्तुभूमिलक्षणं । आयतादीनां फलं । ७मे,— लाभालाभध्रुवककथनं । सुखदुःखध्रुवककथनं ।
जयपराजयध्रुवककथनं । यात्रायात्राध्रुवककथनं । प्रश्नलक्षणं । प्रश्नगणनप्रकारः । जीवितम-
रणज्ञानं । जीवयोनिकथनं । धातुयोनिकथनं । चिन्तापरीक्षा । धातुपटलनिरूपणं । रत्नप-
टलकथनं । वर्णपटलकथनं । कर्पूरप्रकरणं । दग्धालक्षणं । तस्करस्वरूपकथनं । ८,९मे,—
वेलामाननिरूपणप्रकारकथनं । गालयोगकथनं । उत्पातमण्डलनिरूपणं । ग्रस्तोदयादौ रवि-
चन्द्रमसोर्ग्रहणफलकथनं । त्रैलोक्यदीपनचक्रकथनं । सर्व्वतोभद्रचक्रकथनं । संक्रान्तिपुरुष-
लक्षणं । धर्म्मादिचिन्ता । अयनद्वयनिरूपणं । सप्तविंशतिनक्षत्रफलं । पारिभाषिकाङ्कसंज्ञाक-
थनं । घटिकाराशिकथनं । जातकसंप्रत्ययकथनं । शिरोनिरूपणेन लग्नज्ञानकथनं । पितृप-
रोक्षे शिशुजन्मज्ञानं । जारजयोगादिनिरूपणं । वेश्यादियोगकथनं । वर्णकथनं । नक्षत्रशील-
कथनं । १०मे,—चतुश्चक्र-कनकदण्ड-ध्वजयोग-राजहंसादिकथनं । ह्रद-फणिमुखादिनिन्दित-
योगकथनं । सर्व्वग्रहवीक्षितलग्नादिफलकथनं । अरिष्टकथनं । तद्भङ्गनिरूपणं । स्त्रीणां वैध-
व्यनिर्णयः । लग्नचिन्ता । सहजचिन्ता । सुतचिन्ता । शत्रुचिन्ता । मृत्युचिन्ता । धर्म्मचिन्ता ।
कर्म्मचिन्ता । आयचिन्ता । षड्वर्गफलकथनं । नवांशादिफलकथनं । विशेषग्रहयोगफलं । लग्न-
फलं । ११, १२, १३शे,—नक्षत्रदशानिरूपणं । सोमादीनां मासदिननिरूपणं । दशावर्षादि-
निरूपणं । अष्टोत्तरदशानिर्णयः । विंशोत्तरदशाकथनं । ग्रहाणां वर्षसंख्या । परदशानिर्णयः ।

षोड़शवर्षगुर्व्विणीचिन्ता। त्रिकण्टकयोगकथनं। यात्राकथनं। योगिणीनिरूपणं। वारनत्तत्रा-दिनिरूपणं। प्रस्थानविधिः। यात्राकाले देहस्पन्दनादिफलं। अरिप्रध्वंसादियोगकथनं। स्वप्न-दर्शनफलं। छायालग्नकथनं। उपायोगकथनं। चक्रदीपकथनं। धर्म्ममार्गफलकथनं। काम-मार्ग-मोचमार्गादिफलकथनञ्च।

No. 2966 हरेकृष्णमहामन्त्रार्थनिरूपणम्। Substance, country-made paper, 13 × 5 inches. Folia, 2. Lines, 5 on a page. Extent, 25 ślokas. Character, Bengali. Date, ? Place of deposit, Hetampura, Zillá Vírabhúma, Rájá Rámaranjana Chakravartí. Appearance, old. Verse. Incorrect.

Harekrishna-mahámantrártha-nirúpana. An exposition of the esoteric meaning of the mantra of Hari. By Rúpa Gośvámí.

Beginning. सुमेरुः कृष्णचन्द्रश्च साक्षौ सुरतधर्म्मयोः।
हरेकृष्णमहामन्त्रं जपेद्भागवतोत्तमः। इत्यादि।

End. आगत्य दुःखं हृतवान् सर्व्वेषां व्रजवासिनां
श्रीराधाहारिचरितो हरिः श्रीनन्दनन्दनः।

Colophon. इति रूपगोस्वामिना विरचितं हरेकृष्णमहामन्त्रार्थनिरूपणं समाप्तं।

विषयः। हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे। हरे राम हरे राम राम राम हरे हरे॥ इति मन्त्रस्य नामनिर्व्वचनं।

No. 2967. हरिनामकवचम्। Substance, country-made paper, 13 × 5 inches. Folia, 2. Lines, 4 on a page. Extent, 22 ślokas. Character, Bengali. Date, ? Place of deposit, Hetampura, Zillá Vírabhúma, Rájá Rámaranjana Chakravartí. Appearance, old. Verse. Incorrect.

Harináma-kavacha. A poem bearing the name of Hari and intended to be borne on the person as a charm. By Chaitanya.

Beginning. श्रीनित्यानन्द उवाच।
कथयस्व महावाहो नाथ नाथ जगद्गुरो।
राधाकृष्णस्वरूपत्वं महामन्त्रं प्रकाशय॥
हरेकृष्णादिकवचं मन्त्रराजफलप्रदं। इत्यादि।

End. वर्णभेदमहावीजं गोपीगोपालवेष्टितं।

Colophon. इति श्रीकृष्णचैतन्यविरचितं श्रीहरिनामकवचं सम्पूर्णं ।

विषयः । हरे कृष्णेत्यादिनामाक्षरविभागेन श्रीकृष्णकवचकथनं ।

No. 2968. सर्व्वाङ्गसुन्दरी । Substance, country-made paper, 14 × 5 inches. Folia, 48. Lines, 9 on a page. Extent, 234 ślokas. Character, Bengali. Date, Sk. 1722. Place of deposit, Hetampura, Zillá Vírabhúma. Rájá Rámaranjana Chakravartí. Appearance, old. Verse. Correct.

Sarváṅga-sundarí. A commentary on the Gítagovinda of Jayadeva. By Náráyanadása. Many other commentaries on the work have already been noticed under previous Nos.

Beginning. नत्वा श्रीहरिचरणं कुरुते सर्व्वाङ्गसुन्दरीटीकां ।
श्रीनारायणदासः कविराजो गीतगोविन्दे ।
आस्ते हृदि यदि वाञ्छा बोद्धुं तत्त्वेन गीतगोविन्दं ।
श्रीनारायणदासात् तदाभिप्रायं शृणुत ॥
महाकाव्योपक्रमे आगीर्नमस्क्रिया—इत्यादि ।

End. माकन्दकन्देति चूतमहीरुहेत्यर्थः ।

Colophon. इति कविराजश्रीनारायणदासकृतायां गीतगोविन्दटीकायां सर्व्वाङ्गसुन्दर्य्यां द्वादशसर्गविवरणं । शकाब्दाः । १७२२ ।

विषयः । जयदेवकृतगीतगोविन्दकाव्यस्य व्याख्यानं ।

No. 2969. तुलसीमाहात्म्यम् । Substance, country-made paper, 10 × 4 inches. Folia, 4. Lines, 5 on a page. Extent, 56 ślokas. Character, Bengali. Date, ? Place of deposit, Hetampura, Zillá Vírabhúma, Chandranáth Chaṭṭarája. Appearance, old. Verse. Incorrect.

Tulasímáhátmya. Merits of the tulasí plant, the mode of collecting its leaves for worship, and the mantras appropriate for the occasion. Anonymous.

Beginning. अथ तुलसीमाहात्म्यम् ।
तुलसीपत्राणि राजेन्द्र विना मन्त्रेण यो हरेत् ।
स याति नरकं घोरं यावचन्द्रदिवाकरौ ॥ इत्यादि ।

End. तस्य यथा भवक्लेशौरन्ते मुक्तिश्च वैष्णवी ।

Colophon. इति तुलसीमाहात्म्यं समाप्तं।

विषयः। तुलसीपत्रचयनादिप्रकारकथनपुरःसरं तुलस्या माहात्म्यवर्णनं।

No. 2970. दशाचिन्तामणिः। Substance, country-made paper, 12 × 4 inches. Folia, 10. Lines, 6 on a page. Extent, 184 ślokas. Character, Bengali. Date, ? Place of deposit, Hetampura, Zillá Vírabhúma, Chandranátha Chaṭṭarája. Appearance, old. Verse. Incorrect.

Daśá-chintámaṇi. The effects of certain conjunctions of stars and planets on human destiny and on the rites appropriate for averting evil consequences. By Chintámaṇi, son of Kalyána.

Beginning. अभून्मङ्गला पिङ्गला धन्यका च
तथा भ्रामरी भद्रिका चोल्लका च।
तथा सिद्धिका सङ्कटाष्टौ शिवस्तु
शिवायाः पुरो योगिनीव + स्व॥ इत्यादि।

End. दशाचिन्तामणिं सूनुः कल्याणस्य चकार हि।
शाके पञ्चशरेष्वब्दसंख्ये राज-ऋषिः किल॥

Colophon. इति दशाचिन्तामणिः समाप्तः।

विषयः। सङ्कटस्थानकथनपूर्व्वकं तत्र तत्र ग्रहगोचरफलकीर्त्तनं।

No. 2971. गीतामाहात्म्यम्। Substance, country-made paper, 11 × 4 inches. Folia, 3. Lines, 10 on a page. Extent, 95 ślokas. Character, Bengali. Date, ? Place of deposit, Hetampura, Zillá Vírabhúma, Chandranátha Chaṭṭarája. Appearance, old. Verse. Correct.

Gítá-máhátmya. The merits of reading and understanding the Bhagavadgítá. Author's name unknown.

Beginning. ऋषय ऊचुः।
केनोपायेन भगवन् सर्व्वपापक्षयो भवेत्।
विना दानेन तपसा विना तीर्थैर्विना मखैः। इत्यादि।

End. पठेद्गीतां सदा विद्वान् मनः कृष्णे निवेश्य च।

Colophon. इति गीतामाहात्म्यं समाप्तं।

विषयः। भगवद्गीताया अध्यायविशेषपाठस्य फलकथनपूर्व्वकं समुदयपाठफलश्रुतिः।

No. 2972. हरिभक्तिकल्पलतिका। Substance, country-made yellow paper, 10 × 4 inches. Folia, 4. Lines, 10 on a page. Extent, 60 ślokas. Character, Bengali. Date, ? Place of deposit, Duvarájapura, Gaura-bájára, Zillá Vírabhúma, Sundaránanda Gośvámí. Appearance, fresh. Verse. Generally correct.

Haribhakti-kalpalatiká. The rituals for worshipping Harí. The MS. is defective.

Beginning. अर्च्चनस्वरूपमाह।

उपचारैः षोडशभिर्यथाविधि यथाक्रमं।

सम्पूजनं मुरारातेरर्च्चनं परिकीर्त्तितं॥ इत्यादि।

End. इति कृताच्युतपादयुगार्च्चनो विगतमानमदादिरकुण्ठधीः।

सपरिपूर्णमनन्तसुखाम्बुधिं सपदि वन्दितुमर्हति माधवं॥

Colophon. इति श्रीहरिभक्तिकल्पलतिकायामष्टमः स्तवकः।

विषयः। (हरिभक्तिकल्पलतिकायां अष्टमस्तवकमात्रमिदं।) तत्र अर्च्चनस्वरूपकथनं। कृष्णपूजनविधिकथनं।

No. 2973. चैतन्यभागवतं। Substance, country-made yellow paper, 10 × 9 inches. Folia, 10. Lines, 6 on a page. Extent, 107 ślokas. Character, Bengali. Date, ? Place of deposit, Duvarájapura, Gaurabájára, Zillá Vírabhúma, Sundaránanda Gośvámí. Appearance, fresh. Verse. Correct.

Chaitanya-bhágavata. A treatise on the divinity of Chaitanya, and the worship and devotion due to him.

Beginning. आजानुलम्बितभुजौ कनकावदातौ

संकीर्त्तनैकपितरौ कमलायताक्षौ।

विश्वम्भरौ द्विजवरौ युगधर्म्मपालौ

वन्दे जगत्प्रियकरौ करुणावतारौ॥

नमस्त्रिकालसत्याय जगन्नाथसुताय च।

सभृत्याय सपुत्राय सकलत्राय ते नमः॥ इत्यादि।

End. तर्कोऽप्रतिष्ठः श्रुतयो विभिन्ना नासावृषिर्यस्य मतं न भिन्नं।

धर्म्मस्य तत्त्वं निहितं गुहायां महाजनो येन गतः स पन्थाः॥ ८॥ १४॥

Colophon. इति श्रीचैतन्यभागवते अन्त्यखण्डः समाप्तः।

विषयः। १प्रथमखण्डे,—भगवदवतारप्रयोजनकथनं। भगवद्विलासवर्णनं। चैतन्यमाहात्म्यकथनं। २यखण्डे,—हरिगुणानुवादविहीनशास्त्रस्य अनुपादेयत्वकीर्त्तनं। येन केनाप्युपायेन भगवन्नाम्नुश्रुस्य विपुलफलकत्वनिरूपणं। मत्ता अपि लीलया विग्रहं कृत्वा भगवन्तं सेवन्ते—इति निरूपणं। ३यखण्डे,—चैतन्यावतारकथनं। भक्तस्य प्राधान्यकथनं। महाजनकृतसाहसानुकरणे अधुनातनानां दोषनिरूपणं।

No. 2974. विनोदविलासरास। Substance, country-made paper, 12 × 4 inches. Folia, 102. Lines, 15 on a page. Extent, 4,166 ślokas. Character, Nágara. Date ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Generally correct. Hindi.

Vinoda-vílása-rása. Stories of Princes, saints, merchants and others, illustrative of the morality of the Jaina religion. By Udayaratna.

Beginning. सकलसमीहितश्रेयकरजसकरपदनखकान्ति।
दुरिततिमिरआकरदलें सोमाहिव नमुं शांति॥
अमेयगुणें वामेय जिन पारसनाथ प्रसिद्ध।
वंदुं विपदविदारणो संपतिदायक सिद्ध॥
चोवीसे जिनराज नासुवेंधें चरणसरोज।
नित नमीइं मंगलनिधि सफलदायक मोज॥ इत्यादि।

End. ते प्रभुपासतणें प्रसादें में पूरण कलस चढाय रे।
आज मनोरथ सहुफल्या मेंतो जीत निसां धाव जाय रे॥ ढाल।
एकसो तेवीसमी धन्यासीरागे गाइ रे।
उदयरत्न कहे आजथो वाधी दोलते सवाइ रे॥

Colophon. इति श्रीज्ञानरत्नोपाख्यानविषये श्रीमलयसुन्दरीमहाबलचरित्रसम्बन्धे विनोदविलासाख्यरास सम्पूर्ण॥

विषयः। विविधोपाख्यानकथनप्रसङ्गेन जैनधर्म्ममाहात्म्यादिकीर्त्तनम्।

No. 2975. उत्तराध्ययनकथा। Substance, country-made paper, 12 × 4 inches. Folia, 190. Lines, 10 on a page. Extent, 4,725 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur, Appearance, fresh. Prose. Incorrect.

Uttarádhyáyana-kathá. A Sanskrit paraphrase of the Uttarádhyáyana Sútra,—a treatise on Jain religion. By Padmaságara Gaṇi. The work was composed in Samvat 1657. (Cf. *ante*, No. 2799, Vol. VIII, p. 240.)

Beginning. प्रणम्य श्रीमहावीरं नत्वाखण्डलमण्डलम् ।
आरभ्यन्ते कथाः कर्त्तुमुत्तराध्ययनस्थिताः ॥

उत्तराध्ययनवृहद्वृत्तिगताः कथाः संस्कृताः कर्त्तुमारभ्यन्ते । आणा अणिद्देसकरे । गाथायां कूलवालककथा यथा, एकस्य आचार्य्यस्य क्षुल्लकोऽविनीतः । तमाचार्य्यः शिक्षार्थं ताड़यति । इत्यादि ।

End. क्षतान्तः पुनः सर्व्वानपि ग्रसति । ततोऽच धर्म्म एव सर्व्वव्यसनरक्षक इति चिन्तयन्नेव प्रतिबुद्धो गङ्गामुत्तीर्य्य साधुसमीपे प्रव्रजितः । अग्रगः सम्बन्धः सूत्रत एव प्रोक्तोऽस्तीति पञ्चविंशाध्ययने कथा समाप्ता । एतावता उत्तराध्ययनवृहद्वृत्तिगताः प्राकृताः कथाः सर्व्वा अपि संस्कृताः कृताः । तपागच्छे भट्टारकचक्रवर्त्तिश्रीईविजयसेनसूर्य्याचार्य्यश्रीईविजयदेवसूरिराज्ये संवत् १६५७ वर्षे पीयाड़ग्रामे पण्डितप्रकाण्ड (पण्डित) श्रीविमलसागरगणिशिष्यपण्डितपद्मसागरगणिना गणिप्रवरप्रेमसागरवाक्येन कथाः कृताः ।

Colophon. इति श्रीउत्तराध्ययनकथा समाप्ता ॥

विषयः । उत्तराध्ययनसूत्रगतानां तद्वृहद्वृत्तिगतानाञ्च प्राकृतभाषामयकथानां संस्कृतभाषया अवतारणम् ।

No. 2976. उपमितभवप्रपञ्चकथा। Substance, country-made paper, 12 × 4 inches. Folia, 94. Lines, 15 on a page. Extent, 3,138 ślokas. Character, Nágara. Date, Sm. 1798. Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, decayed. Prose. Incorrect. Sanskrit.

Upamita-bhava-prapañcha-kathá. Jaina doctrines and morals. By Hañsaratna.

Beginning. (मङ्गलाचरणादिकं पत्रस्यातिजीर्णतया विच्छिन्नतामधिगतम् ।)

अस्त्यशेषतीर्थङ्करचक्रवर्त्त्यादिसत्पुरुषरत्नसम्भवास्पदं धर्म्मादिसकल + + + + र्व्वजन स्थानं मनुष्यगतिनामपुरं । तत्र च सकलसुरासुरादिशिरोदत्तपादः नार + + + + नावेषधरसर्व्वसंसारिसत्वन्दत्यावलोकनविगतसादः । इत्यादि ।

End. दुःखक्षयं विधाय अनन्तानन्तसुखसदनं शिवपदं लभध्वमिति ।
इत्येवं निपुणं विभाव्य भविकाः संसारदुःखक्षयो-

पार्यं तात्त्विकमव्ययायि परमानन्दैकसंसाधनं ।
मुक्त्वालस्यमपास्य कुग्रहमथो हित्वा कदाशां तथा
कुर्व्वीत दृढमुद्यमं यदचिरात् सर्व्वार्थसिद्धिर्भवेत् ॥
इत्ययं हंसरत्नेन स्वल्पबुद्धिहितेच्छया ।
उपमित्या क्रमोद्धारो लिलिखे लेशमात्रतः ॥

Colophon. इति श्रीउपमितभवप्रपञ्चकथायां सप्तमोऽधिकारः ।
सम्पूर्णोऽयं प्रबन्धः । संवत् १७९८ ।

विषयः । ग्रन्थेऽस्मिन् कर्म्मपरिणाम-कालपरिणति-सुमति-सदागम-अविवेक-लोभ क्रोधादीनां राज-राज्ञी-कुमार-गुरु-मन्त्रि-सैन्यादिरूपतया समारोपेण धर्म्मनीतिकथनं । तत्र संसारिजीवानां मोहाद्यादिपरतन्त्रताकथनं । कुसङ्गत्यागेन सत्सङ्गग्रहणमाहात्म्यकथनप्रसङ्गेन विविधोपाख्यानकथनं । कुमित्रसंसर्गस्यानिष्टकारिताकथनमुखेन कथानेककीर्त्तनं । मृषावादस्य नितरां दुष्टत्वकीर्त्तनमाख्यानकथनञ्च । विषयाभिलाषनिन्दनं । सद्भिर्द्वेषरागादिनिवारणं सर्व्वथा यतितव्यमितिनिरूपणं । ज्ञानदर्शनचारित्ररूपरत्नत्रयस्य नितरामभ्यर्हितत्वकथनं । तत्त्वज्ञानप्रसङ्गेन तार्किक-वैशेषिक-सांख्य-मीमांसक-बौद्धादीनां मतनिर्य्यासं संक्षेपेण समालोच्य तेषामतत्त्वज्ञताप्रतिपादनं । जैनमतमेव सर्व्वथा साध्विति कथनञ्च । मद्यपान-मिथ्याभिमान-गर्व्व-गणिकागमन-द्यूतक्रीड़ा-खेटकानां नितरां दूषणीयत्वकथनमुखेन विविधाख्यानकथनं । अथ मायास्तेयादिविपाककथनं । तत्र तत्र आख्यानकथनञ्च ।

No. 2977. सूक्तरत्नावली, वृत्तिसहिता । Substance, country-made paper, 12 × 4 inches. Folia, 29. Lines, 8 on a page. Extent, 560 ślokas Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur Appearance, new. Text, verse. Commentary, prose. Incorrect. Sanskrit.

Súktaratnávalí. Jaina doctrines, morals, and places of pilgrimage illustrated with appropriate anecdotes. By Kshamákalyána. Annexed is a gloss in Sanskrit.

Beginning. वृत्तेः,—

अर्हतां सद्गुरूणाञ्च प्राप्यानुग्रहमुत्तमं ।
सूक्तरत्नावलीव्याख्यां संक्षेपाद्विदधाम्यहं ॥

इह तावद्विघ्नपरिसमाप्त्यर्थं शिष्टसमयसमाचरणार्थञ्च समुचितेष्टदेवतास्मरणादिरूपभावमङ्गलमुपनिबध्नन्प्रयोजनादींश्च सूचयन् प्रथमपद्येन चिकीर्षितं प्रतिजानाते ॥

मूलस्य,— ध्यायं २ जिनाधीशं स्मारं २ गुरोर्वचः।
सूक्तरत्नावलीं कुर्व्वे धर्म्माद्यर्थावबोधिकां॥
जीयाज्जगत्तारकतीर्थमुख्यः शत्रुञ्जयो नाम नगाधिराजः।
यत्रादिमस्तीर्थपतिः समागान्मुकुर्मुक्तः साधुगणाश्च सिद्धाः॥ इत्यादि।

End. मूलस्य,—
यत्किञ्चिदुत्सूत्रमयप्रयोगं मया विमोहादिह सन्निबद्धं।
शोध्यं सुधीभिस्तदमन्दभावाद्विधाय सत्यं मयि सुप्रसादं॥
निष्पन्नमानन्दमयैर्जिनाद्यैः समाश्रितैः शुद्धपदैरवक्रं।
ह्रींकारदीप्रं जितसर्व्वशत्रु श्रीसिद्धचक्रं शरणं ममास्तु॥
वृत्तेः,—
एवं विधं श्रीसिद्धचक्रं मम शरणमस्तु।
इति व्याख्यातासंक्षेपतः सूक्तरत्नावली॥
संवन्मुनिवेदवसुक्षोणीसंख्यस्य शुक्रमासि वरे।
वङ्कलिकादश्मिकायां मकसूदावादस+क्रे॥
सोपज्ञसूक्तरत्नावलिकाया वृत्तिरेषिका सुगमा।
देवाधिदेवसुगुरुप्रसादतो विनिर्म्मिता मयका॥
— — — — — — —।

Colophon. इति श्रीसूक्तरत्नावलीवृत्तिः॥

विषयः। जैनतीर्थावलीवर्णनं। सम्यक्श्रद्धानमेव जैनदर्शनस्य मूलमितिवर्णनं। स्याद्वादमाहात्म्यवर्णनं। जैनधर्म्मप्राप्त्युपायकथनं। स्याश्रयादिपरीहार एव तदुपायवर्णनञ्च। पार्श्वनाथस्तोत्रकथनम्। जैनधर्म्मतत्त्ववर्णनं। कलिकालमाहात्म्यवर्णनं। कामरिपुजयस्य स्रावश्यकताकथनं। ब्रह्मचर्य्यस्वरूपादिवर्णनं। भवितव्यतादिवर्णनं। इन्द्रियाणां दुर्ज्जयत्ववर्णनं। तज्जयात् पूर्व्वं मनोजयस्य स्रावश्यकतावर्णनं। प्रमादपञ्चकवर्णनं। स्रथ स्रज्ञानादष्टविधप्रमादकथनं। सन्तोषमाहात्म्यवर्णनं। जिनाज्ञाप्रतिपालनमेव सन्तोषनिदानमितिवर्णनं। स्रात्मस्वरूपवर्णनं। स्रात्मगतिवर्णनं। स्रात्मज्ञानिनः प्रकृतिवर्णनं। जिनप्रभोः पुरस्तात् स्वदोषप्रकटनद्वारा स्रात्मनिन्दायाः स्राघ्यत्ववर्णनं। स्राशीर्वर्णनञ्च।

No. 2978. श्रीपालचरित्रव्याख्या। Substance, country-made paper, 12 × 4 inches. Folia, 113. Lines, 10 on a page. Extent, 3,375 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit.

S'rípála-charitra-kathá. A Sanskrit paraphrase of Ratnaśekhara's Prákṛit work on the life of S'rípála. By Kshamákalyána. Cf. *ante*, Nos. 2645 and 2693, Vol. VIII, pp. 110 and 146.

Beginning. ध्यात्वा नवपदीं भक्त्या श्रीश्रीपालमहीभुजः।
चरित्रं कीर्त्तयिष्यामि रम्यं संस्कृतभाषया॥
अर्हदादिनवपदानि हृदयकमलमध्ये
ध्यात्वा उत्तमं श्रीसिद्धचक्रस्य यन्त्रराजस्य
माहात्म्यं किमपि जल्पामि कथयामि॥
अस्मिन् जम्बूद्वीपे दक्षिणभरतार्द्धस्य मध्यमे खण्डे———इत्यादि।

End. श्रीपालनरेन्द्रकथा वाच्यमाना सती नन्दतु समृद्धिर्लभ्यतां॥
इति श्रीपालनरेन्द्रस्य कथा श्रीसिद्धचक्रस्य
माहात्म्येन महिमयुक्ता समाप्ता पूर्णीभूता।
वर्षे नन्दगुहास्यसिद्धिवसुधासंख्ये शुभे + + रे
मासे निर्म्मलचन्द्रके सुविजया + यां दशम्यां तिथौ।
पूज्यश्रीजिनहंससूरिगणभृत्सद्धर्म्मराज्ये मुदा
श्रीश्रीपालनरेन्द्रचारुचरिते व्याख्या समासात् कृता॥
श्रीमन्तो जिनभक्तिसूरिगुरवश्चान्द्रे कुले जज्ञिरे
तच्छिष्या जिनलाभसूरिमुनिपाः श्रीप्रीतितः सागराः।
तच्छिष्यास्तत धर्म्मवाचकवरास्तेषां विनेयक्षमा-
कल्याणाख्यसुपाठकेन सुधियां चेतःप्रमत्त्यै सदा॥

Colophon. इति श्रीपालचरित्रस्य व्याख्या समाप्ता।

विषयः। रत्नशेखरसूरिकृतप्राकृतभाषामयश्रीपालचरित्रस्य व्याख्यानम्।

No. 2979. न्यायप्रदीपः। Substance, country-made paper, 14 × 4 inches. Folia, 58. Lines, 12 on a page. Extent, 1,752 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimgaṉj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Correct.

Nyáya-pradípa. A dissertation on the Nyáya doctrine with special reference to the truth of the Bháṭṭa theory. By Ananta Mis'ra. Not noticed in Hall's 'Contributions.'

Beginning. चतुर्मुखमुखाम्भोजमहारण्यविहारिणीम्।
वन्दे कुन्देन्दुरुचिरां भारतीं ज्ञानहेतवे॥

इह खलु संसारानलसन्तप्तानां शान्तिसरोवरपदवीमनुसन्धित्सूनां सुखेनाभीष्टस्थानगमनोत्सुकानां करुणया भगवान् जैमिनिः। अथातो धर्म्मजिज्ञासेतीत्यादि द्वादशलक्षणं मीमांसाशास्त्रं इत्यादि।

End. तत्र तत्र श्रुतादीनां निरपेक्षतया बाधकलनिरासादिति सर्व्वमनवद्यमिति शम्।

Colophon. इति सन्मिश्रश्रीमदनन्तकृतन्यायप्रदीपः समाप्तः।

विषयः। धर्म्मस्वरूपविवेचनं। वेदस्य अपौरुषेयत्वनिरूपणमुखेन पौरुषेयत्ववादनिरसनम्। वेदलक्षणादिनिरूपणं। विधिनिषेधार्थवादनिरूपणं। तत्तद्वान्तरभेदादिनिरूपणञ्च। कार्य्याप्रतिपादकस्य वेदभागस्य स्वार्थे अप्रामाण्यकथनं। कार्य्यान्वितशक्तिनिरूपणं। प्रमाणादिनिरूपणं। तत्र प्रत्यक्षानुमानोपमानार्थापत्तिप्रभृतीनां लक्षणादिविवेचनम। विशेषेण शाब्दप्रमाणनिरूपणं। तत्र तत्र विविधवादखण्डनपूर्व्वकं भाट्टमतसंस्थापनं। प्रसङ्गेन सृष्टिप्रलयचिन्तनम्। मुक्तिस्वरूपादिनिरूपणञ्च।

No. 2980 लब्धिसारः वृत्तिसहितः। Substance, country-made paper, 12 × 4 inches. Folia, 76. Lines, 17 on a page. Extent, 3,346 ślokas. Character, Nágara. Date, Sm. 1718. Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance fresh. Text, Mágadhí verse. Commentary, Sanskrit prose.

Labdhisára. Jain metaphysics, in Mágadhí with a gloss in Sanskrit. By Nemichandra. Gloss anonymous.

Beginning. वृत्तेः,—

जयन्त्यन्वयमर्हन्तः सिद्धाः सूर्य्युपदेशकाः।
साधवो भव्यलोकस्य शरणोत्तममङ्गलं॥
नागार्य्यतनुसञ्जातः शान्तिनाथोपरोधतः।
वृत्तिर्भव्यप्रबोधाय लब्धिसारस्य कथ्यते॥
— — — — — — —।

मूलस्य,—
सिद्धे जिणिंदचंदे आयरिय उवज्झाय साहुगण।
वंदिय सम्मदंसण चरित्तलद्धिं परुवेमो॥ इत्यादि।

End. मूलस्य,—

पड़िपड़वड़्गुणसेढ़ी चड़माणापूव्वपड़िय खहियकमा ।

उवमामकोहस्स — — — — वेद्गद्धाऊ ॥

टीका:,—संख्यातगुणत्वसम्भवात् । एवं चारित्रमोहोपशमनविधानं समाप्तं ।

Colophon. इति श्रीलब्धिसारः सम्पूर्णः । संवत् १०१८ ।

विषयः । ग्रन्थेऽस्मिन् प्रधानतया पञ्च लब्धयः सप्रपञ्चं निरूपिताः । लब्धिः, प्राप्तिरित्यनर्थान्तरम् । तत्र चयोपशमलब्धिः । विशुद्धिलब्धिः । देशनालब्धिः । प्रायोग्यतालब्धिः । करणलब्धिश्चेति लब्धयः पञ्च । अथ अप्रशस्तानां कर्म्मणां बहुभागप्रमाणानामुदयाभावः चयः । तेषामेवानूदयं प्राप्तानां कर्म्मस्वभावेन सदवस्था उपशमः । तयोः प्राप्तिः चयोपशमलब्धिरिति । एवं विशुद्धिलब्ध्यादीनां स्वरूपादिनिरूपणं । अथ चतुस्त्रिंशद्विधप्रकृतिबन्धापसरणस्थानादिनिरूपणं । तत्र नरगतौ देवगतौ च विशेषेण बन्धापसरणपदादिकथनं । अथ मनुष्यतिर्य्यागादिगतयः प्रथमसम्यक्ताभिमुखमिथ्यादृष्ट्या बध्यमानाः प्रकृतय इति कथ्यन्ते । तत्र प्रथमसम्यक्ताभिमुखमिथ्यादृष्टेः बन्धविभागकथनादिकं । अथ सत्कर्म्मप्रकृतीनां स्थित्यादिमत्त्वपूर्व्वकं प्रायोग्यतालब्धिकथनं । अपूर्व्वकरणलक्षणादिकथनं । अथ प्रकृतगुणश्रेणीनिर्ज्जराविधानकथनं । तत्र गुणसंक्रमविधानकथनञ्च । अथ देशकालसंयमाभ्यां सह प्रथमोपशमसम्यक्तं गृह्णतः कर्म्मस्थितिमत्त्वविशेषादिकथनं । अथ वेदकसम्यक्तस्य अवस्थाविशेष-तत्कार्य्यविभागादिप्रदर्शनं । अप्रवृत्तदेशसंयतस्य गुणश्रेणीद्रव्यप्रमाणादिकथनं । अथ मनुष्यजीवदेशसंयमलब्धिस्थानानां प्रतिपातादिभेदभिन्नानां जघन्यात्कृष्टस्थानावसरनिरूपणं । तत्र प्रतिपातो नाम बहिरन्तरङ्गकारणवशेन संयमात् प्रच्यवः । अथ चारित्रमोहोपशमनाभिमुखस्वरूपादिकथनं । अथ लोभचयोपशमनविधानकथनं । अथ उपशान्तकषायस्य एकोनषष्टिविधोदयप्रकृत्यनुभागप्रदर्शनादिकं । अथ स्थिति-बन्धक्रम-करण-विपर्य्ययादिनिरूपणञ्च ।

No. 2981. दानकल्पद्रुमः । Substance, country-made paper, 12 × 4 inches. Folia, 75. Lines, 15 on a page. Extent, 2,935 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Correct. Magadhi.

Dánakalpadruma. A collection of stories illustrating the merits of charity viewed from a Jain standpoint. By Jinavijaya.

Beginning. ऐन्द्रश्रेणिनतक्रमकमलस्वस्तिश्रीगुणधाम ।

वीरधीरजिनप्रतिप्रतें प्रसें करु प्रणाम ॥

वसुधामे विद्याविपक्षवरदाता नितमेव ।

समवचितचोषें करीते प्रतिदिन अतदेव ॥
गुरुचरणाम्बुजसेव वा मूढ़मनमधुकर लीन ।
उपमारी अवनीतलें गुरुसम को न प्रवीन ॥
सिद्धाचलवैभारगिरि अष्टापदगेरनार ।
समेताद्रिए पंचवरतीर्थ नमुं नितसार॥ इत्यादि ।

End. तपगच्छमें पंडितवयरागी दीपविजयबुधराया ।
तेहनामिश्य संवेगी सुन्दर कविद्या विजैं सवायारे ॥
तत्पदसेवक क्षणविढ़यवर धर्म्मथकोधरे ।
मायातसया प्रहथीरासनीरचनाकिधी गुरुउपमायारे ॥
— — — — — — ।
चार उल्लासें अधिकविलासें दानकल्पद्रुम गायो रे
बुधजिनविजयकहे विस्तरयो मतसाधाद सुच्छायो रे ॥

Colophon. इति श्रीधनशालिचरिचे प्राकृतबन्धे दानकल्पद्रुमाख्ये चतुर्थशाखारूपो धनशालिसंयम ।

विषयः । दानधर्म्मप्रशंसाकीर्त्तनव्याजेन धनशालिश्रेष्ठिप्रभृतीनामुपाख्यानकथनं जैनधर्म्म-माहात्म्यादिनिरूपणञ्च ।

No. 2982. वैद्यवल्लभः । Substance, country-made paper, 12 × 4 inches. Folia, 14. Lines, 7 on a page. Extent, 294 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Vaidya-vallabha. A short treatise on the treatment of fevers. By Hastiruchi, disciple of Hitaruchi.

Beginning. सरस्वतीं हृदि ध्यात्वा नत्वा श्रीगुरु + + जं ।
श्रीहस्तिरुचिना वैद्यवल्लभोऽयं विधीयते ॥
पूर्व्ववैद्येन विधिना विधाय रोगनिर्णयं ।
पश्चात् साध्यं यथा ज्ञात्वा ततो भेषजमारभेत् ।
यतः सकलरोगेषु प्रोच्यते बलीयान् ज्वरः ।
तस्मात् तद्रोगशान्त्यर्थं प्रोच्यते हितमौषधं ॥
पूर्व्वज्वरे सदा कुर्य्यात् रेचनं रोगशान्तये ।
पश्चाल्लङ्घनभेषज्यं कुर्व्वाणो जायते सुखी ।

अम्हता नागरं मुस्ता निशा + + समानकैः ।
शातज्वरे प्रदातव्यो + + युक्तः कषायकः ॥ इत्यादि ।

End. मन्दाग्निमोहनयनाक्तिहरं नराणां
कुष्ठव्यथाक्तमिज + + + + विहन्यात् ।
सन्नष्टकामरुचि + + ददादिवीर्य्यं
वङ्गेश्वरो हि सुरसेषु विशेष एव ॥

Colophon. इति तपागच्छोपाध्यायश्रीहितरुचिशिष्यहस्तिरुचिकृतौ वैद्यवल्लभः समाप्तः ॥

विषयः । संक्षेपेण ज्वरादिरोगाणां चिकित्साकथनं ।

No. 2983. सप्ततिकासूत्रम् । Substance, country-made paper, 13 × 4 inches. Folia, 5. Lines, 6 on a page. Extent, 64 slokas. Character, Nágara. Date, Sm. 1598. Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Verse. Incorrect. Mágadhí.

Saptatiká-sútra. The elements of Jain metaphysics. By Súdharmá Svámí. Cf. *ante*, No. 2655, Vol. VIII, p. 118.

Beginning. सिद्धपए हिं महत्थं बन्धोदयसंतपयड़िठाणं ।
वोच्छं सुणसंखेवं णीसंदंदि+वायस्स ॥
कइ वंधंतो चेयइ कइवाए यड़िविसंतिठाणाणि ।
मूलुत्तरपगईसुं भंगविगप्पाउ वोधव्वा ॥ इत्यादि ।

End. दुरहि गमनिपुणपरमत्थरूइर वहुभंगदिहि चायाउ ।
अच्छा अणुसरियव्वा वंधोदयसंतकम्माणं ॥
जोजत्थअ पड़िपत्ती थत्थो अप्पागमेणवद्वौत्ति ।
तं खमिउण वहुसुया पुरेउणं परिकहंतु ॥

Colophon. इति श्रीसप्ततिकासूत्रं परिपूर्णं संवत् । १५९८।

विषयः । ग्रन्थेऽस्मिन् बन्धोदयसत्तासु समासेन प्रकृतिस्थानजीवस्थानगुणस्थानादिनिरूपणं । तत्र बन्धो नाम कर्मपरमाणूनामात्मप्रदेशैः सह वह्न्ययःपिण्डवत्क्षीरनीरवदन्योन्यानुगमः । कर्मपरमाणूनामेव विपाकप्राप्तानामनुभवनमुदयः । तथा बन्धसमयात्, संक्रमेणात्मलाभसमयाद्वा आरभ्य यावत् ते कर्मपरमाणवः नान्यत्र संक्रमन्ते, यावद्वा क्षयमुपगच्छन्ति, तावत् तेषां स्वरूपेण यः सद्भावः सा सत्तेतिनिरूपणं । अथ बन्धादीनामवान्तरभेदादिनिरूपणं । योगानुशासनकीर्त्तनञ्च ।

No. 2984. सप्ततिकावचूर्णिः । Substance, country-made paper, 12 × 4 inches. Folia, 80. Lines, 12 on a page. Extent, 4,315 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Incorrect. Sanskrit.

Saptatikávachúrṇi. A Sanskrit paraphrase of the work noticed under the next preceding No. By Malaya Giri.

Beginning. टीकायाः ।

अशेषकर्म्मांशतमःसमूहक्षयाय भास्वानिव दीप्ततेजाः ।
प्रकाशिताशेषजगत्स्वरूपः प्रभुः स जीयाज्जिनवर्द्धमानः ॥
जीयाज्जिनेशसिद्धान्तमुक्तिकामप्रदीपनः ।
कुहृत्यातपतप्तानां सान्द्रो मलयमारुतः ॥
चूर्णयो नावगम्यन्ते सप्ततेर्मन्दबुद्धिभिः ।
ततः स्पष्टावबोधार्थं तस्याष्टीकां करोम्यहं ॥
— — — — — — — ।

इह यच्छास्त्रं प्रकरणं वा सर्व्वविन्मूलं तत् प्रेक्षावतामुपादेयं भवति नान्यत् । ततः सप्ततिकाख्यप्रकरणमारभमाण आचार्य्यः प्रेक्षावतां प्रकरणविषये उपादेयबुद्धिपरिग्रहार्थं प्रकरणस्य सर्व्वविन्मूलतां — — — — — ततस्तेषां प्रवृत्त्यर्थमभिधेयादिकञ्च प्रतिपिपादयिषुरिदमाह ।

End. प्रकरणमेतद्विषमं सप्ततिकाख्यं विवृण्वता कुशलं ।
यद्वापि मलयगिरिणा सिद्धिं ते + + भुतां लोकः ॥
अर्हन्तो मङ्गलं सिद्धान् मङ्गलं संयतानहं ।
अशिश्रियं जिनाख्यातं धर्म्मं परममङ्गलं ॥

Colophon. इति श्रीमलयगिरिविरचिता सप्ततिकावचूर्णिः समाप्ता ।

विषयः । सप्ततिकाख्यजैनप्रकरणग्रन्थस्य व्याख्यानम् ।

No. 2985. आचाराङ्गसूत्रम्, (प्रथमश्रुतस्कन्धः) । Substance, country-made paper, 12 × 4 inches. Folia, 200. Lines, 6 on a page. Extent, 3,134 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Generally correct. Mágadhí.

A'chárá ṅga-sútra. The principles of Jaina religion. One of the leading text-books. The codex includes only the first part of the work.

Beginning. जिण वयणकप्परुक्खो अणेगसुत्थयमालविच्छिन्नो ।
तव नियमकुसुमगुच्छो सुगइ फलबंधणो जयइ ॥
जीवोच्छक्कायपरूणाय ते सिंवहेण बंधोय ।
विरइ अहिगारी सत्थपरिणाइ णायव्वो ॥
अंगाणयकिंसारो आयारो तस्स किं हवइ सारं ।
अणुओ गत्थो सारं तस्स वियपरूवणासारं ॥

— — — — सुयं मे आउ संतेणं भगवया एवमक्खायं इह मेगे सिंणो—इत्यादि ।

End. एस विही अणुक्कं ते माहणेणं मइमया बहुसो अपड़िणेणं भगवया एवं रीयंतेत्ति वेमित्तहाणं सुयं सम्मत्तं ॥

Colophon. इति श्रीआचाराङ्गे नवमं अध्ययनं समाप्तं ।

इति श्रीआचाराङ्गे प्रथमश्रुतस्कन्धः समाप्तः ।

विषयः । इह खलु रागद्वेषमोहाद्यभिभूतेन सर्व्वेणापि प्राणिना शारीरमानसानेकदुःखोपनिपातपीड़ितेन तदपनयनाय हेयोपादेये पदार्थपरिज्ञाने यत्नो विधेयः। स च न विशिष्टविवेकं विना । विशिष्टविवेकश्च न प्राप्ताशेषातिशयकलापाप्तोपदेशमन्तरेण । आप्तश्च रागद्वेषमोहादीनां दोषाणामात्यन्तिकप्रक्षयादेव । स च भगवान् जिन एव। अतस्तद्वचनानुयोगः प्रारभ्यते स चानुयोगः चतुर्व्विधः। धर्म्मकथानुयोगः। गणितानुयोगः। द्रव्यानुयोगः। चरणकरणानुयोगश्चेति। तत्र आचारादिकमेव चरणकरणानुयोग इति ज्ञेयं। अथ आचारोऽपि ज्ञानाचार-दर्शनाचार-चारित्राचार-वीर्य्याचारभेदादनेकविधः। तत्र आचाराङ्गस्य प्रथमे श्रुतस्कन्धे नवाध्याया वर्त्तन्ते। प्रथमाध्याये,—हिंसादिपरिहारेण जीवेषु संयमः कर्त्तव्यः। स च जीवास्तित्वपरिज्ञाने सति भवति। अत एवात्र विशेषेण जीवास्तित्वविरतिप्रतिपादनमिति ज्ञातव्यं। द्वितीयाध्याये,—विजितभावलोकेन संयमस्थितेन लोको यथा अष्टविधेन कर्म्मणा बध्यते, यथा च तत् प्रहातव्यं तथा ज्ञातव्यमितिनिरूपणं। तृतीयाध्याये,—संयमस्थितेन जितकषायेण अनुकूलप्रतिकूलोपसर्गनिपाते सुखदुःखतितिक्षा विधेयेतिनिरूपणं। चतुर्थाध्याये,—प्राक्तनाध्ययनार्थसम्पन्नेन तापसादिकष्टतपःसेविना अष्टगुणैश्वर्य्यमुद्दीक्ष्यापि दृढ़सम्यक्त्वेन भवितव्यमितिनिरूपणं। पञ्चमाध्याये,—चतुर्थाध्यायार्थस्थितेन असारपरित्यागेन लोकसाररत्नत्रयोद्युक्तेन भाव्यमितिविवेचनं। षष्ठाध्याये,—प्रागुक्तगुणयुक्तेन निःसङ्गतासम्पन्नेन अप्रतिबन्धेन भवितव्यमितिकथनं। सप्तमाध्याये,—संयमादिगुणयुक्तस्य कदाचिन्मोहसमुत्थाः परीषहाः उपसर्गा वा प्रादुर्भवेयुः, तदा अप्रमत्तेन ते सम्यक्सोढ़व्या इतिनिरूपणं। अष्टमाध्याये,—निर्य्याणक्रिया हि सर्व्वगुणयुक्तेन सम्यग्विधेयेतिनिर्णयः। नवमाध्याये,—अष्टाध्यायप्रतिपादितः सर्व्वोऽप्यर्थः

वर्द्धमानस्वामिना सम्यगेवं विहित इति तत्प्रदर्शनमुखेन शेषसाधूनामनुशास्त्यर्थं तस्य सम्यग्-विधानमेवावश्यकमिति सप्रपञ्चप्रपञ्चनमिति ।

No. 2986. आचाराङ्गसूत्रम्, (द्वितीयश्रुतस्कन्धः) । Substance, country-made paper, 12 × 4 inches. Folia, 150. Lines, 9 on a page. Extent, 3,712 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Mágadhí.

A'cháránga-sútra. The second part of the work noticed under the next preceding No.

Beginning. ॐनमः से भिक्खु वा भिक्खुणी वा गाहावइ कुलं पिंडवाय पडियाए अणुपविट्ठे समाणेसेज्जं पुणजणेज्जायसणं पावाणं वाखाइं——इत्यादि ।

End. इमं मिलोए परते यदो सुविण विज्जइ वंधणं जस्स किंचि विसेऊणिरा लंवणे अप्पतिट्ठिते कलंक+भावपहं विमुच्च इत्ति वेमि । विमुत्तीसम्मत्ता ।

Colophon. इति द्वितीयश्रुतस्कन्धः परिपूर्णः । आचाराङ्गसूत्रं समाप्तं ।

विषयः । प्रथमश्रुतस्कन्धे नव ब्रह्मचर्य्याध्ययनानि प्रतिपादितानि । तेषु खलु न समस्तो विवक्षितोऽर्थः अभिहितः । अतः संक्षेपेण अनभिहितार्थाभिधानाय पूर्व्वोक्तस्य विस्तारेण अनुक्तस्य च प्रतिपादनं । तत्र भिक्षुभिः नित्यानित्यदानयुक्तस्य आढस्य (गृहस्थस्य) गृहतः कदा कथं वा स्वोदरपूर्त्त्यर्थं पिण्डभिक्षा कर्त्तव्येति तद्विधिनिरूपणं । पिण्डविशुद्धिनिरूपणादिकीर्त्तनं । जुगुप्सितस्थाने भिक्षाग्रहणनिषेधकीर्त्तनं । अथ सम्पातभयात् राजकुलादिषु भिक्षुकस्य प्रवेशनिषेधकथनं । अथ भिक्षुकस्य दुग्धादिपानविधिकथनं । भिक्षादानप्रतिग्रहयोर्विधिकथनं । भिक्षुकस्य भोजनेतिकर्त्तव्यतादिकीर्त्तनं । तत्र भक्ष्याभक्ष्यनिरूपणं । भोजनस्थानादिनिरूपणं । अथ वसतिपिण्डयोरन्वेषणार्थं भिक्षुकस्य गमनं विधेयमितिकथनपूर्व्वकं तत्र यत्र यदा यथाविधेयं यथा च न विधेयमित्यादिनिरूपणं । वर्षाकालादौ भिक्षुकस्य इत्यादिविधिकथनं । भिक्षुकस्य ग्रामान्तरगमने विशेषनियमादिकथनं । तस्य वस्त्रादिनिरूपणं । महाव्रतभावनादिविधिकथनं । अनित्यताभावनाविधिकथनं । मोक्षादिनिरूपणञ्च ।

No. 2987. आचाराङ्गटीका, (प्रथमश्रुतस्कन्धः) । Substance, country-made paper, 12 × 4 inches. Folia, 488. Lines, 8—9 on a page. Extent, 11,382 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct. Sanskrit.

A'cháránga-ṭíká. A Sanskrit commentary on the work noticed under No. 2985. By S'íláñka A'chárya *alias* Tattváditya.

Beginning. ॐ नमः सर्व्वज्ञाय।

आचारशास्त्रं सुविनिश्चितं यथा
जगाद वीरो जगतो हिताय यः।
तथैव किञ्चिद्गदतः स एव मे
पुनातु धीमान् विनयार्पिता गिरः॥
शास्त्रपरिज्ञाविवरणमतिबहुगहनं च गन्धहस्तिकृतं।
तस्मात् सुखबोधार्थं गृह्णाम्यहमञ्जसासारं (?)॥

इह रागद्वेषाभिभूतेन सर्व्वणापि संसारिजन्तुना शारीरमानसानेक — — — — — गणधरैरथ्यत एव तस्यैवादौ प्रणयनमकार्य्यतः तत्प्रतिपादकस्याचाराङ्गस्यानुयोगः समारभ्यते। स च परमपदप्राप्तिहेतुत्वात् सविघ्नः। इत्यादि।

End. परमार्थपरमकार्य्यमनुत्तमं मोक्षस्थानं लिप्सुना अत्यर्थमालम्बनीयमिति।

Colophon. तदात्मकस्य ब्रह्मचर्य्याख्यश्रुतस्कन्धस्य निर्वृतकुलीनश्रीशीलाङ्केन तत्त्वादित्यापरनाम्ना वाहरिसाधुसहायेन कृता टीका परिसमाप्तेति।

विषयः। आचाराङ्गसूत्रस्य व्याख्यानम्।

No. 2988. आचाराङ्गटीका, (द्वितीयश्रुतस्कन्धः)। Substance, country-made paper, 12 × 4 inches. Folia, 221. Lines, 7 on a page. Extent, 3,666 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siṅh, Bahádur. Appearance, new. Prose. Correct. Sanskrit.

A'chárâṅga-ṭíká. The second part of the work noticed under the next preceding No.

Beginning. जयत्यनादिपर्य्यन्तविशेषगुणरत्नभृत्।

+हताशेषतीर्थेशं तीर्थं तीर्थाधिपैर्नुतं॥
नमः श्रीवीरनाथाय सदाचारविधायिने।
प्रणताशेषगीर्व्वाणचूडारत्नार्च्चिताङ्घ्रये॥
आचारमेरोर्गदितस्य लेशतः
प्रवच्मि तच्छेषिकचूलिकागतं।
प्रारिप्सितेऽर्थे गुणवान् कृती सदा
जायेत निःशेषमशेषितक्रियः॥

उक्तो नवब्रह्मचर्य्याध्ययनात्मक आचारश्रुतस्कन्धः। साम्प्रतं द्वितीयोऽग्रश्रुतस्कन्धः समारभ्यते—इत्यादि।

End. ज्ञानयोरपि ग्राह्याग्राह्यायोरर्थयोस्तथा यतितव्यमेवेति क्रियैवात्मसनो-येति। इति यो नयः सक्रियानयो नामेति — — — —।

Colophon, इत्याचार्य्यशीलाङ्कविरचितायां आचारटीकायां द्वितीयः श्रुतस्कन्धः समाप्तः। आचाराङ्गं सम्पूर्णं।

विषयः। आचाराङ्गसूत्रस्य व्याख्यानम्।

No. 2989. आचाराङ्गसुखावबोधः, (प्रथमश्रुतस्कन्धः।) Substance, country-made paper, 12 × 4 inches. Folia, 448. Lines, 10 on a page. Extent, 13,440 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct.

A'cháráñga-sukhávabodha. A Guzrati paraphrase of the work noticed under No. 2985. By Párśvachandra Upádhyáya.

Beginning. प्रणम्य श्रीजिनाधीशं श्रीगुरूणामनुग्रहात्।
लिख्यते सुखबोधार्थमाचाराङ्गार्थवार्त्तिकं॥
सुतरां शब्दशास्त्रेण येषां बुद्धिरसंस्कृता।
व्यामोहो जायते तेषां दुर्गमे वृत्तिविस्तरे॥
ततो वृत्तेः समुद्धृत्य सुलभो लोकभाषया।
धर्म्मलिप्सूपकारायाद्विभागार्थः प्रतन्यते॥

श्रीजिनशासने द्वादशाङ्गीसूत्रते वारअङ्गमाहि प्रथमाङ्ग श्रीआचाराङ्ग। जिणि कारणि मोक्षणा अङ्गज्ञानाचारादिकते इहां प्ररूपिये तिणिए श्रीआचाराङ्ग भणिये। तेह नावे श्रुत-स्कन्धतिहां। पहिले श्रुतस्कन्धे—इत्यादि।

End. इति वेमिश्रीसुधर्म्मस्वामी इमकहेंं जंबू प्रतें हुं। इमकह्रं जिम श्रीभग-वन्त समीपि सांभल्यं। इति उपधानश्रुताध्ययनस्य चतुर्थोद्देशकः समाप्तः।

Colophon. इति श्रीवृहत्तपागच्छे विहितसदाचारयत्नानां पण्डितशिरोरत्नानां श्रीसा-धुरत्नानां शिष्येण उपाध्यायपार्श्वचन्द्रेण कृते श्रीआचाराङ्गसुखावबोधे नवममध्ययनं समाप्तं।

विषयः। आचाराङ्गसूत्रस्य गुर्ज्जरभाषया व्याख्यानम्।

No. 2990. आचाराङ्गसुखावबोधः, (द्वितीयश्रुतस्कन्धः)। Substance, country-made paper, 12 × 4 inches. Folia, 300. Lines, 10 on a page. Extent, 9,592 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect.

A'chárán̉ga-sukhávabodha. A Guzrati paraphrase of the work noticed under No. 2986.

Beginning. नमः श्रीवर्द्धमानाय वर्द्धमानाय सद्‌गुणैः ।
श्रीमत्तीर्थाधिनाथाय भव्याम्भोरुहभास्वते ॥
आचाराङ्गे द्वितीयस्य श्रुतस्कन्धस्य वार्त्तिकं ।
वृत्तिभित्त्यनुसारेण लिख्यते गुर्व्वनुग्रहात् ॥

हिवे श्रीआचाराङ्गनुवीजो श्रुतस्कन्ध प्रारम्भियेछे । हितां पहिले श्रुतस्कन्धि नवब्रह्मचर्य्याध्ययनकह्या । तेहने विषेजे साधुनो आचारनथी । कह्यो हिवे ते आचार इणिश्रुतस्कन्धि विस्तारसहित कहीछे पहिले—इत्यादि ।

End. एतले ज्ञान अनेक्रियाए विहुने विषे स्थितसाधुर ज्ञानकरी सम्यक् भावजाणीक्रियाकरी — — — इति वचनात् ।

इति विमुक्त्यध्ययनं ।

Colophon. इति श्रीमद्‌बृहत्तपागच्छविहितश्रीसाधुरत्नानां शिष्येण पार्श्वचन्द्रेण कृते श्रीआचाराङ्गद्वितीयश्रुतस्कन्धसुखावबोधे विमुक्त्यध्ययनं समाप्तं । समाप्तमिदमाचाराङ्गसूत्रं ।

विषयः । आचाराङ्गसूत्रस्य गुर्ज्जरभाषया व्याख्यानम् ।

No. 2991. आचाराङ्गप्रदीपिका, (प्रथमश्रुतस्कन्धः) । Substance, country-made paper, 12 × 4 inches. Folia, 400. Lines, 8 on a page. Extent, 8,000 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct. Sanskrit.

A'chárán̉ga-pradípiká. A Sanskrit gloss on the first part of the Áchárán̉ga Sútra. By Jinahañsa Suri.

Beginning. शासनाधीश्वरो जीयद्वार्द्धमानो जिनेश्वरः ।
भवन्ति सुखिनो भव्या यदीयवाचनामृतैः ॥
शीलाङ्काचार्य्यरचिता वृत्तिरस्ति सविस्तरा ।
श्रीआचाराङ्गसूत्रस्य दुर्व्विगाहतरा ततः ॥
अनुग्रहार्थं सभ्यानां व्याख्यातृणां सुखावहा ।
श्रीजिनहंससूरीन्द्रैः क्रियतेऽस्य प्रदीपिका ॥

इह द्वादशानामङ्गानां प्रथमाङ्गं श्रीआचाराङ्गं । यतो ज्ञानाचारादीनां मोक्षाङ्गभूतानामिह प्ररूपणात् इत्यादि ।

End. अतोऽपरोऽपि साधुरनेनैव भगवता चीर्णेन पथा आत्महितमसाचरन् रीयते पराक्रमते इति सुधर्म्मस्वामी जम्बूस्वामिने कथयति ॥

इति उपधानश्रुताध्ययनस्य चतुर्थोद्देशकः समाप्तः ।

Colophon. इति श्रीजिनहंससूरिविरचितायामाचाराङ्गप्रदीपिकायां प्रथमश्रुतस्कन्धः परिसमाप्तः ।

विषयः । आचाराङ्गसूत्रस्य व्याख्यानम् ।

No. 2992. आचाराङ्गप्रदीपिका, (द्वितीयश्रुतस्कन्धः) । Substance, country-made paper, 12 × 4 inches. Folia, 256. Lines, 9 on a page. Extent, 6,024 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit.

A'cháránga-pradípiká. A Sanskrit gloss on the second part of the Acháránga Sútra.

Beginning. अथ उक्तो नवब्रह्मचर्य्याध्ययनात्मक आचारश्रुतस्कन्धः । साम्प्रतं द्वितीयोऽग्रश्रुतस्कन्धः समारभ्यते । तस्य चायमभिसम्बन्धः । आद्ये श्रुतस्कन्धे ब्रह्मचर्य्याध्ययनानि प्रतिपादितानि — — — — — संक्षेपोक्तस्य च प्रपञ्चाय तदग्रभूता उक्तानुक्ताधिकाग्रतश्चूड़ाः प्रतिपाद्यन्ते । तत्र पिण्डैषणाध्यायनादारभ्यावग्रहप्रतिमाध्ययनं यावदेवातिसप्ताध्ययनानि प्रथमावचूड़ा सप्तसप्तैकका द्वितीया चूड़ा भावना ——— इत्यादि ।

End. चरणगुणस्थितसाऽञ्चरणं । क्रिया गुणो ज्ञानं तद्वान् साधुर्मोक्षसाधनायालमिति तात्पर्य्यार्थः ॥

Colophon. इत्याचार्य्यजिणहंसविरचितायां आचाराङ्ग(प्र)दीपिकायां द्वितीयः श्रुतस्कन्धः समाप्तः । समाप्तश्चाचाराङ्गमिति ।

विषयः । आचाराङ्गसूत्रस्य व्याख्यानम् ।

No. 2993. साधुप्रतिक्रमणसूत्रम् । Substance, country-made paper, 12 × 4 inches. Folia, 8. Lines, 6 on a page. Extent, 108 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Generally correct. Mágadhí.

Sádhu-pratikramaṇa-sútra. Diurnal and nocturnal duties of Jain hermits. The rules about continence on their part. By Ratnaprabha Súri.

Beginning. नमो अरिहंताणं। कारेमि भंते सामाइयं। चत्तारि मङ्गलं। इच्छामि पड़िक्कमिउ॰। + गाम सिज्झाए। इत्यादि।

End. खामेमि सव्वे जीवे। सव्वे जीवा खमंतु मे। मित्तीमे सव्व भूएसु। वेरं मज्भन केणय। एवमहं आलोइय निंदिय गरहिय। दुगं विय। सम्मंतिविहेण पड़िक्कंतो वंदामि जिणे चउवीसं॥

Colophon. इति साधुप्रतिक्रमणसूत्रं समाप्तं।

विषयः। जैनसाधूनां दिनचर्य्याविधिकथनं। रात्रिचर्य्याविधिकथनञ्च। तत्र तेषां ब्रह्मचर्य्यादिनियमविधानकीर्त्तनञ्च।

No. 2994. साधुप्रतिक्रमणसूत्रावचूर्णिः। Substance, country-made paper, 12 × 4 inches Folia, 16. Lines, 10 on a page. Extent, 420 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Generally correct. Sanskrit.

Sádhupratikramaṇa-sútravachúrṇi. A gloss on the Sádhupratikramaṇa-sútra. Anonymous.

Beginning. अथ साधुप्रतिक्रमणसूत्रस्यावचूरिर्लिख्यते। यथा, नमस्कारपूर्व्वकं करेमि भंते इत्यादि पठति। समभावस्थेनैव प्रतिक्रान्तव्यमिति ज्ञापनार्थं ततो मङ्गलपूर्व्वकं प्रतिक्रमणं भवतीति। इत्यादि।

End. ननु रात्रिप्रतिक्रमणे। इच्छामि पड़िक्कमिउ॰। गोअरचरिआए इत्यादि-सूत्रमनर्थकं रात्रावस्यासम्भवात्। उच्यते स्वप्नादौ सम्भवाददोष इति।

Colophon. इति साधुप्रतिक्रमणावचूर्णिः।

विषयः। साधुप्रतिक्रमणसूत्रस्य व्याख्यानम्।

No 2995. सिद्धान्तचन्द्रिका। Substance, country-made paper, 12 × 4 inches. Folia, 38. Lines, 8 on a page. Extent, 732 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Paṇḍit S'yámalála Duve. Appearance, old. Prose. Incorrect.

Siddhánta-chandriká. On the rationale of Vedantic emancipation. By Ananta Bhaṭṭa.

Beginning. नमस्कृत्य महेशानं सच्चिदानन्दविग्रहं ।
क्रियतेऽनन्तभट्टेन रम्या सिद्धान्तचन्द्रिका ॥

इह खलु आत्मा वारे श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्चेति श्रुत्या आत्मनः श्रवणादिकं कर्त्तव्यतया प्रतीयते । इत्यादि ।

End. तदा अखण्डचिद्घनतया ब्रह्मस्वरूपतया च जीवस्य निरस्तनिखिलमायोपाधिस्वरूपोऽपवर्गो भवतीति सर्व्वं समञ्जसमिति शं ।

Colophon. श्रीमदनन्तभट्टकृतौ सिद्धान्तचन्द्रिका परिपूर्णा ।

विषयः । श्रवणमननादिविधिविवेचनं । आत्मस्वरूपादिनिरूपणं । जीवस्य ब्रह्मप्रतिबिम्बत्वकथनं । एकजीववादकथनमुखेन जीवानन्त्यवादनिरसनं । जीवस्य शुद्धचैतन्यस्वरूपत्वेऽपि उपाधिकृतमालिन्यादिकथनं । ब्रह्मणो निर्व्विशेषत्वादिकथनं । उपाधिस्वरूपादिकथनं । मायाविद्यास्वरूपादिकथनं । पञ्चकोषविवेचनं । सूक्ष्मशरीरादिनिरूपणं । देहात्मवादादिखण्डनं । प्रत्यक्षानुमानोपमानशाब्दादिषट्प्रमाणलक्षणादिकथनं । तत्त्वज्ञानोपायकथनं । मोक्षस्वरूपादिकीर्त्तनञ्च ।

No. 2996. सङ्घपट्टकशास्त्रम् । Substance, country-made paper, 12 × 4 inches. Folia, 8. Lines, 6 on a page. Extent, 108 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Sanskrit.

Saṅgha-paṭṭaka-śástra. On the necessity on the part of a Jain hermit to affiliate himself to some monastery or other, and on Jain duties. By Jinavallabha Súri.

Beginning. वह्निज्वालावलीढं कुपथमथनधीर्मातुरस्तोकलोक-
स्याग्रे सन्दर्श्य नागं कमठमुनितपः स्फुटयन् दुःखमुच्चैः ।
यः कारुण्यामृताब्धिर्विधुरमपि किल स्वस्य सद्यः प्रपद्य
प्राज्ञैः कार्य्यं कुमार्गस्खलनमिति जगादैव देवं स्तुमस्तम् ॥
कल्याणाभिनिवेशवानिसि गुणग्राहीति मिथ्यापथ-
प्रत्यर्थीति विनीत इत्यशठ इत्यौचित्यकारीति च ।
दाक्षिण्यीति दमीति नीतिभृदिति स्थैर्य्यीति धैर्य्यीति स-
द्धर्म्मार्थीति विवेकवानिति सुधीरित्युच्यसे त्वं मया ॥ इत्यादि ।

End. जिनपतिमतदुर्गं कालतः साधुवेशै-
विंषयिभिरभिभूते भस्म + + + सैन्यैः।
स्ववशजड़जनानां प्रट्टलेव स्वगच्छे
स्थितिरियमधुना तैरग्रथिस्वार्थसिद्ध्यै॥
सम्प्रत्यप्रतिमे कुसङ्गवपुषि प्रोज्जृम्भते भस्मक
+ च्छातुच्छबले दुरन्तदशमाश्चर्य्ये च विस्फूर्जिते
प्रौढ़िं जग्मुषि मोहराजकटके लोकैस्तदाज्ञापरै-
रेकीभूय सदागमस्य कथयापीत्यं कदर्थ्यामहे॥

Colophon. इति श्रीजिनवल्लभसूरिविरचितं संघपट्टकशास्त्रं समाप्तम्।

विषयः। वैराग्योपदेशकथनमुखेन जैनसाधूनां सङ्घाश्रयस्य अवश्यकर्त्तव्यताकथनपुरः-सरं जैनधर्म्ममाहात्म्यकीर्त्तनम्।

No. 2997. अणुओगदारम् सूत्तम्। अनुयोगद्वारम् सूत्तम्। Substance, country-made paper, 12 × 4 inches. Folia, 150. Lines, 6 on a page. Extent, 2,010 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Arddha Mágadhí.

Anuögadára. (Sanskrit, *Anuyogadvára*). On devotion to Jainism, a treatise on Jaina doctrines and beliefs.

Beginning. नाणं पञ्चविहं पन्नत्तं तजहा आभिणिबोहियणाणं सुयनाणं ओहि-याणं मणपज्जवनाणं केवलनाणं। तत्थ चत्तारि नाणाइं ठप्पाइं। इत्यादि।

End. णगरमहादारारइ चउवक्क मदाराण उवगरव दारा अकख विन्दुमत्ता लिहिया दुक्खक्ख यढ़ढाए॥

Colophon. अणुओगदारं सुत्तं समत्तं।

विषयः। इह खलु सकलमनोभिलषितार्थसार्थसंसाधकत्वेन यथोक्तसमग्रसामग्रीफल-त्वात् परमार्थमर्थयमानैः जिनवचनानुयोगकरणे यथामति यतितव्यं। स च अनुयोगो यद्यपि विविधप्रबन्धविषयः सम्भवति तथापि प्रतिशास्त्रं प्रत्यध्ययनं प्रतिवाक्यं प्रतिपदञ्च उपकारि-त्वात् प्रथममनुयोगोऽयं विविच्यते। तत्र ज्ञायते परिच्छिद्यते वस्त्वनेन अस्मादस्मिन् वा ज्ञानं। तच्च ज्ञानावरणकर्म्मक्षयोपशमक्षयजन्यो जीवस्वतत्त्वभूतो बोध इत्यर्थः। अथ ज्ञानं पञ्चविधं। आभिनिबोधिकं ज्ञानं श्रुतज्ञानं अवधिज्ञानं मनःपर्य्यायज्ञानं केवलज्ञानञ्चेति। तत्र अभि-निबुध्यते आत्मना स इत्याभिनिबोधः। स एव आभिनिबोधिकमिति ज्ञेयं। तच्च ज्ञानं

इन्द्रियपञ्चकमनोनिमित्तो बोध इत्यर्थः। अथ श्रुत नाम अभिलापप्लावितार्थग्रहणस्वरूप उपलब्धिविशेषः। अवधिरवधानं इन्द्रियाद्यनपेक्षमात्मनः साक्षादर्थग्रहणम्। अथ संज्ञिभिर्जीवैः काययोगेन मनोवर्गणाभ्यो गृहीतानि मनोयोगेन मनस्त्वेन परिणमितानि द्रव्याणि मनांसीति व्यपदिश्यते। तेषां मनसां पर्य्यायाश्चिन्तनगुणाः परिणामाः, तेषु ज्ञानं मनःपर्य्यायज्ञानं। अथ केवलं सम्पूर्णज्ञेयविषयत्वात् सम्पूर्णमिति ज्ञानं। तत्र पञ्चसु ज्ञानेषु प्रायः श्रुतज्ञानमेव लोकस्य हेयोपादेयेष्वर्थेषु निवृत्तिप्रवृत्तिद्वारेण श्रुतज्ञानमेव साक्षादुपकारि। अथ गुरोः सकाशात् श्रुतज्ञानानुयोगविधिकथनं। तत्र स्वाभिधायकसूत्रेण सह अर्थस्य अनुगीयते अनुकूलो वा योगोऽस्येदमभिधेयमित्येवं संयोज्य शिष्येभ्यः प्रतिपादनमनुयोग इति ज्ञेयं। अथ अनुयोगाधिकारिनिरूपणं। अथ ज्ञापिकपरिषत्, अज्ञापिकपरिषत्, दुर्व्विदग्धपरिषच्चेति तिस्रोऽनुयोगस्य परिषद इति निरूपणं। निःक्षेपादिस्वरूपकथनं। नामादिलक्षणकथनं। स्थापनालक्षणादिकथनं। पर्य्यायस्वरूपादिविवेचनं। वाचनाप्रच्छनादीनां लक्षणादिकथनं। नैगमस्वरूपादिकथनं। नयनिरूपणं। शरीरलक्षणादिकथनं। तत्र राज-तलवर-माण्डलिक-चक्रवर्त्ति-वासुदेव-कौटुम्बिक श्रेष्ठि-सार्थवाहादिलक्षणकथनं। अथ नामश्रुत-स्थापनाश्रुत-द्रव्यश्रुत-भावश्रुतरूपशब्दार्थचतुष्टयनिरूपणं। सामान्यतः श्रुतस्य द्वादशाङ्गनिरूपणं। अथ नाम-द्रव्यादिस्कन्धनिरूपणं। तत्र गणकाय-निकाय-राशि-पुञ्ज-पिण्ड-निकर-सङ्घातादिस्वरूपकथनं। अथ व्रणचिकित्सा-कायोत्सर्गादिनिरूपणं। अथ परमाणुद्व्यणुकादिनिरूपणं। पुद्गलादिस्वरूपकथनं। सप्तभङ्गनयस्वरूपादिकथनं। अस्तिकायस्वरूपादिकथनं। अथ दर्शन-ज्ञान-चारित्राणां सम्यक्त्वनिरूपणं। तत्र पुरुषार्थसिद्धेः ज्ञानक्रियोभयनिबन्धनत्वनिरूपणम्।

No. 2998. अनुयोगद्वारसूत्रबालावबोधः। Substance, country-made paper, 12 × 4 inches. Folia, 332. Lines, 8 on a page. Extent, 7,944 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Correct. Gujaráṭí.

Anuyogadvára-sútra-bálávabodha. A Sanskrit gloss on the work noticed under the next preceding No. By Máhana *alias* Somarshi Díkshita.

Beginning. प्रणिपत्य जिनं मूर्द्ध्ना सर्व्वज्ञं सर्व्वदर्शिनं।
बालानामुपकाराय वक्ष्ये तु योगवार्त्तिकं॥

श्रीदेवगुरूंश्च नमस्कृत्य अनुयोगद्वारसिद्धान्तस्य बालावबोधोऽल्पमतिनापि मया मत्तो हीनतरप्रज्ञानामुपकाराय विधीयते इति। श्रीअनुयोगद्वारसूत्रनो अर्थसंस्कृतभाषाये केतला

एकने पृच्छतां दोहिलोछे तेभणी वार्त्तिकलोकभाषाये श्रीअनुयोगद्वारसिद्धान्तनो अर्थ आपणी मतिने अनुसारे जिमछति मांहिके तिम देखीने प्रारम्भो येके हिवे । इत्यादि ।

End. ते चारि अनुयोगद्वारनी समाप्तियातां श्रीअनुयोगद्वारसूत्रपणि समाप्तयथं ।

इति श्रीजीवर्षिक्रमाम्भोजमधुलिहाश्रीमर्षिदीचितेन मोहननाम्ना विरचितोऽयमनुयोगद्वारसिद्धान्तबालावबोधः ।

Colophon. इति अनुयोगद्वारसूत्रबालावबोधः समाप्तः ।

विषयः । अनुयोगद्वारसूत्रस्य गुर्ज्जरभाषया व्याख्यानम् ।

No. 2999. नयनिरूपणम् । Substance, country-made paper, 12 × 4 inches. Folia, 4. Lines, 10 on a page. Extent, 77 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Sanskrit.

Naya-nirúpaṇa. Logical theses—a Nyaya treatise. Anonymous.

Beginning. अथ नयाः सप्त । नैगमः, सङ्ग्रहः, व्यवहारः, ऋजुसूत्रं, शब्दः, समभिरूढः, एवंभूतरीतिरिति । अत्र नयविचारे महाननर्थोऽस्ति, तथापि लेशतो लक्षणं दर्श्यते ।

End. केश्चिद्द्रव्यार्थिकतयापि स्वीक्रियते । अत्र एकैकनये एवावस्थानं मिथ्यात्वं सर्व्वनयास्वीकारे सम्यक्तमिति ।

Colophon. इति नयनिरूपणं ।

विषयः । अथ शब्दार्थभेदेन नयास्तावद्द्विविधाः । तत्र नैगम-सङ्ग्रह-व्यवहार-ऋजुसूत्रभेदात् अर्थनयाः चतुर्विधाः । शब्दनया अपि शब्द-समभिरूढ-भूतभेदेन त्रिविधाः । तत्र नैगमस्वरूपं,—इह हि वस्तूनामनन्ता धर्म्माः सन्ति । ते च विविच्यमाना द्विधा भवन्ति सामान्यरूपा विशेषरूपाश्चेति । यथा जीवेषु वस्तुत्वप्रमेयत्वादयः सामान्यधर्म्माः तथा च्येषां धर्म्माणां अजीवेष्वपि उपलम्भात् । जीवेषु तु चेतनावत्त्वं विशेषधर्म्मः । धर्म्मस्यास्य अजीवेष्वप्राप्तेः । अथ नैगमे सामान्यधर्म्मैः विशेषधर्म्मैश्च कालत्रयेऽपि समाना पदार्थप्ररूपणा कार्य्या । यथाच सामान्यविशेषधर्म्मैः नैगमनय उपलक्ष्यते तथा निवासदृष्टान्त उपदर्शितः । एवंक्रमेणान्यान्यनयस्वरूपविवेचनम् ।

No. 3000. पार्श्वप्रभुस्तवनम् । Substance, country-made paper, 12 × 4 inches. Folium, 1. Lines, 12. Extent, 13 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Correct.

Párśva-prabhu-stavana. A hymn in praise of Párśvanátha. By Samayasundara Súri. The peculiarity of this hymn is, that the first half of every foot of it is in vernacular and the other half in Sanskrit.

Beginning. भले आज भेट्यां प्रभोः पादपद्मं। फली आस मोरी नितान्तं विपद्मं(?)।
गयूं दुःखनाशो पुनः सौम्यदृष्ट्या खयूं सुखजाउं यथा मेघदृष्ट्या॥
जिकेयास केरी करिष्यन्ति भक्तिं तिके धन्यवाह्ममनुष्याः प्रसक्तिं।
भलो आज वेला मया वीतरागाः खुसीमां हि भेट्या नमद्देवनागाः।
तुम्हे विश्वमाहे महाकल्पवृक्षाः तुम्हे भव्यलोकां मनोभीष्टदक्षाः।
तुम्हे मायवापप्रियास्वामिरूपाः तुम्हे देवमोढा स्वयम्भूस्वरूपाः॥ इत्यादि।

End. इति स्तुतिं सज्जनसत्कृताभ्यां तव प्रभो वार्त्तिकसंस्कृताभ्यां।
त्वत्पादपद्मप्रणमत्पुरन्दरः श्रीपार्श्व चक्रे समयादिसुन्दरः॥

Colophon. इति पार्श्वप्रभुस्तवनं समाप्तं।

विषयः। अर्द्धप्राकृतार्द्धसंस्कृतश्लोकेन भगवतः पार्श्वनाथजिनेन्द्रस्य स्तोत्रव्याजात् माहात्म्यकथनं।

No. 3001. प्रतिष्ठाविधिः। Substance, country-made paper, 12 × 4 inches. Folia, 91. Lines, 9 on a page. Extent, 2,126 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect. Sanskrit and Mágadhí.

Pratishṭhá-vidhi. On the consecration of Jain images and temples, and the rituals appropriate for a variety of Jain rites.

Beginning. प्रणम्य श्रीमहावीरं लब्धसामग्रीसंयुतं।
जिनबिम्बस्य प्रतिष्ठापूजां वक्ष्ये प्रधानतः॥
विनीतो बुद्धिमान् प्रीतो न्यायोपात्तधनो महान्।
शीलादिगुणसम्पन्नः श्राद्धो ह्यत्र प्रशस्यते॥
देशकालादिभावज्ञो निर्म्ममः शुद्धमानसः।
श्रद्धानादिगुणोपेत + + कः सोऽत्र शस्यते॥ इत्यादि।

End. इत्येवं खेचरेन्द्रप्रबलबलयुते दोषमुक्तेऽवलग्ने
शास्त्रोद्देशानुसारिस्फुटशकुनबलेत्युत् + कजागरूके॥
पीयूषांशुप्रवाहे चितिसलिलगतो काय्यमाचय्य ते ये-

स्तेषामक्षीणलक्ष्मी परिचयरुचिरा चामराः सम्भवन्ति ॥
अर्पितमनर्पितवस्तु तत्त्वमुदितं नयद्वयादेकं ।
यैस्ते सद्भूतगिरो कृताभिषेका जयन्ति जिनाः ॥

इति प्रतिष्ठादीक्षामुहूर्त्तविधिः । — — — — — — — — —

Colophon. इति श्रीप्रतिष्ठाविधिः सम्पूर्णः ॥

विषयः । जिनप्रतिमादिप्रतिष्ठाविधिकथनं । तत्र श्राद्ध (गृहस्थ) लक्षणकथनं । आचार्य्यलक्षणकथनं । जिनबिम्बनिर्म्माणादिफलकथनं । ऋषभनामादिचतुर्व्विंशतिसंख्यकजिनानां मध्ये गृहस्थस्य कस्यचित् जिनबिम्बस्य निजवास्तव्यगृहस्थापने दोषकथनं । बिम्बप्रतिष्ठाप्रकारकथनं । तत्र अभिषेकविधिकथनं । वेदिकानिर्म्माणादिविधिकथनं । कुम्भस्थापनादिविधिकथनं । जलयात्राकरणविधिकथनं । प्रतिष्ठायोग्योपकरणविधिकथनं । नन्द्यावर्त्तादिनिर्म्माण-तत्पूजनादिविधिकथनं । मरुदेवी-विजयाप्रभृतीनां जिनजननीनां पूजाविधिकथनं । रोहिण्यादिषोड़शविद्यादेवीनां पूजाविधिकथनं । आदित्यादिलोकान्तिकदेवपूजाकथनं । इन्द्रादीनां दिक्पालानां पूजाविधिकथनं । नवग्रहपूजाविधिकथनं । एवं व्यन्तरलोकवैमानिकलोकदेवादिपूजाकथनं । क्षेत्रपालादिपूजाविधिकथनं । ब्रह्मलोकदिक्पालपूजाविधिकथनं । भूतबलिविधिकथनं । अङ्गन्यासादिविधिकथनं । अष्टदलपद्मे पूजाविधिकथनं । शान्तिघोषणस्तुतिकथनं । षोड़शाभरणदानेन पूजाविधिकथनं । करन्यासादिविधिकथनं । धर्म्माचार्य्यपूजनविधिकथनं । सकलीकरणादिविधिकथनं । दिक्कुमार्य्युत्सवविधिकथनं । इन्द्रमहोत्सवविधिकथनं । जिनबिम्बस्नपनविधिकथनं । तत्र अष्टादशविधस्नानप्रकारकथनञ्च । जिनबिम्बस्य पुरतः लेखनीमस्याधारणादिदानविधिकथनं । विवाहदीक्षाग्रहणादिविधिकथनं । एवं दशाहं यावत् यथोक्तविधानेन जिनबिम्बप्रतिष्ठा भवतीतिनिरूपणं । अथ देवीप्रतिष्ठाविधिकथनं । तत्र देव्यस्त्रिधा । प्रासाददेव्यः, सम्प्रदायदेव्यः कुलदेव्यश्चेति । तत्र प्रत्येकं प्रतिष्ठाविधिकथनं ; अथ जैनमन्त्रदीक्षाविधिकथनं । अथ सिद्धचक्राराधनविधिकथनं । अथ ज्ञानपञ्चम्यां चैत्यवन्दनविधिकथनं । प्रतिक्रमणादिविधिकथनं । ब्रह्मचर्य्यादिव्रतविधिकथनं । सङ्कमालारोपणविधिकथनं । सामान्यतः प्रतिष्ठालग्नादिनिरूपणञ्च ।

No. 3002. पिण्डविशुद्धिबालावबोधः । Substance, country-made paper. 12 × 4 inches. Folia, 29. Lines, 13 on a page. Extent, 1,158 ślokas, Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Gujaráṭí.

Piṇḍa-visuddhi-bálávabodha. A Guzraṭi paraphrase of Jinavallabha Súri's treatise on the purity of food *Piṇḍavisuddhi.*

Beginning. श्रीमद्वीरजिनेशं नत्वा श्रीसोमसुन्दरगुरूंस्च ।
पिण्डविशुद्धिबालावबोधरूपं तनोम्यहं ॥
देविंद्रवंद्रवंदिय पयारविंदेभि वन्दिग्र जिणिंदे ।
वुच्छामि सुविहिय हियं पिंडविसोहिं समासेणं ॥

देवताना इंद्र स्वामी । तेहना इंद्र । समूह । ते देकरी । वंदित । वांदिश्रो पादारविन्द । पद्कमल । इत्यादि ।

End. आचार्य्य एग्रन्थ शोधिवश्रो । इम श्रीजिनवल्लभसूरिसिद्धान्तनाजाण + + + + पणइ बोलइ इइ । इस्यूजाणिवश्रो ।

Colophon. इति तपागच्छनायकश्रीसोमसुन्दरसूरिशिष्यविजयमानभट्टारकप्रभुश्रीरत्नशेखरसूरिशिष्येण संवेगदेवगणिना समर्थितः पिण्डविशुद्धिबालावबोधः सम्पूर्णः ।

विषयः । जिनवल्लभसूरिविरचितस्य पिण्डविशुद्धिनामकप्रकरणस्य गुर्ज्जरभाषया व्याख्यानम् ।

No. 3003. सूत्रकृताङ्गटीका, (द्वितीयश्रुतस्कन्धस्य ।) Substance, country-made paper, 12 × 4 inches. Folia, 288. Lines, 12 on a page. Extent. 10,146 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct. Sanskrit.

Sútrakritáñga-ṭíká. A commentary on the Sútrakritáñga Sítra. By S'íláchárya, assisted by Kaharí Gaṇi. The MS. includes only the second part of the work.

Beginning. प्रथमश्रुतस्कन्धानन्तरं द्वितीयः समारभ्यते । अस्य चायमभिसम्बन्धः । इहानन्तरश्रुतस्कन्धे योऽर्थः समासतोऽभिहितोऽसावेवानेन श्रुतस्कन्धेन सोपपत्तिको व्यासेनाभिधीयते । त एव विधयः सुसंग्रहीता भवन्ति । येषां समासव्यासाभ्यामभिधानमिति । यदि पूर्व्वश्रुतस्कन्धोक्त एवार्थोऽनेन दृष्टान्तद्वारेण सुखावगमार्थं प्रतिपाद्यते—इत्यनेन सम्बन्धेनायातस्यास्य श्रुतस्कन्धस्य सम्बन्धीनि सप्त महाध्ययनानि प्रतिपाद्यन्ते । इत्यादि ।

End. एतदुभययुक्त एव साधुरभिप्रेतमर्थं साधयत्युक्तञ्च । सव्वेसिं पिणयाणं बहुविह वत्तव्वयं णिसामेत्ता । तं सवणयविसुद्धं जं चरणगुणट्ठिश्रो साहू ॥

समाप्तमिदं नालन्दाख्यं सप्तममध्ययनं ।

Colophon. इति समाप्तेयं सूत्रकृतद्वितीयाङ्गस्य टीका । कृता चेयं शीलाचार्य्येण वाहरिगणिसहायेन ॥

विषयः । सूत्रकृताङ्गाभिधानजैनसूत्रस्य द्वितीयश्रुतस्कन्धीयव्याख्यानम् ।

No. 3004. उद्वाहचन्द्रिका । Substance, country-made paper, 14 × 5 inches. Folia, 28. Lines, 9 on a page. Extent, 692 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Paṇḍit S'yámalála Duve. Appearance, decayed. Prose and verse. Correct.

Udváha-chandriká. On the laws relating to marriage. By Govardhana Upádhyáya.

Beginning. नवीननीरदश्यामं रामं राजीवलोचनं ।

प्रणम्य क्रियते रम्या पाणिपीड़नचन्द्रिका ॥

तच गौतमः । गृहस्थः सदृशीं भार्य्यां विन्देतानन्यपूर्व्वां यवीयसीं ।

याज्ञवल्क्यः । अविप्लुतब्रह्मचर्य्यो + लक्षण्यां स्त्रियमुद्वहेत् । अनन्यपूर्व्विकां कान्तामसमानर्षगोत्रजां ।

अरोगिणीं भ्रातृमतीमसपिण्डां यवीयसीं । इत्यादि ।

End. गर्भाधानविहीनानां स्त्रीणां कर्म्माधिकारिता ।

भर्त्तॄणां विषये नैव म्रियमाणेषु तेष्वपि ॥

इति शौनकोक्तेरिति शम् ।

Colophon. इत्युपाध्याय श्रीगोवर्द्धनविरचिता उद्वाहचन्द्रिका समाप्ता ।

विषयः । ब्रह्मचर्य्यानन्तरं दारपरिग्रहविधिकथनं । विवाहस्य नित्यत्वादिनिरूपणं । विवाहलक्षणादिविवेचनं । अष्टविधविवाहभेदनिरूपणं । ब्राह्मेतराणां विवाहानां कलौ वर्ज्जनीयत्वादिकथनं । विवाहयोग्यकन्यालक्षणादिनिरूपणं । अधिवेदनादिविधिविवेचनं । वरलक्षणादिनिरूपणं । कन्यादानादिविधिकथनं । कुशण्डिकादिविधिकथनं । दाम्पत्यधर्म्मकथनं । विशेषेण स्त्रीधर्म्मकथनं । सापिण्ड्यादिनिरूपणञ्च ।

No. 3005. जीवाभिगमटीका । Substance, country-made paper, 12 × 4 inches. Folia, 224. Lines, 19 on a page. Extent, 8,299 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Jívábhigama-ṭíká. A gloss on the Jain sútra entitled Jívábhigama. By Malayagiri.

Beginning. नमः श्रीसर्व्वज्ञाय ।

प्रणमत पदनखतेजःप्रतिहतनिःशेषनस्रजनतिमिरं ।

वीरं परतीर्थियशोद्विरदघटाध्वंसकेशरिणं ॥

प्रणिपत्य गुरून् जीवा जीवाभिगमस्य वृत्तिमहमनघां ।
विदधे गुरुप्रसादवशात् विबोधमातुमणधियां (?) ॥

इह रागद्वेषाद्यभिभूतेन सांसारिकेण सत्त्वेनाविमत्त्यशारीरमानसिकदुःखोपनिपातनिपीड़ितेन तदपनोदाय हेयोपादेयपदार्थपरिज्ञाने यत्न आस्थेयः । स च विशिष्टविवेकप्रतिपत्तिमन्तरेण न भवति । इत्यादि—

End. जयति प्रस्फुटविमलज्ञानविभावितसमस्तवस्तुगुणः ।
प्रतिहतपरतीर्थमतः श्रीवीरजिनेश्वरो भगवान् ॥
सरस्वती तमोवृन्दमिन्दुज्योत्स्नेव निघ्नती ।
नित्यं वो मङ्गलं दिश्यान्मुनिभिः पर्य्युपासिता ॥
जीवाभिगमं सूत्रं विवृण्वता + पि मलयगिरिणेह ।
कुशलं तेन लभन्तां मुनयः सिद्धान्तसम्बोधं ॥

Colophon. इति श्रीमलयगिरिविरचिता जीवाभिगमटीका सम्पूर्णा ।

विषयः । जीवाभिगमनामधेयजैनसूत्रस्य व्याख्यानम् ।

No. 3006. आवश्यकसूत्रम् । Substance, country-made paper, 12 × 4 inches. Folia, 115. Lines, 11 on a page. Extent, 3,576 slokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Generally correct. Mágadhí.

Ávasyaka-sútra. A compilation from the leading Sútra texts treating of the principles of the Jain faith and rituals. By Sudharmá Svámi. The work is highly prized on account of its fullness.

Beginning. जयइ जगजीवजोणी वियाणओ जगगुरुजगाणंदो ।
जगणाहो जगवन्धू जयइ जगपियामहो भयवं ॥
जयइ सुआणं पभवो तित्थयराणं अपच्छिमो जयइ ।
जयइ गुरुलोगाणं जयइ महप्पा महावीरो ॥ इत्यादि ।

End. सव्वेसिं पिनयाणं बहुविहव + ध्वं निसामेत्ता ।
तं सव्वनयविसुद्धं जं चरणगुणट्ठिओ साहू ॥

पच्चक्खाणनिज्जुत्ती सम्मत्ता ।

Colophon. इति श्रीआवश्यकसूत्रं समाप्तं ॥

विषयः । ज्ञानादिस्वरूपनिरूपणं । कायिकवाचिकादियोगनिरूपणं । तत्र औदारिकवैक्रिय-आहारक-तैजस-कार्मणभेदेन कायिकस्य पञ्चविधत्वादिनिरूपणं । जीवस्वरूपकथनम्-

खेन जीवात्मप्रदेशादिनिरूपणं। क्षेत्रस्वरूपादिनिरूपणं। अवगाहनादिस्वरूपनिरूपणं। अथ मतिश्रुत्यवधिमनःपर्य्यायभेदेन पञ्चविधज्ञानकथनं। वर्गणास्वरूपादिकथनं। ज्ञानद्वारनिरूपणं। अवधिभेदनिरूपणं। बलद्वारादिनिरूपणं। एवं प्रतिपात-क्षेत्रादिद्वारनिरूपणं। अनुयोगभेदनिरूपणं। वक्तव्यतादिभेदनिरूपणं। निर्य्युक्त्यनुगम-सूत्रानुगमरूपद्विविधानुगमस्वरूपादिनिरूपणं। अथ सामायिकनिर्युक्तिनिरूपणं। तत्र विनेयस्य सा भूदेकान्तेनैव ज्ञाने अनादरः क्रियायाञ्च तच्छून्यायामपि पक्षपात इत्यतो द्वयोरपि केवलयोरभीष्टफलसाधकत्वनिरूपणं। आचार्य्यशिष्ययोर्गुणदोषनिरूपणं। निर्व्वाणगमनविधिप्रतिपादनं। नवगणधरविवरणादिकथनं। विशेषेण जन्मद्वार-गोत्रद्वार-कालद्वारादिनिरूपणं। तत्र तत्र सत्वसिद्ध-याचासिद्ध-तपःसिद्धादिनिरूपणं। अथ जीवहितकथनमुखेन संयमादिनिरूपणं। तत्र समग्रसंयमभारोद्वहनात् वृषभ इत्यादिक्रमेण चतुर्व्विंशतिजिनानां नामनिर्व्वचनादिकथनं। जिनवन्दनादिविधिनिरूपणं। साधुवन्दनादिविधिनिरूपणं। प्रतिक्रमणविधिकथनं। कायोत्सर्गविधिकथनं। प्रत्याख्यानविधिकथनं। दशविधगुणव्रतविधानकथनं। प्रत्याख्यातादिशुद्धिनिरूपणञ्च।

No. 3007. शिष्यहिता। Substance, country-made paper, 12 × 4 inches. Folia, 444. Lines, 15 on a page. Extent, 24,088 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj. Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Incorrect. Sanskrit.

Síshyahitá. An elaborate commentary on the work noticed under the next preceding No. By Haribhadra. The work is commonly called Avaśyskaṭiká.

Beginning. प्रणिपत्य जिनवरेन्द्रं वीरं श्रुतदेवतां गुरून् साधून्।
आवश्यकविवृत्तिर्गुरूपदेशादहं वक्ष्ये॥
यद्यपि मया तथान्यैः कृतास्य विवृतिस्तथापि संक्षेपात्।
त+ चि सत्वानुग्राहहेतोः क्रियते प्रयासोऽयम्॥

इहावश्यकप्रारम्भोऽयुक्तः। प्रयोजनादिरहितत्वात् कण्टकशाखामर्दनादिवत्। इत्येवमाद्याशङ्कापनोदाय प्रयोजनादि पूर्व्वं प्रदर्श्यत इत्युक्तञ्च प्रेक्षावतां प्रवृत्त्यर्थं फलादित्रितयं स्फुटं— इत्यादि।

End. भावनिःक्षेपमिच्छतीतिगाथार्थः। शिष्यहितायां प्रत्याख्यानविवरणं समाप्तमिति॥

व्याख्यायाध्ययनमिदं यदवाप्तमिह शुभं मया पुण्यम्।
शुद्धं प्रत्याख्यानं लभतां भव्यो जनस्तेन॥

Colophon. समाप्ता चेयं शिष्यहिता नामावश्यकटीका।

विषयः। आवश्यकाभिधानजैनसूत्रग्रन्थस्य व्याख्यानम्।

No. 3008. मुद्राराक्षसटीका। Substance, country-made paper, 11 × 5 inches. Folia 50. Lines, 6 on a page. Extent, 863 ślokas. Character, Nágara. Date, ? Place of deposit, Siñgura, Zillá Vírabhúma, Pratápachandra Bhaṭṭáchárya. Appearance, fresh. Prose and verse. Correct.

Mudrá-rákshasa-ṭíká. This is a two-fold work, first, a metrical paraphrase of the story of Viśákhadatta's drama, entitled Mudrárákshasa, second, gloss on the text of Viśákhadattra. By Dhuṇḍhivyása.

Beginning. सिन्दूरारुणगण्डमण्डलमदामोदभ्रमद्भृङ्गिका-
झङ्कारेण कलेन कर्णमुरजध्वानेन मन्द्रेण च।
तन्त्रौर्य्यत्रिकरीतिमेति शिरसः शश्वन्मदान्दोलनं
यस्य श्रीगणनायकः स दिशतु श्रेयांसि भूयांसि वः।
षड्भिरङ्गैरुपेताय पुमर्थामरभूरुहे।
शङ्कराय नमस्कृत्य निगमाय नयाय च॥
ढुण्ढिनाम्ना बुधेनेदं मुद्राराक्षसनाटकं।
साङ्गमद्भुतवृत्तं तत् स्फुटं व्याख्यायतेऽधुना॥
श्रीमद्विशाखदत्तीये मुद्राराक्षसनाटके।
कथोपोद्घातमात्रं संविधानावबुद्धये॥
नन्दान्तं क्षत्रियकुलमिति पौराणशासनात्।
कल्यादौ नन्दनामानः केचिदासन् महीभुजः॥
सर्व्वार्थसिद्धिनामासीत् तेषु विख्यातपौरुषः। इत्यादि।

End. अखिलश्रेयःप्राप्तिसाधनत्वेन श्रुतिस्मृतीतिहासपुराणप्रसिद्धमिति ज्ञेयं॥
बुधो ढुण्ढिनामा जगति विदितो लक्षणसुधी-
मणेः श्रीमद्व्यासान्वयजलधिचन्द्रस्य तनयः।
स्फुटं साङ्गं व्याख्यन्नयगुणविदस्त्र्यम्बकविभो-
र्नियोगात् प्रौढार्थं बुधवरमुदे नाटकमिदं॥

Colophon. इति श्रीढुण्ढिव्यासविरचितायां मुद्राराक्षसटीकायां सप्तमोऽङ्कः।
अत्र चतुर्थेऽङ्के कविः अद्भुततरचाणक्यनीतिविषयस्वसंविधानकोशमनुभाव्य प्रमोदभर-

मनुभवन्तः सरसाः सुहृदया जगति दुर्ल्लभा इति मन्वानः स्वयमेव स्वीयनाटकसंविधानक्लेशं राक्षसवचनव्याजेन प्रस्तौति स्म।

कार्य्योपक्षेपमादौ तनुमपि रचयंस्तस्य विस्तारमिच्छन्
वीजानां गर्भितानां फलमतिगहनं गूढमुद्भेदयंश्च।
कुर्व्वन् बुद्ध्याविमर्शप्रसृतमपि पुनः संहरन् कार्य्यजातं
कर्त्ता वा नाटकानामिममनुभवति क्लेशमस्मद्विधो वा॥

एवं नाटकीय + + नः षष्ट्याङ्गलक्षणानुसरणकविहृदयाभिमतार्थाविष्करणप्रयासोऽपि व्याख्यातुरनुमादयितव्यः सहृदयैरिति प्रार्थयामः॥

कर्त्तैतन्नाटकस्याद्भुतरसविलसत्संविधानप्रवाणः क्लेशं चाणक्यनीतौ बहुविधमतनोल्लक्षणाद्यैर्वचोभिः। तत्तल्लब्धे तदङ्गानुसरणविविधक्लेशमस्मद्विधानां राजश्रीत्र्यम्बकार्य्यानुमतिसुविहितं वीक्ष्य तुष्यन्तु सन्तः॥

विषयः। विशाखदत्तप्रणीतमुद्राराक्षस्य व्याख्यानं। तत्र प्रथमतः संक्षेपात् पद्येन एतन्नाटकीयेतिवृत्तकीर्त्तनञ्च।

No. 3009. ज्ञानदीपिका। Substance, country-made yellow paper, 13 × 4½ inches. Folia, 42. Lines, 11 on a page. Extent, 5,605 ślokas. Character, Bengali. Date, ? Place of deposit, Siṅgura, Zillá Vírabhúma, Pratápachandra Bhaṭṭáchárya. Appearance, fresh. Prose. Correct.

Jnána-dípiká ALIAS **Mahábháratatátparya-ṭíká.** A gloss on the Mahábhárata. By Devabodha. The codex contains only the A'raṇyaka-parva.

Beginning. श्रीभर्त्तुः पादशाखानखतुहिनकराः पञ्च पान्तु त्रिलोकीं
+ श्यद्दैत्येन्द्रकान्तावदनकमलिनी + + नं मुद्रयन्तः।
यैर्मन्ये सैंहिकेयः खरशिशिरकरग्रासवैरं स्मरद्भि-
र्ग्रस्तः पीयूषधाम्नः शरणगततया भाति लक्ष्मच्छलेन॥
उत्तङ्ग (उत्सन्नः) त्रिजगन्मोहो यद्वाङ्मयकृताशने।
पारेतमःप्रकाशाय तस्मै द्वीपभुवे नमः॥
स्मरणे देवबोधस्य वाङ्मद्यौषधिव + यः :
जयन्ति सहजोद्योतदर्शिताव्यक्तभूमयः॥

वनवासप्रतिज्ञासत्यपालनं तीर्थयात्रा इन्द्रादिलोकपालेभ्यः शिवाच्च दिव्यास्त्रप्राप्तिः धर्म्म-

हनूमत्प्रभृतिभ्यो वरप्राप्तिश्च इहवनं पाण्डवानां ताभ्यां इहाहहवनाभ्यामुपलक्षिता धर्म्मार्थ-कामर्मोक्षाः सोपाया आरण्यकपर्व्वतात्पर्य्यार्थः । इत्यादि ।

End. प्राचां गुरूणां पुरुषपरिचयप्राप्तसिद्धीनि कामं निर्व्वाणं प्रालेयप्रकृतिविम-हगाकारभास्वत्प्रमांसि ॥

Colophon. इति परमहंसपरिव्राजकाचार्य्यभट्टारकश्रीमद्देवबोधस्य कृतौ महाभारततात्पर्य्यटीकायां ज्ञानदीपिकायामारण्यकं पर्व्व समाप्तमिति ।

विषयः । महाभारतीयारण्यकपर्व्वव्याख्यानं ।

No. 3010. ज्ञानदीपिका । Substance, country-made paper, 10 × 2½ inches. Folia, 9. Lines, 7 on a page. Extent, 259 ślokas. Character, Bengali. Date, ? Place of deposit, Siṅgura, Zillá Vírabhúma, Pratápachandra Bhaṭṭácharya. Appearance, old. Prose. Correct.

Jṇánadípiká ALIAS Mahábháratatátparya-ṭíká. Another volume of the work noticed under the next preceding No. It contains the Viraṭa-parva.

Beginning. अज्ञानतिमिराम्भोदमुक्ताय व्यासभानवे ।
नमो नवरसस्निग्धवाणीकिरणमालिने ॥
पद्मपाणिपदाम्भाजमकरन्दाम्बुविन्दुभिः ।
देवबोधवचोभृङ्गपीतवा+जगज्जयेत् ॥

कथं विराटनगरे इत्यादि । सभां विराटस्य ततोऽधिजग्मुरित्यन्तस्य विराटपर्व्वणः चतुर्व्वर्गफलसाधनीभूतं सत्यं छलप्रयुक्तायामप्यज्ञातवासकर्त्तव्यताप्रतिज्ञायां न हातव्यमिति तात्पर्य्यार्थः। तथा विराटेत्यादेः सर्व्वं द्वैतवनादित्यन्तस्य वननिर्व्वाहाय अज्ञातचर्य्यापरिग्रहः इत्यादि॥

End. अन्वतेन आचारादन्वतादारोपितादित्यर्थः । स्वस्रीयो भागिनेयः । कृतं सुकृतं । अन्वजानीत अनुमतवान्॥

Colophon. इति परमहंसपरिव्राजकाचार्य्यभट्टारकश्रीमद्देवबोधकृतौ भारततात्पर्य्यदीपिकायां ज्ञानदीपिकायां विराटपर्व्व समाप्तं ।

विषयः । महाभारतीयविराटपर्व्वव्याख्यानं ।

No. 3011. दुर्बोधपदभञ्जिनी नाम महाभारतटीका। Substance, country-made paper, 13 × 4 inches. Folia, 62. Lines, 14 on a page. Extent, 2,769 ślokas. Character, Bengali. Date ? Place of deposit, Siṅgura, Zillá Vírabhúma, Pratápachandra Bháṭṭachárya. Appearance, old. Prose. Correct.

Durbodha-padabhanjiní-ṭíká. Glossarial notes on all the difficult passages in the Mahabhárata. By Vimalabodha.

Beginning. श्रीमहाभारताख्यानदुर्बोधपदभञ्जिनी।

टीका विरच्यतेऽस्माभिरादिपर्व्वक्रमादियं।

तत्रादिवाक्यं। ॐनमो भगवते वासुदेवाय। ॐनमः पितामहाय। ॐनमः प्रजापतिभ्यः। ॐनमः कृष्णद्वैपायनाय। ॐनमः सर्व्वविघ्नविनायकेभ्यः। लोमहर्षणसुत उग्रश्रवाः सौतिः पौराणिको नैमिषारण्ये शौनकस्य कुलपतेः द्वादशवार्षिके सत्रे। सुखासीनानभ्यगच्छद् ब्रह्मर्षीन् संशितव्रतान्। इति। नन्वेकेनैव भगवन्नमस्कारेण विघ्नहेतुसकलदुरितप्रशमसिद्धेः किमिति पञ्चनमस्काराः क्रियन्ते! उच्यते,—सत्यमेकस्यैव एते प्रयोजनभेदोपकल्पितमूर्त्तिभेदाः पञ्चैव नमस्काराः। तथाहि व्यापकगुरुत्वात् प्रथमतो भगवन्नमस्कारः। उक्तञ्च वासुदेवः सर्व्वमिति स महात्मातिदुर्लभ इति। ततश्च सृष्टिगुरुत्वेन पितामहस्य। इत्यादि।

End. अथ वा यनः प्राणी पिपासुः काञ्जिकं पिवति, तथाहं सोमं पिवामि नापि कलिङ्गो धूल्यटः पक्षी यत्र धूमं पश्यति तत्रैव पिवति तदनुकारी सोममहं पिवामीत्यर्थः किन्तु आहृत्य ऊज्जितो भृत्यैः सह इति शेषः पूर्व्ववत्।

Colophon. इति श्रीविमलबोधकृतमहाभारतीयसर्व्वपर्व्वदुष्करश्लोकार्थटीकेयं समाप्ता।

विषयः। समग्रमहाभारतीयविषमपदव्याख्यानं।

No. 3012. कृत्यरत्नावली। Substance, country-made paper, 9 × 5 inches. Folia, 121. Lines, 9 on a page. Extent, 2,782 ślokas. Character, Nágara. Date, ? Place of deposit, Siṅgura, Zillá Vírbhúma, Pratápachandra Bhaṭṭáchárya. Appearance, fresh. Prose and verse. Correct.

Kṛitya-ratnávalí. Summary descriptions of all the modern Hindu rites and ceremonies together with their rituals. By Rámachandra Bhaṭṭa, son of Viṭṭhala, and grandson of Bálakrishna Bhaṭṭa. This is distinct from the work noticed under No. 1112 (III, p. 73.)

Beginning. श्रीगणेशाय नमः।

नमस्कृत्य रमानाथं भट्टविट्ठलसूनुना।

कृत्यरत्नावली रम्या रामचन्द्रेण रच्यते॥

तत्र। तिथिकृत्ये च कृष्णादिं व्रते शुक्लादिमेव च। इति वचनात् चैत्रकृष्णप्रतिपदमारभ्य तिथिकृत्यान्युच्यन्ते। तत्र चैत्रकृष्णप्रतिपदि कृत्यविशेषः पद्मपुराणे,—

चैत्रे मासि महाबाहो पुण्या प्रतिपदापरा। इत्यादि।

End. त्रयस्त्रिंशद्देवताश्च ऋतावुक्ताः अष्टौ वसवः, एकादशरुद्राः द्वादशादित्याः प्रजापतिश्च वषट्कारश्चेति॥

Colophon. इति श्रीमत्पदवाक्यप्रमाणाभिज्ञतत्सदुपाख्यबालकृष्णभट्टाङ्गजविट्ठलभट्टाभिधबुधवरसूनुधर्मशास्त्रपारावारीणश्रीमद्रामचन्द्रभट्टविरचिता कृत्यरत्नावली समाप्ता। ग्रन्थोऽयं समाप्तः।

विषयः। चैत्रकृष्णप्रतिपदि स्नानविधानं। तत्र नारीनीराजनविधानञ्च। तिथिद्वैधे व्यवस्थानिरूपणं। वारुणीविधानं। चैत्रशुक्लप्रतिपदि संवत्सरारम्भकथनं। तत्र पूजादिविधानं। नवरात्रपूजारम्भकथनं। प्रपादिदानमाहात्म्यकीर्त्तनञ्च। घटोत्सर्गविधिकथनं। चैत्रशुक्लतृतीयां गिरिजागिरिशयोः दोलनविधानं। मन्वन्तरादौ पिण्डदानरहितश्राद्धकरणावश्यकता। चैत्रशुक्लपञ्चम्यां श्रीपूजनविधानं। तत्र अष्टम्यामशोककलिकापानादिविधिः। पुनर्वसौ लौहित्यस्नानविधानञ्च। रामनवमीव्रतविधिकीर्त्तनं। चैत्रशुक्लैकादश्यां दोलयात्राविधिः। तत्र द्वादश्यां दमनोत्सवकीर्त्तनं। चैत्रपौर्णमासीकृत्यकथनञ्च। वैशाखकृत्यनिरूपणं। तत्र स्नानविधिकथनं। अश्वत्थमूले जलदानादिविधानं। अक्षयतृतीयाविधिः। गौरीव्रतव्यवस्थादिकथनं। समुद्रस्नानविधिः। परशुरामजयन्तीविधानं। वैशाखशुक्लसप्तम्यां गङ्गाया उत्पत्तिकथनं। तत्पूजाविधिः। नृसिंहजयन्तीविधानं। नृसिंहपूजाविधिः। ज्यैष्ठकृत्यनिरूपणं। ज्यैष्ठशुक्लतृतीयां रम्भाव्रतविधानं। तत्र चतुर्थ्यामुमाया जन्मकथनं। तत्पूजाविधिः। दशहराविधिः। गङ्गाया अभावे अन्यस्यां सरिति तत्पूजाकर्त्तव्यता। पूर्णिमायां वटपूजनादिविधिः। तत्र तालवृन्तकच्छत्रादिदानफलकथनञ्च। आषाढ़कृत्यनिरूपणं। रथयात्राविधिः। विष्णुशयनविधानं। चातुर्म्मास्यव्रतविधानं। तत्र गुड़तैलफलादिवर्ज्जने प्रत्येकं फलश्रुतिकीर्त्तनं। श्रावणादिषु मासेषु प्रत्येकं व्रतकथनं। शाकव्रत-दधिव्रत-पयोव्रतादिनिरूपणं। चातुर्मास्ये वर्ज्जनीयशाकमूलफलादिनिरूपणं। दशविधशाककथनं। श्रावणकृष्णद्वितीयायामशून्यशयनव्रतविधानं। तत्र वकुलचतुर्थीविधानं। शुक्लचतुर्थ्यां दूर्व्वागणपतिव्रतविधिः। नागपञ्चमीविधिः। द्वादश्यां पवित्रारोपणविधानं। उपाकर्म्मविधिकथनं। भाद्रकृत्यनिरूपणं। तत्र कृष्णचतुर्थ्यां सङ्कटचतुर्थीव्रतविधानं। जन्माष्टमीव्यवस्थादिनिरूपणं। तत्र विधानकथनं। अमावस्यायां कुशग्रहणविधिः। शुक्लतृतीयायां हरितालिकाव्रतविधानं। चतुर्थ्यां सिद्धिविनायकव्रतविधानं। अत्र चन्द्रदर्शनादिनिषेधकथनं। पञ्चम्यामृषिपञ्चमीव्रतविधानं। षष्ठीव्रतविधिः। सप्तम्यां मुक्ताभरणव्रतविधानं। दूर्व्वाष्टमीव्रतविधानं। महालक्ष्मीव्रतविधानं। एकादश्यां वामनावतारकथनं। श्रावणद्वादशीकथनं। विष्णुशृङ्खलयोगविधिः। रात्रौ पारण-

निषेधः। अनन्तव्रतविधानं। ब्रह्मसावित्रीव्रतविधानं। भागवतलक्षणकथनपूर्व्वकं पौर्णमास्यां तद्दानमाहात्म्यकथनं। आश्विनकृत्यनिरूपणं। अपरपक्षश्राद्धविधिः। महालयाविधिः। तर्पण-विधिः। चन्द्रषष्ठीव्रतविधानं। सपिण्डकश्राद्धनिरूपणादिकं। मघात्रयोदशीविधिः। नवरात्र-पूजाविधानादिकीर्त्तनं। चण्डीपाठक्रमादिकीर्त्तनं। कुमारीपूजनविधिः। लौहाभिसारिक-विधिकीर्त्तनं। देव्याः प्रतिपदादिपूजाप्रकारकथनं। उपवासविधिः। आश्विनशुक्लसप्तम्या-मुपाङ्गललिताव्रतविधिः। षष्ठ्यां बोधनादिविधिः। बलिदानक्रमादिकथनं। दुर्गापूजा-नुष्ठानक्रमकीर्त्तनं। कोजागरव्रतविधानादिकं। कार्त्तिककृत्यनिरूपणं। तत्र स्नानविधिः। पञ्चनदस्नानादिविधिः। तुलस्यादिमालाधारणमाहात्म्यकथनं। इन्ताकपूरणशिम्ब्यादिभक्षण-निषेधकथनं। कृष्णचतुर्थ्यां मल्लीकस्य दशरथस्य पूजाविधानकीर्त्तनं। गोवत्सद्वादशीव्रत-विधानं। यमोद्देशेन सन्ध्याकाले दीपदानविधानकथनं। उल्कादानादिविधिः। सुखरात्रि-लक्ष्मीपूजाविधिः। द्यूतप्रतिपद्विधिः। बलिराजपूजनादिविधानं। गोक्रीड़नविधिः। भ्रातृ-द्वितीयायां यमपूजनादिविधिकथनं। चतुर्थ्यां नागव्रतविधानं। गोष्ठाष्टमीविधिः। जगद्धात्री-पूजाविधिकीर्त्तनं। विष्णुत्रिरात्रविधिः। विष्णूत्थानविधिः। चतुर्द्दश्यां विश्वेश्वरप्रतिष्ठावृत्तान्त-कथनपूर्व्वकं तत्पूजाविधानकीर्त्तनं। मार्गशीर्षकृत्यनिरूपणं। तत्र कृष्णाष्टम्यां भैरवस्य उत्पत्तिकथनपूर्व्वकमुपवासविधानं। शुक्लतृतीयायां रम्भाव्रतविधानं। पञ्चम्यां नागपूजाविधिः। षष्ठ्यां मल्लारिपूजनविधानं। स्कन्दषष्ठीपूजाविधिः। मार्गपौर्णमास्यां दत्तात्रेयपूजाविधानं। पौषकृत्यविधिः। तत्र अष्टकाश्राद्धविधिः। बुधपूजनादिविधानं। माघकृत्यनिरूपणं। तत्र स्नानविधिः। यमप्रीत्यर्थं तिलदानविधानकथनं। यमतर्पणविधिः। अर्द्धोदयमाहात्म्यादि-निरूपणं। कृष्णचतुर्थ्यां ढुण्ढिपूजनविधिः। वरदाचतुर्थीविधिः। पञ्चम्यां श्रीपूजनविधिः। माघीसप्तमीविधिः। भीष्मतर्पणविधिः। फाल्गुनकृत्यनिरूपणं। तत्र शिवरात्रिविधिकथनं। तत्र प्रयोगकथनं। गोविन्दद्वादशीविधानं। होलिकाविधिः। तत्र पूजादिकथनं। दोल-यात्राविधिकथनं। मलमासकृत्यनिरूपणं। तत्र गुड़सर्पिरादिदानविधिः।

No. 3013. **ज्योतिःसङ्ग्रहः।** Substance, country-made paper, 14 × 4 inches. Folia, 55. Lines, 6, on a page. Extent, 1,266 ślokas. Character, Bengali. Date, ? Place of deposit, Siṅgura, Zillá Vírabhúma, Pratápachandra Bhaṭṭácharya. Appearance, fresh. Prose and verse. Incorrect.

Jyotihsaṅgraha. A manual of astrology. By Shashṭhidása. This is distinct from No. 1826, (*ante* V, 134).

Beginning. यः पृथ्वीं शिरसा ससागरसरिच्छैलाद्रिभिर्लीलया
धत्ते पङ्कजवत्सदा त्रिभुवनं यस्येच्छया जायते।
संस्थानं विलयञ्च नोऽस्य सततं सर्व्वार्थसिद्धिप्रदं

हृत्पद्मे विलसत्वनन्तवपुषोऽनन्तस्य पादाम्बुजं ॥
अभ्यासार्थं बालकानां ज्योतिःसंक्षेप उच्यते ।
ज्योतिर्ग्रन्थात्तथान्यस्मादाहृत्य वचनानि च ॥
उपयुक्तानि लिख्यन्ते ग्रन्थेऽस्मिन् विविधं मतं ।
विवाहादीनि कर्म्माणि यात्रान्तानि ततः परं ॥

तत्र वारस्वरूपं लिख्यते,—स्तनकादिपरिच्छेदो दिनमासाब्दपास्तथा । इत्यादि ।

End. मैत्रे चैव दशाहानि चित्रायामर्द्धमासकं ।
मूलेन जायते मोक्षः पूर्व्वाषाढे त्रिपक्षकं ।
उत्तरे दिनविंशत्या रेवत्यान्तु दिनत्रयं ॥

Colophon. इति षष्ठीदासविरचितो ज्योतिःसङ्ग्रहः समाप्तः ।

विषयः । वारस्वरूपकथनं । कालवेलाकथनं । वारवेलाकथनं । तिथिनिरूपणं । दग्ध-तिथिनिर्णयः । करणानि । विष्टिभद्रा । नक्षत्रगणनिर्णयः । अधोमुखनक्षत्राणि । नक्षत्रमुहूर्त्त-निर्णयः । योगनिर्णयः । राश्यादिनिर्णयः । मेषादीनां विशेषनामकथनं । तेषां क्रूरसौम्य-त्वादिविवेकः । ग्राम्यारण्यादिराशिकथनं । दिक्पतिकथनं । लग्नमाननिर्णयः । होराद्वादशांश-द्रेक्काणादिनिरूपणं । उच्चनीचकथनं । मूलत्रिकोणकथनं । केन्द्रादिकथनं । उपचयसंज्ञा-कथनं । त्रिकोणचतुरस्रकथनं । द्वादशभावविचारः । ग्रहाणां संज्ञावर्णादिनिरूपणं । तेषां शुभाशुभकथनं । दृष्टिनिरूपणञ्च । जात्यधिपवेदाधिपकथनं । चन्द्रशुद्धा ग्रहसञ्चारफलकथनं । नैसर्गिकमित्रशत्रुसमादिनिरूपणं । ग्रहाणां गोचरशुद्ध्यादिनिरूपणं । अष्टवर्गकथनं । ग्रहाणां शान्तिकथनं । नक्षत्रशुद्धिकथनं । जन्मतारादिविशेषकथनं । वेलानिर्णयः । अस्तादियोग-निर्णयः । सिद्धि-दग्ध पाप-यमघण्टादियोगकथनं । करकचादियोगकथनं । संक्रान्तिनिरू-पणादिकं । शनिचक्रादिनिरूपणं । तिथिषु द्रव्यविशेषभक्षणफलकथनं । कालाशुद्धिनिरूपणं । ग्रहणनिरूपणं । भूकम्पादिफलकथनं । अम्बुवाची । विवाहः । नववध्वागमनं । गर्भाधानादि-दशसंस्कारनिरूपणं । सन्ध्याकरणविधिः । परीक्षाविधिः । नववस्त्रादिपरिधानं । नवदोला-द्यारोहणं । पुष्करिण्यारम्भः । नौकागठनं । नौकायात्रा । राजदर्शनं । हलप्रवाहः । वीज-वपनं । धान्यच्छेदनं । वीजधारणं । धान्यादिसंस्थापनं । नवान्नं । देवतागठनं । तत्प्रतिष्ठा-दिकथनं । गृहारम्भादिकथनं । क्रयविक्रयादिनिरूपणं । ऋणदानादिकथनं । रोगिणां शुभा-शुभज्ञानकथनञ्च ।

No. 3014. रसगङ्गाधरः । Substance, country-made paper, 10 × 4 inches. Folia, 402. Lines, 7 on a page. Extent, 8,420 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyává-gíśa. Appearance, fresh. Prose and verse. Generally correct.

Rasagaṅgádhara. A treatise on rhetoric and literary criticism. By Jagannátha Bhaṭṭa, Paṇḍitarája.

Beginning. श्रीगणेशाय नमः ।

स्मृतापि तरुणातपं करुणया हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युतां ।
कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥
श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतनिखिलब्रह्मविद्याप्रपञ्चः
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत् ।
दिव्यादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलभणितिरभूत्सर्व्वविद्याधरो यः ॥
पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुं ॥
— — — — — — — — ।
निर्म्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र निहितं न परस्य किञ्चित् ।
किं सेव्यते सुमनसां मनसापि गन्धः
कस्तूरिकाजननशक्तिभृता मृगेण ।
मननतरितीर्णविद्यार्णवो जगन्नाथपण्डितनरेन्द्रः ।
रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसां ॥ इत्यादि ।

End. शब्दावृत्तिपर्य्यायत्वेन अनेकेषां प्रश्नानां एकपदनिवेदितोत्तरत्वेन प्रकारान्तरेण बहुप्रभेदत्वं दिङ्मात्रेण उदाह्रियते,—किं कुर्व्वते दरिद्राः का सारवती धरा मनोज्ञतरा, कः पावनस्त्रिलोक्यां । इति । श्रीकमलाकुचकस्तूरिकाकेलिपत्राङ्कुराय श्रीनन्दनन्दनाय नमः । शुभं भूयात् ।

Colophon. इति पण्डितराजाभिधानभट्टजगन्नाथकृतौ रसगङ्गाधरः ।

विषयः । काव्यस्वरूपनिरूपणप्रसङ्गेन अन्यान्यमतखण्डनपुरःसरं काव्यस्य रमणीयार्थ-प्रतिपादकशब्दरूपत्वव्यवस्थापनं । रसात्मकादिवाक्यस्य काव्यत्वे गौश्चलति मृगो धावतीत्या-दावतिप्रसक्तिः स्यादितिनिरूपणं । प्रतिभैव तत्कारणमितिनिरूपणं । उत्तमोत्तम-उत्तम-मध्यम-अधमभेदेन काव्यस्य चतुर्व्विधत्वव्यवस्थापनं । व्यङ्ग्यार्थप्रदर्शनमुखेन चित्रमीमांसादिमतखण्डनं । चित्रकाव्यनिरूपणप्रसङ्गेन काव्यप्रकाशमतखण्डनं । द्विविधध्वनिनिरूपणं । रसस्वरूपनिरूपणं । भट्टनायकादिमतोत्थापनपूर्व्वकं रसस्वरूपविवेचनं । रसस्य आनन्दरूपत्वे करुणादौ शोकादि-

स्थायिभावत्वेन कथं तत्र सहृदयानां प्रवृत्तिरित्यत्र समाधानं। शृङ्गारादिभेदेन रसस्य नवविधत्वकथनं। अष्टावेव रसा नाट्ये न शान्तस्तत्र युज्यते इत्यादिमतखण्डनं। स्थायिभावादिस्वरूपविवेचनं। रत्यादीनां लक्षणकथनं। आलम्बनादिनिरूपणं। संयोगविप्रलम्भभेदेन द्विविधशृङ्गाररसकथनं। करुणरसः। शान्तरसः। रौद्ररसः। दान-दया-युद्ध-धर्म्मभेदात् वीररसस्य चातुर्व्विध्यकथनं। एतत्तु प्राचीनानामनुरोधेन स्वमते तु वीरस्य बहवः प्रकारा इति तन्निरूपणं। अद्भुतरसः। हास्यरसः। स्मित-सित-विहसित-उपहसिन-अपहसित-अतिहसितलक्षणं। भयानकरसः। वीभत्सरसः। रसानां प्राधान्ये ध्वनिव्यपदेशहेतुत्वं, गुणीभावे तु रसालङ्कारत्वमितिकथनं। भगवद्भक्तादीनां भावत्वं न तु रसत्वमितिप्राचीनमतानुमोदनं। रसविरोधिनिरूपणं। रसविशेषे वर्णनीयकथनं। माधुर्य्य-ओजः-प्रसादभेदेन त्रिविधगुणनिरूपणं। तेषां रसविशेषपोषकत्वकथनं। गुणानां रसधर्म्मत्ववादखण्डनं। तत्र प्राचीनमतेन श्लेषादिदशविधगुणानां लक्षणोदाहरणप्रदर्शनपूर्व्वकं तन्मध्ये केषाञ्चित् माधुर्य्यादिषु त्रिषु अन्तर्भावनं केषाञ्चित् खण्डनञ्च। अश्राव्यत्वनिरूपणं। सर्व्वे अश्राव्यभेदाः काव्यसामान्ये वर्ज्जनीया इति कथनं। रसेषु वर्ज्जनीयव्यवस्थापनं। रीतिकथनं। भावध्वनिनिरूपणं। व्यभिचारिणः। वात्सल्यं रसान्तरमितिमतखण्डनं। निर्व्वेदादीनां स्वरूपनिरूपणं। अत्र सर्व्वत्र स्वोक्तौ समीचीनयुक्तिप्रदर्शनं। एवं परत्र ज्ञेयं। रसाभासनिरूपणं। भावाभासनिरूपणं। भावशान्तिः। भावोदयः। भावसन्धिः। भावसरलता। अर्थशक्तिमूलध्वनेः द्वादशविधत्वमितिकथयतो मखटभट्टस्य मताक्षेपः। शब्दशक्तिमूलध्वनेर्द्वैविध्यकथनं, एवमर्थशक्तिमूलस्य। अनेकार्थस्य शब्दस्य प्रकरणादिना एकार्थस्मरणे नानामतोपपादनं। व्यञ्जनाकथनं। शब्दशक्तिमूलध्वन्यादेरवान्तरभेदनिरूपणं। अभिधामूलध्वनिः। लक्षणामूलध्वनिः। शक्तिग्रहविचारः। लक्षणाविचारः। उपमारूपकादौ लक्षणाया उपयोगितादिनिरूपणं। सारोपासाध्यवसानादिविवेचनं। उपमालङ्कारनिरूपणं। अत्र काव्यप्रकाशचित्रमीमांसादिमतखण्डनं। उपमेयोपमाप्रकरणं। अनन्वयप्रकरणं। असमालङ्कारनिरूपणं। तत्र२ युक्तिकथनं। अन्यान्यमतखण्डनञ्च प्रायः सर्व्वत्र ज्ञेयं। स्मरणालङ्कारनिरूपणं। रूपकप्रकरणं। परिणामप्रकरणं। सन्देहालङ्कारनिरूपणं। भ्रान्तिमत्प्रकरणं। उल्लेखप्रकरणं। अपह्नुतिप्रकरणं। अतिशयोक्तिप्रकरणं। तुल्ययोगिताप्रकरणं। दीपकप्रकरणं। प्रतिवस्तूपमाप्रकरणं। दृष्टान्तालङ्कारनिरूपणं। निदर्शनाप्रकरणं। व्यतिरेकालङ्कारनिरूपणं। सहोक्तिप्रकरणं। विनोक्तिः। समासोक्तिप्रकरणं। परिकरालङ्कारः। श्लेषप्रकरणं। अप्रस्तुतप्रशंसाप्रकरणं। पर्य्यायोक्तिप्रकरणं। व्याजस्तुतिप्रकरणं। आक्षेपप्रकरणं। विरोधाभासप्रकरणं। विभावनाप्रकरणं। विशेषोक्तिप्रकरणं। असङ्गतिप्रकरणं। विषमालङ्कारनिरूपणं। समालङ्कारनिरूपणं। विचित्रालङ्कारनिरूपणं। अधिकालङ्कारः। अन्योन्यालङ्कारः। विषमालङ्कारः। व्याघातप्रकरणं। शृङ्खलालङ्कारः। एकावल्यलङ्कारः। काव्यलिङ्गालङ्कारनिरूपणं। अर्थान्तरन्यासः। अनुमानप्रकरणं। यथासंख्यप्रकरणं। पर्य्यायप्रकरणं।

परिवृत्त्यलङ्कारः। परिसंख्यालङ्कारः। अर्थापत्तिः। विकल्पालङ्कारः। समुच्चयालङ्कारः। समाधिः। प्रतीपप्रकरणं। प्रौढोक्त्यलङ्कारः। ललितालङ्कारः। प्रहर्षणालङ्कारः। विषादनालङ्कारः। उल्लासालङ्कारः। अवज्ञालङ्कारः। लेशप्रकरणं। तद्गुणालङ्कारः। अतद्गुणालङ्कारः। मीलितालङ्कारः। सामान्यालङ्कारः। उत्तरालङ्कारनिरूपणञ्च।

No. 3015. अलङ्कारसर्व्वस्वं। Substance, country-made paper, 10 × 4 inches. Folia, 73. Lines, 9 on a page. Extent, 1,620 ślokas. Character, Nágara. Date, Sm 1922. Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávágíśa. Appearance, new. Prose and verse. Generally correct.

Alaṅkára-sarvasva. A gloss on the author's aphorisms on rhetoric. By Rájánakaruchaka.

Beginning. ॐनमो गणेशाय।

नमस्कृत्य परां वाचं देवीं त्रिविधविग्रहां।
निजालङ्कारसूत्राणां वृत्त्या तात्पर्य्यमुच्यते॥

इह हि तावद्भामहोद्भटप्रभृतयः चिरन्तनालङ्कारकाराः प्रतीयमानमर्थं वाच्योपस्कारकतया अलङ्कारपचनिक्षिप्तं मन्यन्ते। तथाहि इत्यादि।

End. तस्मादाश्रयाश्रयिभावेन चिरन्तनमतानुवृत्तिरिति शिवम्।

समाप्तमिदमलङ्कारसर्व्वस्वम्।

Colophon. कृतिः श्रीमदाचार्य्यवर्य्यराजानकरुचकस्य। संवत्। १९२२।

विषयः। अलङ्कारस्वरूपविवेचनं। अत्र भामहरुद्रटोद्भटादीनां प्राचीनालङ्कारिकाणां मतोपन्यासपुरःसरं अभ्यर्हिततमत्वनिर्व्वाचनं। गुणालङ्कारादीनां अन्योन्यमन्यत्वे हेतुप्रदर्शनं। व्यङ्ग एव वाक्यार्थीभूतः काव्यजीवितमितिनिरूपणं। अविवक्षितवाच्यादिव्यङ्गभेदकथनं। अथ-पौनरुक्त-शब्दपौनरुक्त-शब्दार्थपौनरुक्तभेदेन त्रिविधपुनरुक्तवदाभासनिरूपणं। अत्र अवान्तरविभागादिप्रदर्शनञ्च। एवं परत्र ज्ञेयं। अनुप्रासः। यमकं। उपमा। अनन्वयः। उपमेयोपमा। स्मरणं। रूपकं। परिणामः। सन्देहः। भ्रान्तिमान्। उल्लेखः। अपह्नुतिः। उत्प्रेक्षा। अतिशयोक्तिः। तुल्ययोगिता। दीपकं। प्रतिवस्तूपमा। दृष्टान्तः। निदर्शना। सहोक्तिः। विनोक्तिः। समासोक्तिः। परिकरः। श्लेषः। समासोक्तिश्लेषविचारे विविधमतोपपादनं। रसवत्। प्रेयः। उर्ज्जस्वी। अप्रस्तुतप्रशंसा। पर्य्यायोक्तं। अर्थान्तरन्यासः। व्याजस्तुतिः। आक्षेपः। विरोधः। विभावना। विशेषोक्तिः। अतिशयोक्तिः। असङ्गतिः। विषमं। समं। विचित्रं। अधिकं। अन्योन्यं। विशेषः। व्याघातः। कारणमाला। एकावली। मालादीपकं। सारः। काव्यलिङ्गं। अनुमानं। यथासंख्यं। पर्य्यायः। परिवृत्तिः। परिसंख्या। अर्थापत्तिः। विकल्पः।

समन्वयः। समाधिः। प्रत्यनीकं। प्रतीपं। सामान्यं तद्गुणः। अतद्गुणः। उत्तरं। सूक्ष्मं। व्याजोक्तिः। वक्रोक्तिः। स्वभावोक्तिः। भाविकं। उदात्तं। भावसन्धिः भावोदयः। शवलता। संसृष्टिः। सङ्करः। सन्देहसङ्करादिविवेचनञ्च।

No. 3016. वेदान्तचिन्तामणिः। Substance, country-made paper, 9 × 4 inches. Folia, 48 Lines, 11 on a page. Extent 1,782 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávagíśa; another copy at Ulá, Post Ráṇágháṭa, Zillá Nadíyá, Dínanátha Bhaṭṭácharya. Appearance, new. Prose and verse. Correct.

Vedánta-chintámaṇi. Dissertations on the leading topics of the Vedánta doctrine. By Govardhana, son of Ghanaśyáma Bhaṭṭácharya, a native of the Punjab. This is distinct from No. 2200, (*ante*, VI, p. 262).

Beginning. श्रीगणेशाय नमः।

शुद्धाद्वैतं सर्व्वशक्तिं जड़जीवादिकारणं।
साकारं सच्चिदानन्दं वन्दे श्रीपुरुषोत्तमं॥
मायावादतमोनाशभक्तिमार्गप्रकाशयोः॥
सूर्य्याचन्द्रमसौ स्तौमि श्रीमद्वल्लभविट्ठलौ॥
भक्तो गुरुश्रीव्रजवल्लभस्य पितुर्घनश्यामत आप्तविद्यः।
गोवर्द्धनो बालनिबोधनाय वेदान्तचिन्तामणिमातनोति॥ इत्यादि।

End. यो गोवर्द्धनवाक्सुधोदधिभवः सद्वाञ्छितार्थप्रदः
स्वान्तध्वान्तनिवारको गुरुघनश्यामोक्तिशाणोज्ज्वलः।
विद्वद्भिः करुणापरैर्हृदि धृतः सोऽयं महीमण्डले
यावच्चन्द्रदिवाकरं विजयतां वेदान्तचिन्तामणिः॥

Colophon. इति श्रीमद्वेदव्यासविष्णुस्वामिमतपुण्डरीकमण्डलमण्डनमार्त्तण्डं श्रीमद्वल्लभाचार्य्यचरणाब्जचञ्चरीकचित्तेन मोचगुरुसमातामहगोस्वामिश्रीव्रजवल्लभचरणैकतानेन तैलङ्गवेल्लनाटीज्ञातीयतित्तिरिशाखीयापस्तम्बवाधूलसगोत्रोद्भवपञ्चनद्युपनामकघनश्यामभट्टात्मजेन स्वपितृमकाशात् लब्धविद्येन गोवर्द्धनाख्यकविना कृते वेदान्तचिन्तामणौ पञ्चदशं प्रकरणं सम्पूर्णं। पूर्णश्चायं वेदान्तचिन्तामणिः।

विषयः। जगत्कर्त्तृनिरूपणमुखेन सृष्टिप्रक्रियादिनिरूपणं। वैष्णवशास्त्रार्थसङ्ग्रहः। परोक्षब्रह्मनिश्चये शाब्दमेव प्रमाणमितिनिरूपणं। वेदस्य ब्रह्मवाक्यत्वकथनं। श्रीकृष्णस्य श्रीमद्भागवतरूपत्वकथनं। त्रिविधकार्य्यनिरूपणं। जगतो ब्रह्मोपादानत्वनिरूपणं। प्रपञ्च-

सत्यत्वनिरूपणं। आविर्भावतिरोभावावेव उत्पत्तिविनाशाविति निरूपणं। तार्किकाणामारम्भवादस्वरूपकथनपूर्व्वकं तदाक्षेपकथनं। विवर्त्तवादकथनपूर्व्वकं तन्निरसनं। अविकृतपरिणामवादस्थापनं। वह्नेः विस्फुलिङ्गवत् जीवाणां ब्रह्मांशत्वनिरूपणं। ब्रह्मणः सच्चिदानन्दरूपत्वं आकाशवत् व्यापकत्वञ्चेतिकथनं। जीवोद्गमसंसारनिरूपणं। जीवान्तर्यामिस्वरूपविवेकपूर्व्वकं शुद्धाद्वैतार्थनिरूपणं। मायावादखण्डनं। ब्रह्मणो निर्व्विशेषत्ववादखण्डनं। ब्रह्मणः साकारत्वकथनं। शास्त्रे मायाशब्दस्य हरिसामर्थ्यादिवाचकत्वकथनं। शक्तिधर्म्माभेदनिरूपणपूर्व्वकं द्वैतवादनिराकरणं। विशिष्टाद्वैतविचारः। शैवशाक्तमतखण्डनं। चराचरस्वरूपपुरुषोत्तमस्वरूपनिरूपणं। प्रकृतिपुरुषतत्त्वकथनपूर्व्वकं भगवद्धामनिरूपणं। शुद्धाद्वैतमते आशङ्कानिराकरणं। भक्तिरेव हरितोषणोपाय इति निरूपणं। भक्तिस्वरूपादिविवेचनं। श्रीकृष्ण एव परब्रह्मेतिनिरूपणं। सद्गुरूपसदनस्यावश्यकता। भगवद्भजनप्रक्रियादिकथनं। मालाधारणावश्यकता। ऊर्द्ध्वपुण्ड्रादिकर्त्तव्यता। मुक्त्यपेक्षया भक्तेर्दुर्ल्लभत्वकीर्त्तनञ्च।

No. 3017. श्रीसूक्तभाष्यं। Substance, country-made paper, 8 × 3 inches. Folia, 6. Lines, 8 on a page. Extent, 107 ślokas. Character, Nágara. Date, Sм. 1885. Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávágíśa. Appearance, fresh. Prose. Correct.

S'rísúkta-bháshya. A commentary on the S'rísúkta hymn of the Ṛig Veda Saṁhitá. By Rávaṇa.

Beginning. श्रीगणेशाय नमः।

श्रीसूक्तस्यार्थः। तत्रेयमाद्या। जातानि विश्वानि भूवनानि धनानि वा वेद इति जातवेदा अग्निः तस्य सम्बोधनं। हे जातवेदः हे अग्ने गृहे कुले वा इत्यध्याहारः। मम गृहे लक्ष्मीं धनाधिष्ठात्रीं देवतां आवह। आ सम्यग्भावेन प्रापय। इत्यादि।

End. दीर्घं वेदोक्तं आयुः आयुष्यं लक्ष्मीप्रसादात् प्राप्नोतीति सम्बन्धः॥ २३॥

Colophon. इति श्रीरावणकृतं श्रीसूक्तस्य भाष्यं समाप्तं। संवत् १८८५।

विषयः। ऋग्वेदान्तर्गतश्रीसूक्तस्य व्याख्यानं।

No. 3018. भावार्थदीपिका। Substance, country-made paper, 9 × 4 inches. Folia, 100. Lines, 9 on a page. Extent, 1,684 ślokas. Character, Nágara, Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávágíśa. Appearance, fresh. Prose. Correct.

Bhávártha-dípiká. A commentary on S'aṅkara A'chárya's A'nanda-laharí, a hymn in praise of S'iva. By Brahmánanda.

Beginning. अलिकुलमण्डितगण्डं प्रत्यूहव्यूहतिमिरमार्त्तण्डं ।

सिन्दूरारुणशुण्डं देवं वेतण्डतुण्डमवलम्बे ॥

सत्सम्प्रदायप्रथनाय तिष्ये शिष्यैश्चतुर्भिः सह योऽवतीर्णः ।

उक्तो हरस्तन्त्रमतन्त्रराजे श्रीशङ्कराचार्य्यगुरुं तमीडे ॥

इह यद्यपि स्वर्गापवर्गसाधनतया विविधदेवताराधनक्रियाः ——— इत्यादि ।

End. पद्भ्यामित्यादि स्लोकचयमधिकं वर्त्तते। तत्तु भगवद्भाष्यकारशङ्कराचार्य्यकृतं न भवति। किन्तु केनचित् प्रक्षिप्तं भवति। अतो न व्याख्यातं। स्लोकशतकमेव व्याख्यातं।

Colophon. इति श्रीब्रह्मानन्देन विदुषा कृता सौन्दर्य्यलहरी भावार्थदीपिका समाप्तिमगात्।

विषयः। शङ्कराचार्य्यकृतानन्दलहर्य्या व्याख्यानं।

No. 3019. अवतारवादावली। Substance, country-made paper. 11 × 5 inches. Folia, 325. Lines, 6—7 on a page. Extent 4.212 ślokas. Character, Nágara Date, ? Place of deposit, S'ántipura, Paṇdit Kálidása Vidyávágíśa. Appearance, old. Prose and verse. Correct.

Avatára-vádávalí. Polemical dissertations on the non-dual theory as bearing upon incarnations. By Purushottama, son of Pitámbara. The object of the work is to refute all doctrines discussed in Sanskrit works, which are hostile to the unity of the divine and the human soul.

Beginning. श्रीकृष्णाय नमः।

अभवदतिरसालं जिह्म (?) विद्युज्जटालं

प्रलयजलदजालं यत्कृपालङ्कृतेषु।

शिशिरमुखमयूखैर्भक्तसन्तापहालं

स विभुरखिलकालं मद्दृशां गोचरोऽस्तु॥

नमामि श्रीमदाचार्य्यान् प्रभून् श्रीविठ्ठलेश्वरान्।

यद्दृशो करुणापूर्णं मादृशां सर्व्वसिद्धिदे॥

— — — — — — — — — —।

ये तत्त्वदीपभाष्यप्रभृतिषु सौक्ष्म्येण सुस्थिता वादाः।

पद्ये तानवताये प्रकटीकुर्म्मश्च युक्तिमद्वाक्यैः॥ इत्यादि।

End. एतं निधाय निकटे प्रणतिं विधाय
शिष्टेष्विदं सविनयं विनिवेदयामि ।
हेलोपहासविषयाण्यवलोक्य कश्चित्
कालं बुधाः करुणयैष कृतार्थनीयः ॥

Colophon. इति श्रीमद्वल्लभनन्दनचरणैकतानस्य पीताम्बरसूनोः पुरुषोत्तमस्य कृतौ अवतारवादावल्यामाद्यो वादः प्रहसननामा सम्पूर्णः । श्रीः ।

विषयः । विष्णुस्वामिमतोपपादनमुखेन वेदान्तपुराणादीनां संवादेन समन्वयेन च शैवादिमतनिरसनपूर्व्वकं शुद्धाद्वैतवादसंस्थापनं । एतन्मते जीवपरमेश्वरयोरंशांशिभाव इति विवेचनीयं । अत्र सर्व्वेषां वेदान्तानां भगवत्परत्वनिरूपणं । तेषां तत्प्रतिपादकत्वकथनञ्च । वेदान्तवाक्यानां समन्वयकथनं । श्रौतदर्शनलक्षणं । ब्रह्मसूत्रतात्पर्य्यकथनं । सत्यज्ञानादिवाक्यानां लक्ष्यार्थत्ववादनिरसनं । तद्वाच्यत्वनिरूपणञ्च । प्रकाशाश्रयन्यायेन ब्रह्मणि धर्म्मधर्म्मिभावोपपत्तिकथनं । श्रुतीनां विरोधपरिहारकथनं । अस्थूलमित्यादिवाक्येषु पर्य्युदासादिविचारः । उपाधिपक्षखण्डनं । यद्वाचानभ्युदितमित्यादिश्रुतिव्याख्यानदूषणं । भगवच्छरीरस्य अमायिकत्वव्यवस्थापनं । ब्रह्मणः केवलनिर्व्विशेषत्वकेवलसविशेषत्ववादखण्डनपुरःसरं उभयलिङ्गत्वनिरूपणं । ब्रह्मणः साकारत्वसंस्थापनं । भक्तिरेव तद्दर्शनोपाय इतिनिरूपणं । अहिकुण्डलिन्यायेन तस्य विविधाकारत्वकथनञ्च । अनन्तरूपस्य भगवतः किं सर्व्वाण्येव रूपाणि तुल्यानि उतैकं मुख्यमितराणि गुणभूतानीतिविमर्शनं । अप्पयदीक्षितकृतशिवतत्त्वविवेकमतखण्डनं । ब्रह्मोपनिषदीयनारायणकृतशङ्करानन्दकृतव्याख्यानयोराक्षेपः । प्रणवस्वरूपनिरूपणादिकं । वासुदेव एव परब्रह्म इति निरूपणं । अत्र सर्व्वासामुपनिषदां संवादकथनञ्च । चन्द्रचन्द्रिकान्यायेन जगतो भगवच्छक्तिकत्वनिरूपणं । चतुर्व्यूहनिरूपणं । शिवशम्भुरुद्रेशानादिशब्दाः मुख्यया वृत्त्या वासुदेवे एव उपतिष्ठन्ति अन्यत्र तु शिवादौ गौणमितिनिरूपणं । अहङ्ग्रहोपासनास्वरूपकथनं । पुराणवाक्यानां समन्वयकथनं । विष्णुतत्त्वनिर्णयकारमताक्षेपः । भगवन्महेश्वरादिशब्दनिर्व्वचनं । यज्ञेषु शेपिशब्दतात्पर्य्यकथनं । वियदधिकरणादिविमर्शनञ्च । उपक्रमोपसंहारयोः कुत्र प्राधान्यमितिविवेचनं । पुरुषशब्दवाच्यनिरूपणं । भगवानेव महापुरुषशब्दवाच्य इतिनिरूपणं । ब्रह्म किं निमित्तं उत उपादानमित्यत्र नानावादकथनं । आत्मशक्तिनिरूपणं । जगतामादिकारणनिरूपणं । ऋतं सत्यमित्यादिमन्त्राणामर्थकथनपूर्व्वकं विरोधपरीहारः । दहरोपासनानिरूपणं । अन्तर्यामिनिरूपणं । सृष्टिप्रक्रियाकथनं । भगवद्गीताभागवतादिश्लोकानां विरुद्धत्वेन प्रतीयमानानां तात्पर्य्यादिनिरूपणं । हरिहरयोरभेदकीर्त्तनं । भगवद्गीताया अनुवादत्ववादखण्डनं । तस्याः शिवपरत्वमतनिरसनञ्च । भगीरथेन विष्णुपादोद्भवा गङ्गा आनीता न तु हैमवतीतिनिरूपणमुखेन गङ्गायाः द्वैविध्यकथनं । नीलकण्ठेन कण्ठे कालकूटधारणं न खलु स्वसामर्थ्यात्

किन्तु भगवन्मन्त्रप्रभावादेवेतिनिरूपणं। अत एव निर्व्व्याजं सर्व्वाधिपत्यं नमः शेषित्वादिकञ्च वासुदेवे एव पर्य्यवस्यति, किञ्च निरुपाधिर्महाविभूतिरानन्दाकारो भगवानेव सकलवेद-वेदान्तप्रतिपाद्यः, परमशिवस्तु तस्य मुख्यविभूतिरूपः सगुण एवेति राद्धान्तकथनं। श्रीमद्भाग-वतस्य निखिलवेदान्तार्थनिष्कर्षरूपत्वकथनं। प्रत्युत्तरं भगवच्छब्दनिर्व्वचनं। भगवन्माहात्म्य-कीर्त्तनं। तदवतारनिरूपणं। भगवन्मूलरूपस्य अद्वयत्वकथनं। नारायणादिशब्दनिर्व्वचनं। भगवन्मूर्त्तिनिरूपणं। पुराणेषु अर्थवादपरिकल्पनायां दोषकीर्त्तनं। पुराणैर्दशभिर्विप्राः प्रोक्तो-रुद्रस्तथैव च। चतुर्भिर्भगवान् विष्णुर्द्वाभ्यामम्बा प्रकीर्त्तिता। इत्यादिसूतसंहितावाक्यन्तु शिवांशभूतसगुणविष्णुपरमितिनिरूपणं। तामसादिपुराणनिरूपणं। सात्त्विकाद्यनुष्ठानफ-लकीर्त्तनं। अधोक्षजशब्दनिर्व्वचनप्रसङ्गेन निवण्टुदूषणं। भगवत्सेवायामेकान्तिन एव अधि-कारिणो नान्ये इति निरूपणं। मनुष्येषु ये हि देवांशसम्भूतास्तेषां विष्णुपूजनमेव स्वधर्म्मः, इतरेषां दैत्यांशतया शिवे एव भक्तिर्भवतीत्युपपादनं। गायत्र्यर्थविचारः। तस्याः शिवादि-परत्ववादखण्डनं। सन्ध्यानुष्ठाननित्यता। 'आग्नेयो वै ब्राह्मण' इत्यादि श्रुत्या अग्निसाध्यकर्म्म-भिरग्न्यन्तर्यामिणः शिवस्य यजनरूपमाराधनं ब्राह्मणकुलस्य प्रतिपादितमितिवादखण्डनं। भगवद्भजनाकरणे दोषकथनं। भगवत्कृतशिवाराधनबोधकवचनानां तात्पर्य्यकथनं। सर्व्व-भूताश्रयस्य भगवतो युधिष्ठिरसाहाय्यकरणमपि धर्म्मसंस्थापनायेतिरहस्यकीर्त्तनं। नैयायि-कादिमतनिन्दनं। अन्धहस्तिन्यायेन भगवानेव सर्व्वशास्त्रप्रतिपाद्य इतिनिरूपणं। पञ्चपाशु-पतादीनां मोहशास्त्रत्वकथनं। सात्त्वतशास्त्रनिरूपणप्रसङ्गेन सात्त्वतस्य जन्मादिवृत्तान्त-कीर्त्तनं। मोक्षोपायादिकीर्त्तनं। श्रीकृष्णरूपमेव भगवतो मुख्यमूर्त्तिरितिनिरूपणं। तद्ध्यानादि-कथनं। तत्परिकरनिरूपणं। निराकारवादखण्डनं। कृष्णाय देवकीपुत्राय इत्यादि छान्दोग्य-वाक्यतात्पर्य्यकथनं। प्रभासलीलायाः सङ्गतिकथनं। श्रीकृष्णेन असुरविनाशाय मर्त्यलीलो-पयिकं रूपं यदुपगृहीतमासीत् तस्यैव नटवत् परित्यागोऽस्यां लीलायां न तु स्वरूपस्य इति तच्छरीरस्य अमायिकत्वनिरूपणं। उपसंहारः।

No. 3020. व्यङ्गार्थकौमुदी। Substance, country-made paper, 10 × 4½ inches. Folia, 88. Lines, 12 on a page. Extent, 3,282 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávágíśa. Appearance, fresh. Prose. Correct.

Vyaṅgártha-kaumudí. A commentary on Bhánudatta's Rasa-manjarí, a treatise on rhetoric. By Vis'veves'vara Paṇḍit.

Beginning श्रीगणेशाय नमः।

हेरम्बमम्बुजाक्षं चाम्बकमम्बरमणिञ्च जगदम्बां।

प्रणमामि प्रकृतार्थप्रत्यूहसमूहहानाय ॥

प्रणम्य सम्यक्प्रतिपत्तिरम्यं लक्ष्मीधराख्यं विषयं धरायाः ।

विश्वेश्वरेण क्रियते समासात् समञ्जसार्थां रसमञ्जरीयं ॥

प्रारिप्सितसमाप्तिप्रतिबन्धकदुरितविद्दलनाय कृतं मङ्गलं शिष्यशिक्षायै निबध्नाति आद्मीयमिति ।

End. मञ्जरीत्येकदेशोपादानमिति शिवम् ।

श्रीमन्महीमहिततत्पदसीमधीमन्मूर्द्धन्यताकलनसङ्गतधन्यतायाः ।

लक्ष्मीधरोयमदस्सूत मदं प्रसूतां विश्वेश्वरस्य कृतिरन्य चिरस्य लोक ॥

Colophon. इति श्रीविश्वेश्वरपण्डितकृता रसमञ्जरीटीका व्यङ्गार्थकौमुदी समाप्ता ।

विषयः । भानुदत्तकृतरसमञ्जर्य्या व्याख्यानं ।

No 3021. अणुभाष्यम् । Substance, country-made paper, 10 × 5½ inches. Folia, 342. Lines, 8 on a page. Extent, 6,479 ślokas. Character, Nágara. Date. Sm. 1909. Place of deposit, S'ántipura. Paṇḍit Kálidása Vidyávágíśa, Appearance, new. Prose. Generally correct.

Anubháshya. A commentary on the Vedánta Aphorisms of Vyása. By Vallabha A'chárya. The standpoints of the commentator are the absolute unity of the divine and the human soul, and the supreme divinity of Kṛishṇa. His object in the work is the refutation of all Hindu doctrines hostile to his theory.

Beginning. श्रीगोवर्द्धननाथाय नमः ।

अथातो ब्रह्मजिज्ञासा । इदमत्र विचार्य्यते वेदान्तानां विचार आरम्भणीयो न वेति । किं तावत् प्राप्तं नारम्भणीय इति । कुतः ? इत्यादि ।

End. नानामतध्वान्तविनाशनक्षमो वेदान्तहृत्पद्मविकाशने पटुः ।

आविष्कृतोऽयं भुवि भाष्यभास्करो

सुधा + + + + + वत नान्यवर्त्मसु ॥

पुरन्दरमदोद्भवप्रचुरवृष्टिसंपीड़ित-

स्वकीयवरगोकुलावनपरायणो लीलया ।

स्मितामृतसुदृष्टिभिः परिपुपोष बालान् गिरिं

दधार च स एव हि श्रुतिशिरस्सु संराजते ॥

Colophon इति श्रीमद्वेदव्यासमतानुवर्त्तिश्रीवल्लभाचार्य्यविरचिते ब्रह्मसूत्राणुभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः । संवत् । १९०९ ।

विग्रहः । विष्णुस्वामिमतानुसारेण ब्रह्मसूत्रव्याख्यानं । तथा हि, रामानुजाचार्य्य विष्णु-स्वामि-मध्वाचार्य्य-निम्बार्काचार्य्यप्रवर्त्तितानां क्रमेण श्री-रुद्र-माध्व-सनकोपपदानां यथाक्रमं विशिष्टाद्वैत-शुद्धाद्वैत-शुद्धद्वैत-द्वैताद्वैतमतसम्बन्धिनां सुप्रसिद्धानां चतुर्णां वैष्णवसम्प्रदायानां मध्ये वल्लभाचार्य्योऽयं विष्णुस्वामिमतप्रवर्त्तकतया वैष्णवैराचार्य्य इति कृतां पदवीमभिषेकपुरःसरं समधिजगाम । एतन्मते शुद्धाद्वैते जीवपरमेश्वरयोः सेव्यसेवकयोरंशांशिभावो जलविन्दुजलाशययोरिव । सर्व्वञ्चेदं परिदृश्यमानं वस्तुजातं भगवत एव आविर्भवति लूतातन्तुरिव अयेति च तमेव । तथा मायिकगुणसम्पर्कशून्यः परमेश्वरः श्रीकृष्ण एव उपास्यदेवः । किञ्च एतदुपासनयैव सर्व्वलोकोपरितनगोलोकप्राप्तौ आनन्दाविर्भावात्मोक्षः नान्यदेवोपासनया अन्यदेवोपासनाकर्त्तव्यताबोधनपरश्रुतयस्तु श्रीकृष्णविषयकपरमानुरागप्राप्तिद्वारा परम्परया मोक्षसाधिकाः ।

No. 3022. काव्यप्रदीपः । Substance, country-made paper, 9 × 4 inches. Folia, 207. Lines, 10—11 on a page. Extent, 5,407 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Paṇḍit Kálidása Vidyávágíśa. Appearance, fresh. Prose. Correct.

Kávya-pradípa. A commentary on Mammaṭha Bhaṭṭa's *Kávya-prakás'a*, a treatise on rhetoric. By Govinda Mahámahopá-dhyáya.

Beginning. श्रीगणेशाय नमः ।

सीतादेव्याः प्रथमतनयः केशवस्यात्मजन्मा
श्रीगोविन्दो रुचिकरकवेः प्रेमपात्रं कनीयान् ।
श्रीमन्नारायणचरणयोः सम्यगाधाय चित्तं
नत्वा सारस्वतमपि महः काव्यतत्त्वं व्यनक्ति ॥

वचनसन्दर्भविशेषरूपस्य ग्रन्थस्य प्रारिप्सितत्वेन स्तोतुमुचितायाः सेव्यमानायाश्च वाग्देव्या आस्मदभूतां कविभारतीं तदभिन्नत्वेन अध्यवसितां प्रारिप्सितप्रतिबन्धकदुरितशान्तये ग्रन्थकृत् संस्तौति नियतिकृतेति । इत्यादि ।

End. परिशीलयन्तु सन्तो मनसा सन्तोषशीलेन ।
इममद्भुतं प्रदीपं प्रकाशमपि यः प्रकाशयति ॥
दीपिकाद्वितयं काव्ये प्रदीपद्वितयं सुतौ ।
समतौ सम्यगुत्पाद्य गोविन्दः शर्म्म विन्दति ॥

Colophon. इति श्रीमहामहोपाध्यायश्रीगोविन्दविरचिते काव्यप्रदीपे अर्थालङ्कार-निर्णयो नाम दशम उल्लासः समाप्तः ।

विषयः । मम्मटभट्टकृतकाव्यप्रकाशस्य व्याख्यानं ।

No. 3023. रत्नपालचरित्रम् । Substance, country-made paper, 13 × 4 inches. Folia, 48. Lines, 15 on a page. Extent, 558 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Gujráṭi bháshá.

Ratnapála-charita. A biographical account of Ratnapála, a a Jain saint, and praise of Jain duties. By Kavimohan, or Mohan the poet. The work is in Guzrati verse.

Beginning. सकलश्रेणिमंदिरतणीदायक अनुदिन जेह ।
तेजें कोइ रूपर्छे तेहथीश्वरीये नेह ॥
अविन्यासी अव्यय अरुज अक्षयबली अलक्ष ।
निराकार निरुपाधिगुण नवितसकाइपक्ष ॥
आदि अनादिरूप ननन्यारी बली निरवेद ।
रूपा अरूपी जीवतो + णदापीमकेभेद ॥ इत्यादि ।

End. होस्ये घरि घरि मंगलमालामांभलतां एरासजो ।
वनकणकंचणलीलालक्ष्मीमोहन विजये विलासजो ॥

Colophon. इति श्रीरत्नपालचरित्रे कविमोहनविरचिते चतुर्थकाण्ड ।

विषयः । रत्नपालस्य नृपेः सविस्तरजीवनवृत्तान्तकीर्त्तनमुखेन जैनधर्ममाहात्म्यकथनम् ॥

No. 3024. उपासकदशाङ्गबालबोधिनी । Substance, country-made paper, 10 × 5 inches. Folia, 53. Lines, 10 on a page. Extent, 1,524 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Correct.

Bálabodhiní ALIAS **Subodhiní** ALIAS **Upásaka-dasáñga-bálabodhini.** A Guzrati paraphrase of the Upásakadasáñga of the Jains.

Beginning. प्रणम्य श्रीमहावीरं जगदानन्ददायकं ।
उपासकदशाङ्गस्य वक्ष्ये व्याख्यां सुबोधिनीम् ॥

तेणंइ काले तेणंइ समये चंपानामइं नगरी हति। तेहणुवणक पूर्णभद्रनामा चैत्यवन-तेहन उवाइथीजा। वर्णकवचिवउ इहां चैत्यवाडी नृणिउ। इत्यादि।

End. इमे दिहाड़ेउ देसुउदेसी इति + रइ श्रुतस्कधइग्रकुहिसइ। अनुज्ञाइ जुवइ दिवसे श्रुतांगतिमच्चीज॥

Colophon. इत्युपासकदशाङ्गबालबोधिनी समाप्ता।

विषयः। जैनोपासकदशाङ्गस्य गुर्ज्जरभाषया व्याख्यानम्।

No. 3025. विपाकाङ्गसूत्रवृत्तिः। Substance, country-made paper, 10 × 5 inches. Folia, 47. Lines, 8 on a page. Extent, 782 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Sanskrit.

Vipákánga-sútra-vritti. A Sanskrit gloss on the Vipákánga Sútra, a Jain treatise on works and their retributions. By Abhayadeva A'chárya. The text has been noticed under No. 2887, (*ante*, VIII, 319).

Beginning. प्रणम्य श्रीवर्द्धमानं वर्द्धमानश्रुताध्वना।
विपाकश्रुतशास्त्रस्य वृत्तिकेयं विधास्यते॥

अथ विपाकश्रुतमिति कः शब्दार्थः। उच्यते विपाकः पुण्यपापरूपं कर्म्मफलं। तत् प्रतिपादनपरं श्रुतमागमो विपाकश्रुतमिदं। इत्यादि।

End. षच येन जिनागमे भक्तिपरा इति।

Colophon. कृत्तिरियं संविग्नमुनिजनप्रधानश्रीजिनेश्वराचार्य्यचरणकमलचञ्चरीककल्पस्य श्रीमदभयदेवाचार्य्यस्य। इति समाप्तोऽयं ग्रन्थः।

विषयः। जैनकर्म्मविपाकसूत्रस्य व्याख्यनम्।

No. 3026. वर्द्धमानदेशना। Substance, country-made paper, 12 × 5 inches. Folia, 182. Lines, 12 on a page. Extent, 5,096 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Mágadhí interspersed with Sanskrit.

Varddhamánadeśaná. A paraphrase, in Arddhamágadhi, of certain lectures and sermons of Varddhamána Jina, illustrated by a number of stories descriptive of Jain duties and moral precepts. By Rájakírti Gaṇi.

Beginning. नमः श्रीपार्श्वनाथाय वाञ्छितार्थप्रदायिने ।
करोमि गद्यबन्धेन श्रीवर्द्धमानदेशनां ॥

अस्मिन् जम्बूद्वीपे भरतनामक्षेत्रं वर्त्तते तस्मिन् भरते वाणिज्यनामनगरोऽस्ति । इत्यादि ।

End. जम्बूस्वामी समभावभावितात्मा धर्म्मपरायणो जातः ।

अस्मिन् ग्रन्थे यत्किञ्चिदुत्सूत्रदूषणं भवति तत्सर्व्वं श्रुतधराः शोधयन्तु गतमत्सराः ॥

Colophon. इति श्रीवृहत्खरतरगच्छे श्रीजिनभद्रसूर्य्यान्तेवासिवाचनाचार्य्यश्रीपद्ममेरुगणितच्छिष्यश्रीमतिवर्द्धनगणितच्छिष्यश्रीमेरुतिलकगणितच्छिष्यश्रीदयाकलशगणितच्छिष्यामरमाणिक्यगणितच्छिष्यश्रीचमारङ्गगणितच्छिष्यवाचनाचार्य्यश्रीरत्नलाभगणिशिष्येण श्रीराजकीर्त्तिगणिना श्रीवर्द्धमानदेशनायां गद्यबन्धेन प्रणीतायां तेतलीपिताप्रतिबोधो नाम दशम उल्लासः समाप्तः । समाप्तोऽयं ग्रन्थः ।

विषयः । वर्द्धमानजिनोक्तार्द्धमागधीभाषामयदेशनाच्छायारूपोऽयं प्रबन्धः । तत्र एकदा-जम्बूद्वीपे भरताभिधानक्षेत्रे वाणिज्यनामनगरे भगवान् वर्द्धमानो गोष्ठीं चकार । तत्र धर्म्मदेशनाशुश्रूषया समागतानां मध्ये कश्चित् आनन्दनामा श्रेष्ठी भगवता "भो भव्यलोकाः जन्मजरामरणदुःखवियोगादिपूर्णोऽयं मनुष्यलोकः । अस्मिन् संसारसागरे निमग्नानां जीवानां मानुषजन्मतावत् दुर्लभं । तत्रापि आर्य्यक्षेत्रे चोत्तमकुले प्रसूतिः दुर्लभः । दुर्लभः खलु उत्तमगुरुलाभः । दुर्लभश्च पुनः धर्म्मश्रवणं नाम । एवं ज्ञात्वा निद्राक्रोधादिकषायान् विहाय विधाय च परमोद्यमं धर्म्मानुष्ठाने सम्यक्त्वमधिगम्य आरामशोभावत् सुखमनुभवन्तिति" कथिते तदारामशोभादृष्टान्तविवरणं जिज्ञासुरसौ भूय एव भगवन्तं पप्रच्छ । अथ भगवान् तद्विवरणमेवमाह स्म । तत्र स्थलाशयाभिधाननगरनिवासिनः अग्निशर्म्मनामधेयस्य विप्रवर्य्यस्य कन्याया वृत्तान्तकीर्त्तनं । अथ भगवान् पुनराह स्म । जीवदयादिव्रतानि । तत्र तत्र विविधोपाख्यानकथनञ्च । प्रथमतो जीवदयारूपाणुव्रतकथनपूर्वकं सत्यभाषणरूपद्वितीयाणुव्रतकथनं । तत्र २ विविधोपाख्यानकथनञ्च अदत्तादानग्रहणदानग्रहणविरतिरूपतृतीयाणुव्रतविधितद्विवरणादिकथनं । शीलरूपचतुर्थाणुव्रतविधितद्विवरणादिकथनं । परिग्रहपरिमाणरूपपञ्चमाणुव्रतविधितद्विवरणकथनं । अथ रात्रिभोजनाभावव्रतकथनं । तत्र विविधोपाख्यानकथनञ्च । अथ त्रिविधगुणव्रतविधिकथनादिकं । दिग्व्रतविधिकथनादिकं । भोगोपभोगव्रतविधिकथनादिकं । अनर्थदण्डविरतिव्रतविधिकथनादिकं । सामायकव्रतविधानादिकथनं । देशावकाशिकव्रतविधानादिकथनं । अथ कुव्यापारपोषध-आहारपोषध--ब्रह्मव्रतपोषध-शरीरसत्कारपोषधरूपचतुर्विधपोषधव्रतविधानादिकथनं । आनन्दस्य जैनधर्म्मादिग्रहणवृत्तान्तकथनं । अथ जम्बूस्वामिना सह सुधर्म्मस्वामिनः संवादेन कामदेवाभिधानश्रावकस्य चरितकीर्त्तनं । तत्र धर्म्मनिदेशक-पङ्क्तिभेदक-निद्राच्छेदक निरर्थकथक-वृथापापिरूपपञ्चविधाततायिनिरूपणादिकथनं । तत्र २ उपाख्यानकथनञ्च । अथ श्रावकस्य चुलणीपितुश्चरित्रवर्णनं । अथ सूरदेवनामधेयस्य श्रावकस्य चरित्रकीर्त्तनं ।

अथ चुल्लगशतनामकस्य श्रावकस्य चरितकथनं। अथ कुम्भकोलिकसंज्ञकश्रावकस्य चरित्रकथनं। अथ दामन्नकश्रावकचरित्रकथनं। अथ सद्दालपुत्रश्रावकस्य प्रतिबोधादिकथनं। अथ महाशतकनामधेयश्रावकस्य चरितकथनं। अथ नन्दनीप्रियनामकश्रावकस्य प्रतिबोधादिवर्णनं। अथ भविकानां प्रतिबोधार्थं तेतलीपितृनामधेयस्य श्रावकस्य चरित्रकथनं। अत्र सर्वत्र दृष्टान्ततया विविधोपाख्यानकीर्त्तनञ्चेति ज्ञेयम्।

No. 3027. विक्रमसेनकुमारचउपई। Substance, country-made paper, 12 × 4 inches. Folia, 35. Lines, 14 on a page. Extent, 1,500 ślokas. Character, Nágara. Date, Sm. 1805. Place of deposit, Ájimganj, Ráya Dhanapat Siñh Bahádur. Appearance, fresh. Verse. Incorrect. Hindi.

Vikramasena-kumára-chaupai. A Hindi poem on the loves of Kumára Vikramasena and Lílávatí. Anonymous.

Beginning. सुदाता संपेसरोपूरण परम उल्लास।
सांनिधकरज्यो साहि+ अधिकफलेस्तुउ+स ॥
सारदचंदसमी व+वदल अनोपमजाय।
+रदसुपमप्रहोज्यो+सकवचनविलाय॥
चरणकमलसट्गु+तण+सेवुंहित आण।
कि+यांकुंजरकरै ते समव+कुणजाण॥ इत्यादि।

End. विक्रमचरितनै चौपइ+होग्रंथरच्योमैंजो इजो।
अधिको+ +भाख्योसोइ मिछादुक्कव+होइजो॥
भावकरीनै येनरभणस्यै ते सेवरमणीवरस्यैजो।
एम वंधि सदा संभलस्यै तास मनोरथफलस्यैजो॥
ढालाभावनसीजेसै गाइसानसागरसुखदाइजो।
दिनदिन चढ़ते तेजसवाइ दिनदिन दौलति पाइजो॥

Colophon. इति श्रीविक्रमसेनकुमारचउपई समाप्त। संवत् १८०५।

विषयः। विक्रमादित्यकुमारस्य विक्रमसेनाभिधानस्य लीलावत्या सह परिणयादिवर्णनम्।

No. 3028. कयवन्नाचउपई। Substance, country-made paper, 12 × 4 inches. Folia, 22. Lines, 16 on a page. Extent, 262 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Kayavanná-chaupaí. A Hindi poem giving the substance of a discourse between Varddhamána Jina and one Abhayakumára on religious benefactions. Anonymous.

Beginning. स्वस्तिश्रीसुखसम्पदादायक अरिहन्त देव।
झेवकरू स्रधे मने नाम जपुं नितमेव॥
समभुं सरसति सांमणि प्रणमु सद्गुरुपाय।
कयवन्नाचोपई क+दानधनमदौपाय॥
प्रथमसंसंघचौमा+यो श्रीगौतमस्वांमिलब्धि।
सुगुरश्रीअभयकुंमरमन्त्रीसरणिवुद्धि॥ इत्यादि।

End. सरसढालनकांइप+तौ तौसउ परइ कचड़तौजो।
पूरौस्कंणतांहौ यो वौकस्यो धरमकरणमन उल्लस्योजो॥

Colophon. इति श्रीकयवन्नाचउपई समाप्त।

विषयः। वर्द्धमानेन सह अभयकुमारस्य संवादेन दानधर्म्ममाहात्म्यकीर्त्तनम्।

No. 3029. न्यायबोधिनी। Substance, country-made paper, 16 × 4 inches. Folia, 48. Lines, 9 on a page. Extent, 1,069 ślokas. Character, Nágara. Date, Sk. 1702. Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, decayed. Prose. Correct.

Nyáya-bodhiní. The elements of the Nyáya and the Vais'eshika systems of philosophy, in describing which the author refutes all adverse doctrines. By Durgádatta Sanmis'ra.

Beginning. प्रणम्य परमेशानं स्वर्गापवर्गकारणम्।
क्रियते बालबोधाय सुबोधा न्यायबोधिनी॥

तत्र प्रमाणादिषोड़शपदार्थानां साधर्म्यवैधर्म्याभ्यां तत्त्वज्ञानादात्यन्तिकदुःखनिवृत्तिरूपपरमपुरुषार्थाधिगम इति भगवानक्षपादः। तत्र प्रमाणस्वरूपं तावद्विवेचनीयं। इत्यादि।

End. इति तत्तत्प्रकारतानिरूपकमेव तत्कार्य्यकारणभावविशेषत्वमिति।

Colophon. इति मन्मिश्रश्रीदुर्गादत्तविरचिता न्यायबोधिनी सम्पूर्णा। समाप्तोऽयं ग्रन्थः। शकाब्दाः १७०२।

विषयः। न्यायवैशेषिकमतनिरूपणम्। तत्र प्रमाणादिषोड़शपदार्थानामुद्देशक्रमेण प्रमाणपदार्थनिरूपणम्। प्रत्यक्षानुमानोपमानशब्दभेदात् तस्य चतुर्व्विधत्वनिरूपणमुखेन अर्थापत्त्यादीनां तदन्तर्गतत्वकथनं। प्रत्यक्षमात्रप्रमाणवादिनां चार्व्वाकादीनां मताक्षेपकथनम्। प्रमेयपदार्थनिरूपणं। तत्र कणादोक्तद्रव्यादिपदार्थानामन्तर्भावादिनिरूपणं। माध्यमिकादिमतखण्डनं। आत्मस्वरूपलक्षणपरीक्षादिनिरूपणं। परमात्मानुमानप्रकारकथनं। हेत्वाभासादिनिरूपणं। वादजल्पादिस्वरूपादिकथनं। अपवर्गसाधनादिकथनञ्च॥

No. 3030. नवपदप्रकरणम्। Substance, country-made paper, 12 × 4 inches. Folia, 64. Lines, 12 on a page. Extent, 1,632 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect. Arddha Mágadhí.

Navapada-prakaraṇa. A metaphysical disquisition on truth and untruth and the modes of ascertaining them, from a Jain standpoint. By Jinachandra Gaṇi *alias* Devagupta A'chárya, disciple of Kakkácharya.

Beginning. नमिऊण वद्धमाणं मिच्छं सम्मत्तयाइं संलेहा।
नवभेयाइं वोच्छं सद्दाणमणुगाहट्ठाए॥
जारिसओ जइभेओ जहजायइ जहवइ च्छदोसगुणा।
जहगुणा जहअइ याए भंगोतह भावनाणेया॥ इत्यादि।

End. इइनवपयं ओएयं रइयं सीसेण कक्कसूरिस्स।
गणिणा जिणचंदेणं स्रण+मणुग्गयं च॥

No. 3072. सिन्दूरप्रकरव्याख्या। Substance, country-made paper, 13 × 5 inches. Folia, 32. Lines, 15 on a page. Extent, 300 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit.

Sinduraprakaraṇa vyákhyá. A commentary on the work noticed under No. 2609. (*Ante* VIII, p. 113.) By Dharma-súri.

श्रीपार्श्वनाथाय नमः।

Beginning. इह हि प्रवर्त्तमानाः निःममानाः स्वमाध्यविधिसिद्धये विकसन्तः सन्तः सकलमङ्गलार्थं + + + शास्त्रपरिसमाप्त्यर्थञ्च समुचितेष्टदेवतानमस्कारपुरःसरमेव प्रवर्त्तन्ते— — — — — — — — — — तावदाशीर्व्वादपद्यं समुपदिशति। सिन्दूर इति। पार्श्वप्रभोः क्रमयोश्चरणयोर्नखद्युतिभरो नखकान्तिसमूहो वो युष्मान् पातु रक्षतु संसृतिसरित्प्रतिपातादितिशेषः। इत्यादि।

End. सोमप्रभाचार्य्य इति सूत्रकारनामसूचनमिति वृत्तार्थः। अभजदिति सुगमं॥

श्रीजिनसागरसूरिशिष्येण विहृष्यता धर्म्मः।
धर्म्मेण योऽत्र लेभे तेन जनोऽन्योस्तु धर्म्मपरः॥
— — — — — — —।

Colophon. इति श्रीसिन्दूरप्रकरव्याख्या सम्पूर्णा॥

विषयः। सोमकीर्त्तिकृतसूक्तिमुक्तावल्यपराभिधानसिन्दूरप्रकरनामकसन्दर्भस्य व्याख्यानम्।

No. XXIII.

NOTICES

OF

SANSKRIT MSS.

RÁJENDRALÁLA MITRA, LL. D., C. I. E.

Honorary Member of the Royal Asiatic Society of Great Britain and Ireland, of the Physical Class of the Imperial Academy of Sciences, Vienna, of the Italian Institute for the Advancement of Knowledge, of the American Oriental Society, of the Asiatic Society of Italy and of the Bombay Branch of the Royal Asiatic Society; Corresponding Member of the German Oriental Society, of the Royal Academy of Sciences, Hungary, and of the Ethnological Society of Berlin; Fellow of the Royal Society of Northern Antiquaries, Copenhagen, &c., &c.

PUBLISHED

UNDER ORDERS OF THE GOVERNMENT OF

BENGAL.

VOLUME IX. PART II.

FOR THE YEAR 1887-88.

CALCUTTA

PRINTED BY G. H. ROUSE, AT THE BAPTIST MISSION PRESS.

1888.

35

Prof A. Weber

56 Ritterstrasse

Berlin

Germany

No 3073. मन्त्रयन्त्रविधिविधानम् । Substance, country-made paper, 12 × 5 inches. Folia, 34. Lines, 15 on a page. Extent, 1,183 ślokas. Character, Nágara. Date, Sм. 1863. Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Incorrect. Sanskrit and Hindi.

Mantra-yantrabidhi-vidhána. Mystic rites with mantras and mystical diagrams, founded on a portion of the Bhaktámara-stotra of the Jains. Name of the author not made out.

Beginning. भक्तामरप्रणतमौलिमणिप्रभाणा
मुद्योतकं दलति पापतमोवितानम् ।
सम्यक् प्रणम्य जिनपादयुगं युगादा
वालम्बनं भव जले पततां जनानाम् ॥
— — — — — — ।

अथ मन्त्रः । ॐ ह्रीं ह्रैं ह्रूं श्रीं क्लीं क्लूं क्रौं क्रीं नमः । एवं मन्त्रध्याने सर्व्वसिद्धिः । महाप्रभावसकलोपद्रवनिवारणं । अथ यन्त्ररचना । ओङ्कारेण वेष्टिते चतुर्दिङ्मण्डले ह्रीङ्कारेण वेष्टयेत् । ऋद्धिमन्त्रेण वेष्टयेत् । तदुपरि चतुर्दिक्षु ॐक्लौङ्कारेण वेदवेदेन (४४) वेष्टयेत् । इत्यादि ।

End. मैं सर्व्वसिद्धिमनोवाञ्छितकार्य्यकौसिद्धि होइ । जीं हनें वसिकरणों होय तिंहको नाम मनमै चिंतवीजै मनोवाञ्छितकार्य्यसिद्धि होय ॥

Colophon. इति श्रीअठतालीसमां काव्यस्य मन्त्रयन्त्रविधिविधानं सम्पूर्णम् । संवत् १८६३ ।

विषयः । भक्तामरस्तोत्रस्य ऋद्धिमन्त्रयन्त्रादिनिरूपणपूर्व्वकं वशीकरणादिविधिकथनं यन्त्राणां संस्थानकथनञ्च ।

No. 3074. कल्याणमन्दिरस्तवः । Substance, country-made paper, 12 × 5 inches. Folia, 4. Lines, 8 on a page. Extent, 100 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Verse. Generally correct.

Kalyáṇa-mandira-stava. A hymn in praise of the different attributes of the last Jina. Author's name not made out.

Beginning. कल्याणमन्दिरमुदारमवद्यभेदि भीताभयप्रदमनिन्दितमङ्घ्रिपद्मम् ।
संसारसागरनिमज्जदशेषजन्तुपोतायमानमभिनम्य जिनेश्वरस्य ॥

यस्य स्वयं सुरगुरुर्गरिमाम्बुराशेः स्तोत्रं सुविस्तृतमतिर्न विभुर्विधातुम् ।
तीर्थेश्वरस्य कमठस्मयधूमकेतोस्तस्याहमेष किल संस्तवनं करिष्ये॥ इत्यादि ।

End. इत्थं समाहितधियो विधिवज्जिनेन्द्रसान्द्रोल्लसत्पुलककञ्चुकिताङ्गभङ्गाः ।
त्वद्बिम्बनिर्म्मलमुखाम्बुजबद्धलक्ष्या ये संस्तवं(?)तव विभो रचयन्ति भव्याः ॥
जननयनकुमुदचन्द्रप्रभास्वराः स्वर्गसम्पदो भुक्त्वा ।
ते विगलितमलनिचया अचिरान्मोक्षं प्रपद्यन्ते ॥

Colophon. इति श्रीकल्याणमन्दिरस्तवः परिपूर्णः ।

विषयः । स्तोत्रव्याजेन जिनेन्द्राणां रूपगुणमहात्म्यादिवर्णनम् ।

No. 3075. जयत्रिभुवनत्रिंशिका, वृत्तिसहिता । Substance, country-made paper, 12 × 6 inches. Folia, 10. Lines, 10 on a page. Extent, 275 ślokas. Character, Nágara. Date, ? Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Text, prose, Arddha Mágadhí; Commentary, prose Sanskrit. Generally correct.

Jayatribhuvana-triñśiká, with a commentary in Sanskrit. A hymn in thirty stanzas in praise of Jina. It is said Abhayadeva Súri composed it with a view to be cured of leprosy, and the prayer was granted through the grace of the saint.

Beginning. मूलस्य,—

जय तिहुयण वरकप्परुक्ख जय जिणधन्नंतरि
जय तिहुयण कल्लाणकोसदुरियक्करिकेसरि ।
तिहुयण जणअविलं विघाण भुवणत्तयसामिय
कुणसु सुहाइं जिणेस पासथं भणय पुरट्ठिय ॥

वृत्तेः,—

अत्रायं वृद्धसम्प्रदायः । पुरा भगवान् श्रीअभयदेवसूरिर्गुर्जरधरित्र्यां संभाणकस्थाने विहृतवान् । अत्र च महाव्याधिवशेन अतीव शरीरापाटवे सति प्रत्यासन्ननगरग्रामेभ्यः पाक्षिकप्रतिक्रमणाय समाजिगमिषुर्विशेषेण समाहूतो मिथ्यादुष्कृत+नाय सर्व्वः श्रावकसंघः—— इत्यादि ।

मूलस्य,—

End. एह महारियजत्त देव इहुन्हवणमहूसत्त
जं अणलिय गुणगहणतुम्ह मुणिजणअणिसिद्धओ ।
एम पसीयसु पासनाह थं भणय पुरट्ठिय

इय मुणिवरु सिरिअभमदेव विन्नवइ अणंदिय ॥

वृत्तेः,— — — — इत्येवं मुनिवरः श्रीअभयदेवसूरिः नवाङ्गी-विवरणकरणानन्दितभूरिसूरिर्विज्ञापयति । अनिन्दितः त्रिलोकलोकश्लाघितः ॥

Colophon. इति जयत्रिभुवनत्रिंशिकावृत्तिः समाप्ता ।

विषयः । पार्श्वनाथजिनेन्द्रस्य माहात्म्यादिकीर्त्तनं स्तोत्रमिदं निर्म्माय अभयदेवसूरिः कुष्ठरोगान्निस्तीर्ण इति किंवदन्ती ।

No. 3076. मेघलता । Substance, country-made paper, 12 × 4 inches. Folia, 27. Lines, 9 on a page. Extent, 216 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Correct.

Meghalatá. A commentary on the Meghadúta of Kálidása. Author's name not made out. From his salutation it is evident that he was a Jain. The poem has the benefit of quite a host of commentators, and the works of a number of them have already been noticed in the preceding volumes.

Beginning. प्रणम्य श्रीजिनेशानं भवाब्धितरणे तरिम् ।
तन्यते बालबोधाय मेघे मेघलता स्फुटम् ॥

कश्चिदिति । कश्चिदनिर्दिष्टनामा यक्षः रामगिर्य्याश्रमेषु चित्रकूटाश्रमेषु वसतिं निवासं चक्रे अकरोत् । रामगिरेराश्रमाः रामगिर्य्याश्रमाः । अनामग्राह्य इति कथं, मित्रद्रोही गुरुद्रोही स्वामिद्रोही तथैव च ॥ तेषां नामापि न ग्राह्यं शास्त्रोदौ च विशेषतः ॥ इति वचनात् । इत्यादि ।

End. तौ तुष्टचित्तौ कथं यथास्यात् तथा अविरतसुखं यथास्यात् तथा ॥

Colophon. इति श्रीकालिदासकृतमेघदूतकाव्यस्य वृत्तिः मेघलतानाम्नी समाप्तेयं ।

विषयः । कालिदासकृतमेघदूतस्य व्याख्यानम् ।

No. 3077. भक्तामरबालाबोधः । Substance, country-made paper, 12 × 4 inches. Folia, 21. Lines, 11 on a page. Extent, 591 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Gujaráṭí Bháshá.

Bhaktámara-bálábodha. A Gujaráṭi paraphrase of the Bhaktámara-stotra, a Jain hymn. By Merusundara. Composed under orders of Jinachandra Súri.

Beginning. प्रणम्य श्रीमहावीरं नत्वा च श्रुतदेवतां ।
श्रीजिनचन्द्रसूरीणामाम्नायादेशमुत्तमम् ॥
बालालोकप्रबोधार्थमेषोऽहं मेरुसुन्दरः ।
भक्तामरमहास्तोत्रं करिष्ये वार्त्तया मुदा ॥

श्रीमहावीर प्रणमी श्रुतदेवता नइ प्रसादि श्रीजिनचन्द्रसूरिनां आदेसइं श्रीभक्तामरनउ बालाबोधवात्तारूपभविकजननां प्रतिबोधवाभणी रचिसूं । इत्यादि ।

End. स्तोत्ररूपणी पुस्पमाला जे कंठकंदल धरइ । तेहनइं लक्ष्मी स्वयं वरवरइ ॥

Colophon. इति श्रीभक्तामरबालाबोधः सम्पूर्णः ।

विषयः । भक्तामरस्तोत्रस्य गुर्ज्जरभाषया सोपाख्यानमवतारणम् ॥

No. 3078. औचित्यविचारचर्चा । Substance, country-made paper, 16 × 4 inches. Folia, 35. Lines, 10 on a page. Extent, 1,190 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Paṇḍit S'yámalála Duve. Appearance, decayed. Prose and verse. Incorrect.

Auchitya-víchára-charchá. A treatise on rhetoric. By Kshemendra *alias* Vyásadása, son of Prakás'endra. The poets cited in this work are Parimala, Dharmakírti, S'ríharsha, Rájas'ekhara, Kálidása, Bhavabhúti, Bhaṭṭa Náráyaṇa, Vána Bhaṭṭa, Chandraka, Málava Rudra, Kárpaṭika, S'yámala, Pravarasena, Muktápíḍa, Utpalarája, Amaruka, Gauḍa Kumbhakára, Bhaṭṭa Prabhákara, Bhaṭṭa Indurája, Mátrigupta, Bhaṭṭa Laṭṭana, Kumáradása, S'ríchakra, Málava Kuvalaya, Bhaṭṭa Bhallaka, Varáhamihira, Yasovarmadeva, Dípaka, Mágha, Parivrájaka Gaṅgaka, &c.

Beginning. कृतारिवञ्चने दृष्टिर्येनाञ्जनमलीमसा ।
अच्युताय नमस्तस्मै परमौचित्यकारिणे ॥
कृत्वापि काव्यालङ्कारां क्षेमेन्द्रः कविकर्णिकाम् ।
तत् + + क्तं विवेकस्य विधाय विबुधप्रियम् ॥
औचित्यस्य चमत्कारकारिणश्चारुचर्व्वणे ।
रजीवित + —स्य विचारं कुरुतेऽधुना ॥
काव्यस्यालमलङ्कारैः किं मिथ्यागणितैः + + ।
यस्य जीवितमौचित्यं विचिन्त्यापि न दृश्यते ॥
अलङ्कारास्त्वलङ्कारा गुणा एव गुणाः सदा ।
औचित्यं रस + + + स्थिरं काव्यस्य जीवितम् ॥

तत्र परस्परोपकारकरुचिरशब्दार्थरूपस्य काव्यस्योपमोत्प्रेक्षादयो ये प्रचुरालङ्कारा — इत्यादि ।

End. तदुदाहरणान्यानन्त्यान्न प्रदर्शितानीत्यलमतिप्रसङ्गेन ॥
आसीत् प्रकाशेन्द्र इति प्रकाशः काश्मीरदेशे त्रिदशेश्वरश्रीः ।
अभूद्गृहे + + पवित्रमत्रमच्छिन्नमशासनमग्रजानाम् ॥
यः स्वयम्भूभवने विचित्रे लेख्यप्रतिष्ठापितमातृचक्रः ।
तस्यात्मजः सर्व्वमनीषिशिष्यः श्रीव्यासदासापरपुण्यनामा ॥
क्षेमेन्द्र इत्यक्षयकाव्यकीर्त्तिश्चक्रे नवौचित्यविचारचर्चाम् ॥
श्रीरत्नसिंहे सुहृदि प्रयाते शार्व्वं पुरं श्रीविजयेशराज्ञि ।
तस्यात्मजस्योदयसिंहनाम्नः कृते कृतस्तेन गिरां विचारः ॥
+ + + परिवारकृत् त्रिभुवनप्रख्यातशोलद्युतेः
सर्व्वस्यावनतेन येन नितरां प्राप्ता विशेषोन्नतिः ।
आशाः शीतलतां नयत्यविरतं यस्य प्रतापानल-
स्तस्य श्रीमदनन्तराजनृपतेः काले किलायं कृतः ॥

Colophon. इति श्रीप्रकाशेन्द्रात्मजव्यासदासापराख्यश्रीक्षेमेन्द्रकृता औचित्यविचार-चर्च्चा परिपूर्णा ॥

विषयः । अलङ्कारादयः खलु यथोचितस्थानविन्यासात् काव्यमलङ्कर्त्तुं प्रभवन्ति । तत्र यत् किल यस्य अनुरूपं तदुचितमुच्यते । तस्य भाव औचित्यं तच्च सकलकाव्यशरीरजीवितभूतमिति निरूपणम् । अथ औचित्यस्य, पदे, वाक्ये, प्रबन्धार्थे, गुणे, अलङ्कारे, रसे, क्रियायां कारके, वचने, विशेषणे, उपसर्गे निपाते, काले, देशे, कुले, व्रते, तत्त्वे, सत्त्वे, अभिप्राये, स्वभावे, सारसङ्ग्रहे, प्रतिभायां, अवस्थायां, विचारे, नाम्नि, आशिषि च क्रमेण सोदाहरनं स्थितिनिरूपणम् । अत्रोल्लिखितानां कवीनां नामधेयानि, यथा,—परिमलः । धर्म्मकीर्त्तिः । श्रीहर्षः । राजशेखरः । कालिदासः । भवभूतिः । भट्टनारायणः । बाणभट्टः । चन्द्रकः । चन्दकः । मालवरुद्रः । कार्पटिकः । श्यामलः । प्रवरसेनः । मुक्तापीड़ः । उत्पलराजः । अमरुकः । गौड़-कुम्भकारः । भट्टप्रभाकरः । भट्टेन्दुराजः । मातृगुप्तः । भट्टलट्टनः । कुमारदासः । श्रीचक्रः । माल-वकुवलयः । भट्टभल्लटः । वराहमिहिरः । यशोवर्म्मदेवः । दीपकः । माघः । परिव्राजकः । शङ्कुकश्चेति ॥

No. 3079 अतीचारसूत्रम् । Substance, country-made paper, 12 × 5 inches. Folia, 8. Lines, 7 on a page. Extent, 119 ślokas. Character, Nágara. Date, Sm. 1669. Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old Verse. Correct. Arddha Mágadhí.

Atichára-sútra. Practices and conduct subversive of Jain duty. By Bañgádhika S'ramaṇa.

नमो चउवीसाए ।

Beginning. तीत्थयराण उसभाइ महावीरपज्जवसाणाणं ।

अहं भंते सुयणाणं ।

सामाइय माइयं दुवालसंगगणिपिडुगं ॥

तस्स नाणस्स इमे चउदसो अइआरा । तं जहा । इत्यादि ।

End. वढ्ढितसुहपरिणामो मम चित्तो भवउ सुइसम्मत्तो ।

लाण तव विरिय धम्मो अरहेसमणे तहा संघे ॥

Colophon. इति श्रीअतीचारसूत्रं समाप्तं । संवत् १६६९ ।

विषयः । तत्र मिथ्यात्वमोहनीयविशेषादात्मनः अशुभाः परिणामविशेषाः अतीचाराः । अथ श्रुतज्ञानस्य चतुर्द्दश अतीचाराः भवन्ति । ते खलु आविद्धं, व्यत्याम्रेडितं, हीनाक्षरं, अत्यक्षरं, पदहीनं, विनयहीनं, घोषहीनं, योगहीनं, सुखदत्तं, दुष्टप्रतीच्छितं, अकालकृतस्वाध्यायं, कालीनकस्वाध्यायं, अस्वाध्यायस्वाध्यायं ज्ञानविपर्य्ययश्चेति । तदेतद्दर्शनमोहनीयकर्म्मोपशमाय सम्यक्त्वग्रहणाय च अर्हदुक्तव्रतादीन्यनुष्ठेयानि । तत्र अणुव्रतानि पञ्च । गुणव्रतानि त्रीणि । चत्वारि च शिक्षाव्रतानि । अथ प्रथममणुव्रतं स्थूलात् प्राणातिपातात् विरमणं। द्वितीयमणुव्रतं स्थूलमृषावादात् विरमणं । तृतीयमणुव्रतं स्थूलकात् अदत्तादानात् विवरणं । चतुर्थमणुव्रतं स्थूलात् मैथुनात् (परस्त्रीगमनादिरूपात्) विरमणं । पञ्चममणुव्रतं स्थूलात् परिग्रहात् विरमणं । अत्र प्रत्येकमतीचारनिरूपणं । अथ गुणव्रतशिक्षाव्रतादिष्वपि विभागकथनपूर्व्वकं प्रत्येकमतीचारकथनञ्च ॥

No. 3080. अतीचारसूत्रटीका, वा सुखावबोधिका । Substance, country-made paper, 12 × 5 inches. Folia, 16. Lines, 12 on a page. Extent, 547 ślokas. Character, Nágara. Date, Sm. 1698. Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct. Sanskrit.

Atíchára-sútra-ṭiká ALIAS **Sukhávabodhiká.** A gloss on the work noticed under the next preceding No. Anonymous.

Beginning. श्रीमद्वीरजिनं नत्वा सर्व्वविघ्नोपशान्तकं ।

श्राद्धावश्यकसूत्रस्य व्याख्यालेशादिधीयते ॥

तत्रादौ ज्ञानाचारप्रतिक्रमणाय नमस्कारपूर्व्वकमाह नमो चउवीसा इति । नमश्चतुर्व्विंशतितीर्थङ्करेभ्यः । इत्यादि ।

End. साधुसाध्वीश्रावकश्राविकारूपे मम चित्तं भवतु तद्गुणादाविति गाथार्थः॥
प्रायः शास्त्रान्तरं वीक्ष्य टीका च लिखिता मया।
पूर्व्वव्याख्यानुसारेण काचिद्गुरूपदेशतः॥
अर्थहीनश्च यत्किञ्चिद्विरुद्धं वा जिनागमात्।
मिथ्या मे दुष्कृतं भूयात् यत्कृतं मतिजाड्यतः॥
श्रीमत्कल्याणकादेशात् कृता सुखावबोधिका।
सिद्धियुगरसैकाब्दे नभस्ये पञ्चमीतिथौ॥
वाच्यमाना चिरं भूयादेषा सश्रोतृपाठका।
आतीर्थं वर्द्धमानस्य सर्व्वभावोपदेशिका॥

Colophon. इति श्रीवङ्काधिकश्रमणविरचितातीचारसूत्रटीका सुखावबोधिका समाप्ता इति शम्। संवत् १९६८।

विषयः। वङ्काधिकश्रमणकृतातीचारसूत्रस्य व्याख्यानम्।

No. 3081. व्यङ्गार्थदीपनी। Substance, country-made paper, 13 × 3 inches. Folia, 103. Lines, 10 on a page. Extent, 2,677 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, S'yámalála Duve. Appearance, fresh. Prose. Incorrect.

Vyangártha-dípaní. A commentary on the A'ryasaptas'atí of Govardhana A'chárya. By Ananta S'armá.

Beginning. सर्व्वे साधुजनाः सदाश्रतहृदा सम्प्रदायादलं
मज्ज्ञानाय कणादगौतममतान्यालोच्य तत्त्वार्थदान्।
वेदान्तान् परिशीलयन्ति + + + स्वानन्दकन्दाकरं
वन्दे तं जगदीश्वरं दयितया सानन्दमालिङ्गितम्॥
यत्पादाम्बुजमब्जभूप्रभृतयो + + सदैवान्तरे
ध्यायन्ति क्षपयन्ति दुःखनिवहं लीलामनुष्याकृतिं।
फुल्लेन्दीवरनेत्रमतसीपुष्पावभासं लस-
च्छ्रीरामं कलयामि चेतसि चिरं चैतन्यमात्रात्मकं॥
— — — — — — —।
सन्त्यज्य दोषं गुण एवदृष्टिर्विधीयतामित्यफलं वचो मे।
विहाय नीरं सकलोऽपि हंसः पयः प्रयच्छात्युपदेशतः किं।

इह खलु विशिष्टशिष्टैष्टकर्त्तव्यताप्राप्तमङ्गलमनुषङ्गतो व्याख्यातृश्रीतमङ्गलाय उपनिबध्नाति पाणिग्रह इति । भूतिभूषितं भस्मनालङ्कृतं । भस्मनो भूषणत्वं मनोभवीयत्वेन—— इत्यादि ।

End. अर्थागमे सरणिरत्र बहुप्रकारा संदृश्यते तदपि निर्व्वहणत्तमेयं ।
महर्शिता रसवती निखिलावदातसाहित्यशालिविबुधैः परिशीलनीया ॥
— — — — — — ।
ग्रन्थोऽयं विदुषा सृष्टः पण्डितानन्तशर्म्मणा ।
खद्याश्वमन्द्राख्यसंख्यको व्यङ्गदीपकः ॥

Colophon. इति श्रीमद्गोदावरीपरिसरालङ्कृतपुण्यस्थस्थितिविराजमाननीलकण्ठ-पण्डिततनूज + + पण्डितात्मजतिमाजीपण्डिताङ्गजानन्तपण्डितविरचिता व्यङ्गार्थदीप-नीनामिकार्य्या सप्तशतीव्याख्या समाप्ता ।

विषयः । गोवर्द्धनाचार्य्यकृतार्य्या सप्तशतीनामककाव्यस्य व्याख्यानम् ।

No. 3082. जिनस्तवनम् । Substance, country-made paper, 12 × 4 inches. Folia, 4. Lines, 11 on a page. Extent, 100 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Hindi.

Jinastavana. Hymns in praise of Jina. Anonymous.

Beginning. प्रणमुं आदि जिणं इने कनकवरणजसकाय ।
राजधर्म्मनीति सवे दाखिव+सिवठाय ॥
ते प्रभुने पट्टियया वहुमुनि अन्याभूप ।
सिद्धः चलसिद्धोवद्या पाम्या आतमरूप ॥ इत्यादि ।

End. बुधवारवासर शुद्धधारी गाइया गिरिगुणलही ।
गुरुवीरवाणी पसायपां सौभारगशुद्धलच्छा वही ॥
वरचंदभाखे सीए साखे बालधिष्टद्धिसही ।
शान्तिविद्यावीमालशालाराजनग्रसां रही ॥

Colophon. इति जिनस्तवनं समाप्तं ।

विषयः । गिरणारादितीर्थवन्दनमुखेन जिनेन्द्रमाहात्म्यकथनम् ।

No. 3083. वैराग्यदीपकः । Substance, country-made paper, 13 × 5 inches. Folia, 10. Lines, 13 on a page. Extent, 214 ślokas. Character, Nágara. Date, Sm. 1914. Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Vairágya-dípaka. A Hindi poem in praise of asceticism and the miseries of domestic life. By Víravijaya.

Beginning. सयलसुहं करपासजी संखेश्वर सिरदार ।
संखेश्वर केशव जरा हरत करत उपगार ॥
सरसवचनरसवरसती सरसती भगवती जेह ।
सुभमतिदायक सुभगुरु प्रणमं+करण एहं इत्यादि ।

End. धर्म्म उत्सवमें गास्यें जेह नरनारीसुणस्यें भणस्यें रे ।
कहे कवी वीरविजय निजहेतशुचिविमलाकमलावरस्यें रे ॥

Colophon. इति श्रीवैराग्यदीपकः समाप्तः । संवत् । १९१४ ।

विषयः । संसारस्य दुःखमयत्वादिकथनमुखेन वैराग्यस्य सकलसुखसाधनत्वनिरूपणम् ।

No. 3084. वीरचिन्तामणिः, (धनुर्व्वेदसङ्ग्रहः ।) Substance, country-made paper, 12 × 4 inches. Folia, 12. Lines, 11 on a page. Extent, 280 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Rámachandra Paṇḍit Appearance, fresh. Verse. Incorrect.

Vírachintámaṇi ALIAS **Dhanurveda-saṅgraha.** A treatise on archery and warfare. By S'árṅgadhara. The colophon is so worded that the first name appears to be the name of a comprehensive work of which archery forms a part; but the introductory lines leave no room for doubt that the work is complete as it is—and the two names are aliases.

CONTENTS: Praise of archers. Style of holding the bow. Rules for presenting bows. Measure of bows. Bow-strings. Arrows. Arrow-heads. Tempering and sharpening arrow-heads. Iron shafts. Tubes or guns. Eight kinds of attitude. Five kinds of blows. Three kinds of aiming. Five kinds of advance. Four kinds of targets. Cessation from work. Rules for gymnastic exercises. Rules for piercing targets. Quick aiming. Shooting from great distances. Deep penetration. Rules of trajectory. Missing. Computation of direct velocity. Quadrangular motion. Breaking of arrows. Lasso. Cutting of wood with arrows. Shooting at globular objects. Shooting at objects in motion. Shooting at objects from their sound (without seeing them). Repelling of the missiles of opponents. Rules of warfare. Division of armies into brigades &c. Marshalling of troops.

Beginning. ईश्वरोक्तधनुर्व्वेदाद्यासस्यापि सुभाषितात् ।
पदान्याहृत्य रचितो ग्रन्थः संक्षेपतो मया ॥
विना शार्ङ्गधरं नान्यो धनुर्व्वेदार्थतत्त्ववित् ।
तेन स्वप्ने निशि प्राप्ता शिवात्तत्त्वविचारणा ॥
अतः सन्देहदोलायां रोपणीयं न मानसं ।
ग्रन्थेऽस्मिंस्वापचतुरैर्वीरचिन्तामणौ क्वचित् ॥
यस्याभ्यासप्रसादेन निष्पद्यन्ते धनुर्द्धराः ।
जेतारः परसैन्यानां तस्याभ्यासो विधीयते ॥ इत्यादि ।

End. अ+तं वायवो वान्ति पृष्ठे भानुर्वयांसि च ।
अनुव्रजन्ते मेघाश्च यस्य तस्य रणे जयः ॥
अपूर्णेनैव मर्त्तव्यं सम्पूर्णेनैव जीवति ।
तस्माद्धैर्य्यं विधातव्यं हन्तव्या परवाहिणी ॥

Colophon. इति श्रीशार्ङ्गधरविरचितवीरचिन्तामणौ धनुर्व्वेदसङ्ग्रहः समाप्तः ।

विषयः । धनुर्द्धरप्रशंसाकीर्त्तनं । धनुर्द्धारणविधिकनं । धनुर्द्दानविधिकथनं । धनुःपरिमाणादिनिरूपणं । धनुर्गुणलक्षणादिकथनं । शरलक्षणादिकथनं । फलकलक्षणादिकथनं । पायनाविधिकथनं । नाराचलक्षणादिकथनं । नालिकलक्षणादिकथनं । अथ आलीढ़प्रत्यालीढ़ाद्यष्टविधस्थाननिरूपणं । पताकावज्रमुष्ट्यादिभेदेन पञ्चविधमुष्टिलक्षणादिकथनं । त्रिविधसन्धाननिरूपणं । कैशिकादिपञ्चविधव्यायनिरूपणं । चतुर्व्विधलक्ष्यनिरूपणं । अनध्यायनिरूपणं । श्रमक्रियाविधिकथनं । लक्ष्यवेधविधिकथनं । शीघ्रसन्धानविधिकथनं । दूरपातनविधिकथनं । दृढ़वेधिताविधिकथनं । क्षीनगतिलविधिकथनं । लक्ष्यस्खलनगतिनिरूपणं । गूढ़गतिविधिकथनं । दृढ़चतुष्कविधिकथनं । वाणभङ्गविधिकथनं । वराटिकावर्त्तविधिकथनं । काष्ठच्छेदनविधिकथनं । गोलकवेधनविधिकथनं । धावल्लक्ष्यवेधविधिकथनं । शब्दवेधित्वविधिकथनं । शस्त्रादिवारणविधिकथनं । सङ्ग्रामविधिकथनं । अक्षौहिण्यादिलक्षणकथनं । व्यूहविधिकथनञ्च ॥

No. 3085. उपदेशमालावृत्तिः । Substance, country-made paper, 16 × 4 inches. Folia, 295. Lines, 14 on a page. Extent, 13,139 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Generally correct. Sanskrit.

Upadeśa-málá-vritti. A commentary on *Upadeśa-málá*, a Mágadhi treatise on Jainism. By Hemchandra Súri, Cf. No. 2687, Vol. VIII, p. 142.

ॐ नमो जिनाय ।

Beginning. येन प्रबोधपरिनिर्म्मितवाग्वरत्रा

त्रिप्रोद्धृतानि भुवनानि भवान्धकूपात् ।

निःशेषनाकिविभुवन्दितपादपद्मो

भूयान्ममाशुभभिदे स युगादिदेवः ॥

ज्ञेयार्णवं सुरवरैरिव यैः समन्तात्

सद्बोधमन्दरम+प्रविमथ्य लब्धः ।

जीवादितत्त्ववररत्नचयो भवन्तु

ते वः श्रिये विजयिनो जिनवीरपादाः ॥

— — — — — — —।

अन्तरङ्गार्थगर्भस्य यत् किञ्चिदिह वक्ष्यते ।

तत्रोपमितिग्रन्थोक्ता द्रष्टा सर्व्वापि भावना ॥

इह शिष्टाः क्वचिदिष्टे वस्तुनि प्रवर्त्तमाना विघ्नविनायकोपशान्तये शिष्टसमयपरिपालनार्थञ्चाभीष्टदेवतानमस्कारपूर्व्वकं प्रवर्त्तन्ते । अतोऽयमप्युपदेशमालाप्रकरणकर्त्ता तन्मार्गमनुवर्त्तमान आदावेव अभीष्टदेवतानमस्कारमाह । सिद्धेति ।

End. अर्थश्रुतबहुमानार्थं शिष्यप्रशिष्यपरम्परया

प्रकरणस्य स्थैर्य्या+च अपश्चिमं मङ्गलमाह ॥

न जावेति । सुगमा ॥

Colophon. इति श्रीहेमचन्द्रसूरिविरचितोपदेशमालावृत्तिः समाप्ता ॥

विषयः । उपदेशमालाभिधानमागधीमयजैनप्रकरणग्रन्थस्य व्याख्यानम् ॥

No. 3086. ऋषभपञ्चाशिकावृत्तिः । Substance, country-made paper, 12 × 4 inches. Folia, 5. Lines, 17 on a page. Extent, 324 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Correct. Sanskrit.

Rishabha-pancháśiká-vritti. A gloss on a hymn in fifty stanzas in praise of Ṛishabha. By Dhanapála Paṇḍita.

Beginning. नत्वा जिनेन्द्रवीरं सर्व्वनरामर्त्त्यपूजितं शिरसा ।

सद्भूतार्थप्रभवं साम्प्रतं तीर्थस्य कर्त्तारं ॥

भगवति गुणानुरागः सत्यः प्रेरयति मां यतोऽत्यन्तं ।

तेनाहमत्र सुजडोऽपि विवरणं कर्त्तुमिच्छामि ॥

क्लिष्टमपि यथात्यर्थं वचनं बालस्य शोभते पितरि ।
एतदपि यथा प्राप्स्यति शोभां शिष्टप्रभावेण ॥
— — — — — — —।

इह यद्यपि भगवतो गुणस्तुतिः सर्व्वापि नमस्कारस्वभावा । तथापि विशेषतः शिष्टसमय-स्मरणार्थं विघ्नविनायकोपशमार्थञ्च तावत्तस्यैवादौ नमस्कारमाह। जयजंतुकप्येति । नमस्तुभ्य-मस्त्विति क्रियाध्याहारः । यत्रान्या क्रिया नास्ति तत्रास्ति भवति परः प्रयुज्यते ॥ इत्यादि ।

End. यच्च मया विपरीतं ग्रथितं मोहात् समयप्रभ्रष्टं ।
तच्छोधयितुं शिष्टा मयि मध्यस्थाः कृतकृपाश्च ॥

Colophon. इति धनपालपण्डितकृतश्रीऋषभपञ्चाशिकावृत्तिः समाप्ता ।

विषयः । पञ्चाशत्संख्यकश्लोकमयस्य ऋषभजिनेन्द्रस्तोत्रस्य व्याख्यानम् ।

No. 3087. पद्मावतीस्तोत्रम् । Substance, country-made paper, 12 × 4 inches. Folia, 5. Lines, 9 on a page. Extent, 72 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Correct.

Padmávatí-stotra. Hymn in praise of Padmávatí or the personified attributes of Jina Párśvanátha as represented by his mystic mantra. Anonymous.

Beginning. श्रीमद्गीर्व्वाणचक्रस्फुटमुकुटतटीदिव्यमाणिक्यमाला-
ज्योतिर्ज्वालाकरालास्फुरितमुकुरिकाघृष्टपादारविन्दे ।
व्याघ्रोरुल्कासहस्रज्वलदनलशिखालोलपाशाङ्कुशाढ्ये
आं क्रों ह्रीं मन्त्ररूपे क्षपितकलिमले रक्ष मां देवि पद्मे ॥
भित्वा पातालमूलं चलचलचलिते व्याललीलाकराले
विद्युद्दण्डप्रचण्डैः प्रहरणसहितैः सद्भुजैस्तर्ज्जयन्ती ।
दैत्येन्द्रान् क्रूरदंष्ट्राकटकटघटने स्पष्टभीमाट्टहासे.
मायाजीमूतमालाकुहरितगगने रक्ष मां देवि पद्मे ॥
कूजत्कोदण्डकाण्डोड्डमरविधुरितं क्रूरघोरोपसर्गं
दिव्यं + + तपात्रं प्रगुणमणिरणत्किङ्किणीक्वाणरम्यं ।
भास्वद्वैदुर्य्यदण्डं मदनविजयिनो बिभ्रती पार्श्वभर्त्तुः
सा देवी पद्महस्ता विघटयतु महाडामरं मामकीनं ॥ इत्यादि ।

End. मातः पद्मिनि पद्मरागरुचिरे पद्मप्रसूनानने
पद्मे पद्मवनस्थिते परिलसत्पद्माचि पद्मानने ।
पद्मामोदिनि पद्मरागरुचिरे पद्मप्रसूनार्च्चिते
पद्मोल्लासिनि पद्मनाभिनिलये पद्मालये पाहि मां ॥
आह्वानं नैव जानामि नैव जानामि स्थापनां ।
विसर्ज्जनं न जानामि चमस्व परमेश्वरि ॥

Colophon. इति श्रीपद्मावतीस्तोत्रं समाप्तं ॥

विषयः । पार्श्वनाथजिनेन्द्रस्य विभूतिरूपायाः पद्मावत्याः रूपादिवर्णनमुखेन महामन्त्र-कीर्त्तनम् ।

No. 3088. धर्म्मरत्नम् । Substance, country-made paper, 14 × 4 inches. Folia, 84. Lines, 10 on a page. Extent, 1,192 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Generally correct. Arddha-Mágadhí.

Dharmaratna. On Jain duties. By S'ánti Súri. A Mágadhi work.

Beginning. नमिउण सयल गुणरयण कुलहरं विमलकेवलवीरं ।
धम्मरयण च्छियाणं जणाणं विवरेमि उवएसं ॥
भवजलहं मि अपारे दुलभं मणुयत्तणं पि जंतूणं ।
तत्थवि अणत्थहरणं दुलहं सद्दं मवररयणं ॥ इत्यादि ।

End. इय धम्मरयण पणरण मणुदियहं जेगणं मि भावंति ।
ते गलिय कलिलपङ्का निव्वाणसुहाइं पावंति ॥

Colophon. इति श्रीधर्म्मरत्नप्रकरणं परिपूर्णम ॥

विषयः । जैनधर्म्मरूपरत्नमेव सर्व्वथा सृग्यमितिनिरूपणमुखेन गुणविभवरहितानां पञ्चेन्द्रियजीवानां तावद्धर्म्मप्राप्तिर्नास्तीतिकथनं । अत्र पशुपालस्य दृष्टान्तकीर्त्तनं । अथ एकविंशतिविधैः गुणैः सम्पन्नः खलु तद्धर्म्मप्राप्तियोग्य इति निर्णयः । ते च गुणाः यथा,—अनुत्तानमतित्वं, स्वभावतोऽपापकर्म्मत्वं सदाचारचारित्वं, अक्रूरत्वं, धर्म्मभीरुत्वं अशाठ्यं, प्रार्थनाभङ्गभीरुत्वं, अकार्य्यवर्ज्जकत्वं, सत्त्वानुकम्पा, रागद्वेषराहित्येन सौम्यदृष्टित्वं, गुणपचपातिता, धर्म्मकथानुरागिता, सुशीलानुकूलपरिवारयुक्तत्वं, परिणामदर्शिता, अपचपातित्वेन गुणदोषविशेषवादिता, परिणतमतिपुरुषसेवनं, विनयः, कृतज्ञता, परहितार्थकारिता, धर्म्मानुष्ठानव्यवहा-

रत्नद्वयत्वञ्चेति। अथ अनुत्तानमतित्वादिगुणस्थानेषु प्रत्येकं सप्रपञ्चमुपाख्यानकीर्त्तनं। अथ गुणतारतम्येन उत्तममध्यमजघन्यभेदादधिकारिणां चातुर्व्विध्यकथनं। अथ श्रावकधर्म्मः, मतिधर्म्मश्चेति धर्म्मस्य द्विविधत्वकथनं। तत्राद्यस्य विरतश्रावकधर्म्मः, अविरतश्रावकधर्म्मश्चेति द्वैविध्यनिरूपणं। अथ नामश्रावकः, स्थापनाश्रावकः, द्रव्यश्रावकः, भावश्रावकश्चेति श्रावकचातुर्व्विध्यकथनं। अथ भावश्रावकस्य षट् चिह्नानि। यथा,—कृतव्रतकर्म्मत्वं, शीलता, गुणवत्ता, ऋजुव्यवहारिता, गुरुसेवनं, जिनमततत्त्ववित्त्वञ्चेति। अथ आकर्णन-ज्ञान-ग्रहण-प्रतिसेवनभेदेन कृतव्रतकर्म्मणश्चतुर्विधत्वकथनं। क्रमेणैषामवान्तरभेदनिरूपणमुखेन षड्भङ्गादिस्वरूपादिकथनं। तत्र तत्र प्रत्येकं सविस्तरमुपाख्यानकीर्त्तनञ्च। अत्रेदमाकूतं, सम्यक्सिद्धान्तकथनपरिभावनपराणां तदुक्तानुष्ठानकरणप्रवृत्तानां प्रतिक्षणप्रवर्द्धमानोत्तरोत्तरशुभाध्यवसायनीरपूरप्रक्षालितसकलघनघातिकर्म्मकालुष्याणामविकलसकलविमलकेवलावलोकितलोकालोकानां भव्यसत्वानां सम्भाव्यत एव क्षेत्रकालसंहननादिसमग्रोदग्रसामग्रीवशात् पारम्पर्य्येण निर्व्वाणसुखप्राप्तिरिति।

No. 3089. धर्म्मरत्नवृत्तिः, वा सुखबोधा। Substance, country-made paper, 14 × 4 inches. Folia, 253. Lines, 14 on a page. Extent, 10,634 ślokas. Character, Nágara. Date, Sm. 1876. Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Correct. Sanskrit and Mágadhí.

Dharmaratna-vṛitti ALIAS Sukhabodhá. A commentary on the work noticed under the next preceding No. By Devendra Súri.

Beginning. सज्ज्ञानलोचनविलोकितसर्व्वभावं
निःसीमभीमभवकाननदावदाहं।
विश्वार्च्चितप्रवरभासुरधर्म्मरत्न-
रत्नाकरं जिनवरं प्रयतः प्रणौमि।
श्रीधर्म्मरत्नशास्त्रं वक्ष्यर्थं स्वल्पशब्दसन्दर्भं।
स्वपरोपकारहेतोर्विवृणोमि यथाश्रुतं किञ्चित्॥

इह हि हेयोपादेयादिपदार्थसार्थपरिज्ञानप्रवीणस्य जन्मजरामरणरोगशोकादिदौर्गत्यनिपीड़ितस्य भव्यसत्वस्य स्वर्गापवर्गादिसुखसम्पादनाबन्ध्यनिबन्धनं सद्धर्म्मरत्नमुपादातुमुचितं। तदुपादानोपदेशदातुकामः सूत्रकारः शिष्यमार्गानुगामितया पूर्व्वं तावदिष्टदेवतादिनमस्कारादिप्रतिपादनार्थमिमां गाथामाह। नमिऊण इति।

End. शेषकालसंहननादिसमग्रोदग्रसामग्रीवशात् पारम्पर्य्येण निर्व्वाणसुख-प्राप्तिरिति ॥

Colophon. इति श्रीधर्म्मरत्नवृत्तिः समाप्ता ।
विष्णोरिव यस्य विभोः पदत्रयी व्यानशे जगन्निखिलं ।
सद्धर्म्मरत्नजलधिः स श्रीवीरो जिनो जयतात् ॥
कुन्दोज्ज्वलकीर्त्तिभारैः सुरभीकृतसकलविष्टपाभोगः ।
शतमखशतविनतपदः श्रीगौतमगणधरः पातु ॥
— — — — — — — ।
स्वान्ययोरुपकारार्थं श्रीमद्देवेन्द्रसूरिणा ।
धर्म्मरत्नस्य टीकेयं सुखबोधा विनिर्ममे ॥
कल्याणमस्तु । संवत् १८७६ ।

विषयः । जैनधर्मरत्नसूत्रस्य व्याख्यानम् ।

No. 3090. नर्म्मदासुन्दरीकथा । Substance, country-made paper, 13 × 4 inches. Folia, 13. Lines, 9 on a page. Extent, 338 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect. Sanskrit.

Narmadásundarí-kathá. The story of Narmadásundarí, a lady of high religious merit who was greatly devoted to the practice of Jain duties. By Bhadraváhu.

Beginning. अत्रैवास्ति सुविस्तीर्णे जम्बूद्वीपस्य भारते ।
वर्द्धमानं गुणैः पौरैर्वर्द्धमानाभिधं पुरं ॥
वतंसो मौर्य्यवंशस्य कुणालः चितिपालकः ।
त्रिखण्डभरतस्वामी सम्प्रति + च भूपतिः ॥
तस्मिन् वृषभसेनाख्यः सार्थवाही महर्द्धिकः ।
जिनधर्मरतो नित्यमभूद्वीरमतीप्रियः ॥
सहदेववीरदासौ सुतौ तस्य बभूवतुः ।
ऋषिदत्ता च दुहिता सर्व्वस्त्रीगुणसेवधिः ॥ इत्यादि ।

End. इति हरिपिट + + भद्रबाहुप्रणीते-
र्विरचितमिह लोकश्रोत्रपात्रैकपेयं ।

परिचितमलमेतन्नर्मदासुन्दरीयं

भवतु शिवनिवासप्रापकं भक्तिभाजां ॥

Colophon. इति श्रीनर्मदासुन्दरीकथा समाप्ता ।

विषयः । शीलमाहात्म्यकीर्त्तनप्रसङ्गेन जैनधर्मानुरागिण्या नर्मदासुन्दर्य्याः चरित्रादि-वर्णनम् ।

No. 3091. धन्यकथा । Substance, country-made paper, 13 × 4 inches. Folia, 12. Lines, 9 on a page. Extent, 300 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Dhanyakathá. The story of Dhanya in course of which the merits of beneficence and Jain duties are described at length. By Dayávardhana, disciple of Jayachandra Surindra.

Beginning. श्रीवीरजिनमानम्य गणेशं गौतमं तथा ।

स्मृत्वा वाग्देवतां चित्ते दानधर्मः प्रचक्ष्यते ॥

पात्रे ददाति यो वित्तं निजशक्त्या सुभक्तितः ।

सौख्यानां भाजनं स स्याद्यथा धन्योऽभवत् पुरा ॥ इत्यादि ।

End. श्रीजयचन्द्रसुरीन्द्रशिष्यलेशेन धीमता ।

दयावर्द्धनसंज्ञेन चक्रे धन्ये निदर्शनम् ॥

Colophon. इति श्रीधन्यकथा परिपूर्णा ॥

विषयः । जिनोक्तविधिना दानधर्मानुष्ठानमाहात्म्यकथनमुखेन धन्यस्य उपाख्यानक-थनम् ।

No. 3092. दशवैकालिकसिद्धान्तलघुवृत्तिः । Substance, country-made paper, 16 × 5 inches. Folia, 36. Lines, 19 on a page. Extent, 2,834 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect. Sanskrit.

Daśavaikálika-siddhánta-laghu-vritit. A concise gloss on the *Dasavaikálika-siddhánta*. A Jain Sútra. Anonymous.

Beginning. जयति विजितान्यतेजाः सुरासुराधीशसेवितः श्रीमान्।
विमलस्त्रासविरहितस्त्रिलोकचिन्तामणिर्वीरः॥

इहार्थतस्तत्प्रणीतस्य सूत्रतो गणधरोपनिबद्धपूर्व्वगतोद्धृतस्य शारीरमानसातिकटुकदुः-खसन्तापविनाशहेतोर्दशवैकालिकाभिधानशास्त्रस्यातिसूक्ष्ममहार्थगोचरस्य व्याख्या प्रस्तूयते। तत्र प्रस्तुतार्थप्रतिपादनार्थमेव नमस्कारद्वारेण अशेषविघ्नविनायकोपशान्तये भगवान् शय्यम्भवाचार्य्यो भावमङ्गलगाथामाह। धम्मोमङ्गलमित्यादि। मङ्ग्यते हितमनेनेति मङ्गलं। उत्कृष्टं प्रधानं। इत्यादि।

End. जन्ममृत्युजराव्याधिरोगशोकाद्युपद्रुते।
संसारसागरे रौद्रे भ्रमन्ति + विडम्बिताः॥
ये पुनर्ज्ञानसम्यक्त्वचारित्रद्धिसम्पदः।
भवाम्बुधिं समुल्लङ्घ्य ते यान्ति पदमव्ययम्॥

Colophon. इति श्रीदशवैकालिकसिद्धान्तलघुवृत्तिः समाप्ता।

विषयः। दशवैकालिकाभिधेयजैनसूत्रस्य व्याख्यानम्।

No. 3093 चन्द्रप्रज्ञप्तिबालावबोधः। Substance, country-made paper, 14 × 6 inches. Folia, 159. Lines, 20 on a page. Extent, 9,708 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Mágadhí.

Chandra-prajnapti-bálábodha. A gloss on the *Chandra-prajnapti-sútra*. By Malaya Giri. No. 2649, Vol. VIII, p. 113).

Beginning. श्रीश्रीवीतरागाय नमः।

तिहां अविघ्न पणइ। इष्टप्रसिद्धनइ अर्थइ धरिनइं विषइं। इष्टदेवप्रतइं स्तवनाकइ छइ। इहां स्तवना दोय प्रकारनी एकतो गुणनी स्तवनारूप। बीजी वाञ्छितना नमस्कारूप ते करेंते कहइ छइ॥ इत्यादि।

End. उत्थानउ० उच्छाहक० कर्मव० बलवीर्य्यतिणे करीधा० धारिवो एतलइं गुणकरीसहित तेह नें थिं। निश्चइ ज्ञानदेवोणं नहीमं अवनीतने देवउ॥

Colophon. इति श्रीमलयगिरिविरचितचन्द्रप्रज्ञप्तिबालावोधः समाप्तः।

विषयः। चन्द्रप्रज्ञप्त्यभिधानजैनज्योतिःशास्त्रस्य व्याख्यानम्।

No. 3094. दशावचूर्णी । Substance, country-made paper, 16 × 6 inches. Folia, 44. Lines, 14 on a page. Extent, 2,358 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, old. Prose. Incorrect. Sanskrit and Mágadhí.

Daśávachurṇí. An epitome of the contents of the Daśáśruta-skandha Sútra. Anonymous.

Beginning ॐ नमः सर्व्वज्ञाय । नमो अरिहंताणं । नमो सिद्धाणं । आयरियाणं । नमो उवज्झायाणं । नमो लोत्तसव्वसाहूणं । सुदं मे आउसं तेणं भगवया । संबंधो जा मोहणि—ट्ठाणे वट्टदि । इत्यादि ।

End. एवं विधा तस्स भासइ भवति । तमुक्कायत्ता इति जात्यन्धो भवति । + + + + + जावणया विजावकरणणयो सव्वेसिं पिणयाणं गाथा ॥

Colophon. इति दशावचूर्णी समाप्ता ।

विषयः । संक्षेपेण दशाश्रुतस्कन्धसूत्रस्य तात्पर्य्यकथनम् ।

No 3095. अग्निहोत्रमन्त्रार्थचन्द्रिका । Substance, country-made paper, 14 × 4½ inches. Folia, 9. Lines, 8 on a page. Extent, 196 ślokasa. Character, Nágara. Date, ? Place of deposit, A'jimganj, Rámachandra Paṇḍit. Appearance, old. Prose. Correct.

Agnihotra-mantrártha-chandriká. A gloss on the mantras used in the performance of the Agnihotra rite according to the School of A'śvaláyana. By Vaidyanátha Bhaṭṭa Páyaguṇḍa.

Beginning. आश्वलायनमित्याग्निहोत्रहोमस्थितान् मनून् ।
कलये वैद्यनाथोऽहं वासुदेवप्रतुष्टये ॥

कृतनित्यक्रियो यष्टा प्राणानायम्य नित्याग्निहोत्रेऽध्वर्य्युवरणं कृत्वा तमाह । उद्धराहव-नीयमिति । ततोऽध्वर्य्युर्विहाराद्बहिराचान्तस्तीर्थेन प्रविश्य गार्हपत्यं प्रज्वाल्य वैश्यकुलादानीतं सार्व्ववर्णिकस्य धनिकस्य गृहाद्वा सदा धार्य्यमाणं वा सदा होमार्थं मथितं वेत्येवंप्रकारेण निष्पन्नं तं दक्षिणाग्निं प्रणीय गार्हपत्यात् ज्वलन्तं तं पात्रान्तरे पृथक् कुर्य्यात्——इत्यादि ।

End. हे यज्ञ ते तव यन्न्यूनमज्ञानात् प्रमादाद्वा कृतं यच्च ते तवातिरिक्तं कृतं तत्सर्व्वं त्वदुप समीपे एव समर्पयामि तस्मै तुभ्यं नमस्य करोमि ॥

Colophon. इति पायगुण्डोपाख्यश्रीवैद्यनाथभट्टविरचिताग्निहोममन्त्रार्थचन्द्रिका समाप्ता ॥

विषयः । आश्वलायनशाखीयाग्निहोममन्त्राणां व्याख्यानम् ।

No. 3096. लघुन्यासः। Substance, country-made paper, 13 × 5½ inches. Folia, 262. Lines, 12 on a page. Extent, 12,136 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur; another copy, Government of India. Appearance, fresh. Prose. Generally correct. Sanskrit.

Laghu-nyása. A concise gloss on Hemachandra's Svopajnas'abdánus'ásana grammar. Anonymous.

Beginning. प्रणम्य केवलालोकावलोकितजगत्त्रयं।
जिनेशं श्रीसिद्धहेमचन्द्रशब्दानुशासने॥
शब्दविद्याविदां वन्द्योदयचन्द्रोपदेशतः।
न्यासतः कतिचिद्दुर्गपदव्याख्याभिधीयते॥

इह निस्तुषशेमुषीमुन्मेषनिर्म्मितानेकविद्वज्जनमनश्चमत्कारकारिशास्त्रनिकरविस्मापितविशदप्रज्ञर्द्धि + + + कानेकसूरिः निष्प्रतिमप्रतिभासम्भारापहस्तित(?)त्रिदशसूरिः, श्रीकुमारपालक्ष्मापालप्रतिबोधविधाननिखिलक्षोणीमण्डलाभयदानप्रभृतिसंख्यातिक्रान्तप्रभावनानिर्म्माणस्मृतिगोचर — — — — — — सुगृहीतनामधेयः श्रीहेमचन्द्रसूरिर्निविड़जड़िमग्रस्तं समस्तमपि विश्वमवलोक्य — — — — — — — शब्दानुशासनं कर्त्तुकामः प्रथमं मङ्गलार्थमभिधेयादिप्रतिपादनार्थं स्वेष्टदेवतानमस्कारमाह प्रणम्येति। ननु प्रयोगोऽयं भावे कर्म्मणि वा उच्यते। भाव एव। तर्हि कथं परमात्मानमिति कर्म्म उच्यते। इत्यादि।

End. कृतपूर्व्वीत्यत्र सर्व्वशब्दस्य कृतशब्देन कृतशब्दस्य कटशब्देन सम्बन्धो न चर्म्मपूर्व्वशब्दाभ्यामिति किं हि वचनान्न भवतीति समकत्वात्। नञ् इत्यनेनासमर्थोऽपि वाङ्लकाद्भवतीत्यर्थः॥

Colophon. इत्याचार्य्यश्रीहेमचन्द्रविरचितसिद्धहेमचन्द्राभिधानस्वोपज्ञशब्दानुशासनवृत्तौ लघुन्यासे सप्तमाध्यायस्य चतुर्थः पादः। सप्तमाध्यायः समाप्तः।

विषयः। हेमचन्द्रकृतस्वोपज्ञशब्दानुशासननामकव्याकरणस्य व्याख्यानम्।

No. 3097. जातिविवेकः। Substance, country-made paper, 14 × 4½ inches. Folia, 12. Lines, 7 on a page. Extent, 191 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Rámachandra Paṇḍit. Appearance, fresh. Prose and verse. Incorrect.

Játiviveka. A dissertation on caste. By Vis'vanátha.

नारद उवाच ।

Beginning. भगवन् सर्व्वधर्म्मज्ञ गौरी——मनोहर ।
एकं त्वां परिपृच्छामि सन्देहं मनसि स्थितं ॥
युगत्रयगता धर्म्मा विज्ञाता कृपया तव ।
वर्णाश्रमास्त्वया प्रोक्तास्तेषां धर्म्माश्च सर्व्वशः ॥
चातुर्व्वर्ण्यं चरेद्भैक्ष्यमित्याह भगवान् हरिः ।
कैवर्त्तककुले जातो वाल्मीकिर्ब्राह्मणोऽभवत् ॥
राधया पोषितः कर्णः सर्व्वक्षत्रियसम्मतः ॥
दासीजठरसम्भूतो विदुरो विप्रसम्मतः । इत्यादि ।

End. तेभ्यो द्रव्यं समादाय वह्नियज्ञादिकं द्विजः ।
कुर्व्वन् दोषं नवाप्नोति फलं तेषाञ्च विन्दति ॥ इति ।
श्रीविश्वनाथकविना कविनायकेन
नानानिबन्धचयमीक्ष्य (?) विनिर्म्मितेयं ।
सम्यक् हिताय भुवि जातिविवेक एष
विद्वांस एव हृदयेषु विचारयन्तु ॥

Colophon. इति जातिविवेकः परिपूर्णः ॥

विषयः । वाल्मीक्यादीनां कैवर्त्तादिजातित्वकथनपूर्व्वकं सौराष्ट्रमागधनार्म्मदमालव-सारस्वतकान्यकुब्जादीनां शौचाचारकथनमुखेन ब्राह्मणानां प्रभेदनिरूपणम् ।

No. 3098. साधुविधिप्रकाशः । Substance, country-made paper, 12 × 5 inches. Folia, 21. Lines, 13 on a page. Extent, 640 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect. Sanskrit and Mágadhí.

Sádhu-vidhi-prakáśa ALIAS **S'rívidhi.** Duties of devout Jains. By Kshamákalyána.

Beginning. प्रणम्य तीर्थंशगणेशमुख्यान्
निरीक्ष्य सम्यग्विधिशास्त्रवृन्दं ।
श्रुत्वा + किञ्चित् स्वपरोपकृत्यै
वितन्यते साधुविधिप्रकाशः ॥

तत्र किल साधुविधीनां बहुत्वेऽपि इह तु विधिप्रपासामाचारीगतकाञ्चनसारेण लेशतः

सुविहितसाधुसमाचरणीयाहोरात्रकृत्यानि लिख्यन्ते। निशायाश्चरमप्रहरे निद्रां परित्यज्य सप्ताष्टवारान् परमेष्ठिमन्त्रं भणित्वा चतुर्विंशतिजिनादिनामानि स्मृत्वा आवश्यिकास्थण्डिलदेशे गत्वा काश्रिकां कृत्वा व्युत्सृज्य इत्यादि।

End. विधिप्राय इह प्रोक्तः प्राच्यग्रन्थानुसारतः।
दृष्ट्वा श्रुत्वा + + + धुनिकैः क्रियमाणकं॥

संवत्सिद्धिगुणाष्टचन्द्र (१८३८) विमिते श्रीजेसलाद्रौ पुरे पूज्यश्रीजिनचन्द्रसूरिगणभृद्विन्दैर्गतो वाचकाः श्रीमन्तोऽमृतधर्मनामगणयस्तच्छिष्यलेशः क्षमाकल्याणः कृतवान् मुदे सुमनसां सम्यग्विधेः सङ्ग्रहं।

सञ्जातोऽयं सम्यक्प्रेरणया चापि चारुसाहाय्यात्।
लावण्यकमलवाचकवाचं मम सिद्धिरङ्गप्रभृतीनां।

Colophon. इति श्रीविधिप्रकाशः सम्पूर्णः॥

विषयः। जैनसाधूनां दैनिककृत्यविधाननिरूपणं। तत्र शय्याया उत्थानविधिकथनं। प्रतिक्रमणविधिकथनं। शिष्यस्य गुरूपसत्तिविधिकथनं। तत्र प्राभातिकप्रतिक्रमणादिकालविवेचनं। शिष्याणां मृदुमन्दस्वरेण पञ्चनमस्कारपाठविधिकथनं। शक्रस्तवादिपाठकाले मुखवस्त्रिकाधारणविधिकथनं। अथ चारित्रदर्शनज्ञानशुद्धिनिमित्तं एकचतुर्विंशतिस्तवादिचिन्तनादिरूपकायोत्सर्गविधिकथनं। वन्दनधारणविधिकथनं। अथ आर्त्तरौद्रादिध्यानविधिकथनं। जिनविम्बवन्दनविधिकथनं। श्रुतस्तव-सिद्धस्तवादिपाठविधिकथनं। प्रसङ्गात् रात्रिप्रतिक्रमणविधिकथनं। अथ प्रतिलेखनाविधिकथनं। अथ पादोनप्रहरदिवसापगमे दृष्टिप्रतिलेखनादिविधिकथनं। अथ भोजनकाले तत्कृत्यविधिकथनं। भिक्षाविधिकथनं। अथ प्रत्याख्यानपारणाविधिकथनं। अथ अष्टमीचतुर्दश्याद्युपवासदिने कृत्यविशेषनिरूपणं। अथ पश्चिमप्रहरकृत्यविधिनिरूपणं। अथ चतुर्विंशतिस्थण्डिलस्थापनाविधिकथनं। अथ अतीचारशोधनादिविधिकथनं। अथ शयनविधिकथनं। अथ षान्मासिकादितपश्चिन्तनविधिकथनं। प्रमार्ज्जनाविधिकथनं। प्रबोधकालविधिकथनञ्च।

No. 3099. शास्त्रसिद्धान्तसङ्ग्रहसारः। Substance, country-made paper, 16 × 4 inches. Folia, 38. Lines, 9 on a page. Extent, 1,154 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Paṇḍit S'yámalála Duve. Appearance, fresh. Prose and verse. Correct.

S'ástra-siddhánta-saṅgrahasára. A philosophical dissertation on the Vedánta doctrine. By S'ivenaka. (Cf. No. 60, I p. 35; No. 1496, IV, p. 91; No. 1573, IV, p. 147; No. 1597, IV, p. 16, 5; No. V, 1835, p. 145.

Beginning. दुःखिनो यं समाश्रित्य सुखमीयुः सुदुर्लभं।
विभीषणाद्यो रामं तं वन्दे सद्गुरुं पुनः॥

अथ शास्त्रसिद्धान्तलेशसङ्ग्रहनिबन्धस्थमतानां सुखं स्वबोधाय तत्पाठः कायर्थांश्च सङ्गृह्यते (?) मया। यया यया भवेत् पुंसां व्युत्पत्तिः प्रत्यगात्मनि। सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता। अकल्पितवस्तुप्रतिपत्त्युपायतया कल्प्यमानेषु पदार्थेषु विरोधः—इत्यादि।

End. श्रीरामं मनसा ध्यात्वा श्रीगुरुं संप्रणम्य च।
पाठं सिद्धान्तलेशस्य समग्र+च्छिवेनकः॥
समाधिगणनायाश्च यन्मया साहसं कृतं।
क्षन्तव्यं तद्बुधैः सर्व्वैः क्षमाशीला हि ते यतः॥
तत् संख्यानं स्वबोधार्थं रामतुष्ट्यर्थमेव च।
जानन्ति हि स्वतस्तज्ज्ञा न तदर्तं मया कृतं॥
यदि ते बालबोधार्थं पश्येयुः सङ्ग्रहं त्विमं।
तदा तैरपि शोध्योऽयं नोपेक्ष्यो ह्युपकारिभिः॥

Colophon. इति श्रीशास्त्रसिद्धान्तलेशसारे फलाभिधश्चतुर्थः परिच्छेदः। समाप्तश्चायं ग्रन्थः।

विषयः। विधिस्वरूपादिविवेचनं। तत्र नियमपरिसंख्यादिभेदनिरूपणञ्च। कारणत्वस्वरूपकीर्त्तनमुखेन ब्रह्मणो जगज्जन्मस्थितिलयकारणत्वकथनं। विवर्त्तवादपरिणामवादयोस्तारतम्यकथनं। अथ जीवेश्वरयोः स्वरूपनिरूपणं। जीवैकत्वनानात्ववादकथनं। मायाविद्ययोः स्वरूपादिकथनं। उपादानत्वस्वरूपनिरूपणं। कर्त्तृत्वस्वरूपनिरूपणं। ईश्वरसर्व्वज्ञत्ववादनिरूपणं। जीवस्य सर्व्वज्ञत्वाभाववादनिरूपणं। सम्बन्धवादकथनं। अभिव्यक्तिवादकथनं। आवरणाभिभववादकथनं। अज्ञानानादित्ववादकथनं। परोक्षज्ञानस्य अज्ञाननिवर्त्तकत्वानिवर्त्तकत्ववादकथनं। साक्षिस्वरूपनिर्णयवादकथनं। अविद्यादीनामावृतानावृतसाक्षिचैतन्यप्रकाश्यत्वनिरूपणं। अहङ्कारादिस्मृतिसिद्ध्यर्थं संस्काराधानकथनं। अध्यासकारणनिरूपणं। अपरोक्षानुभूत्यर्थं वृत्तिनिर्गमवादकथनं अद्वितीये ब्रह्मणि वेदान्तानां समन्वयकथनं। श्रुतिप्रत्यक्षयोः प्राबल्यदौर्बल्यवादकथनं। तयोरुपजीव्योपजीवकभावविरोधपरिहारवादकथनं। प्रतिबिम्बसत्यत्वमिथ्यात्ववादकथनं। स्वप्नाधिष्ठानवादकथनं। सृष्टिकल्पकवादकथनं। मिथ्याभूतस्यापि व्यवहारिकसत्यार्थक्रियाकारित्ववादकथनं। औपाधिकजीवभेदेन सुखदुःखासाङ्कर्य्यव्यवस्थावादकथनं। उपाधिस्वरूपवादकथनं। जीवादिवास्तवभेदनिरासवादकथनं। विद्ययैव ब्रह्मप्राप्तिरितिकथनं। कर्म्मोपयोगवादकथनं। विद्यार्थकर्म्माधिकारवादकथनं। सन्न्यासस्य विद्योपयोगवादकथनं। श्रवणाधिकारवादकथनं। ज्ञानकरणवादकथनं। ज्ञानार्थयोरपरोक्ष-

त्वंवादकथनं। अज्ञाननिवर्त्तकवादकथनं। अज्ञाननिवृत्तिवादकथनं। अविद्यालेशवादकथनं। अविद्यानिवृत्तिस्वरूपवादकथनं। मुख्यामुख्यपुरुषार्थवादकथनं। अनवच्छिन्नानन्दप्राप्तिवादकथनं। मुक्तस्य ब्रह्मभावापत्तिवादकथनञ्च।

No. 3100. शब्दार्थवृत्तिः। Substance, country-made paper, 13 × 6 inches. Folia, 54. Lines, 14 on a page. Extent, 3,090 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Incorrect. Sanskrit.

S'abdártha-vṛitti. A commentary on the Das'avaikálika-sútra. By Samayasundara Upádhyáya.

Beginning. स्तम्भनाधीशमानम्य गणिः समयसुन्दरः।
दशवैकालिके सूत्रे शब्दार्थं लिखति स्फुटं॥

धर्म्मो मङ्गलमित्यादिव्याख्या। धर्म्मो दुर्गतिप्रपत + + धारणालक्षणः। उत्कृष्टं प्रधानं मङ्गलं वर्त्तते। को धर्म्म इत्याह अहिंसा। अहिंसा न हिंसा। जीवदयाप्राणातिपातविरतिरित्यर्थः। इत्यादि।

End. इति चूलिकाद्वयं व्याख्यातं। अथ प्रशस्तिमाह।
हरिभद्रकृता टीका वर्त्तते विषमा परं।
मया तु शीघ्रबोधाय शिष्यार्थं सुगमा कृता॥
चान्द्रकुले श्रीखरतरगच्छे श्रीजिनचन्द्रसूरिनामानः।
जाता युगप्रधानास्तच्छिष्यः सकलचन्द्रगणिः॥
तच्छिष्यसमयसुन्दरगणिना चक्रे+स्तम्भतीर्थपुरे।
दशवैकालिकटीका शशिनिधिशृङ्गारमितवर्षे॥
— — — — — — — —।
शब्दार्थवृत्तिटीकायाः श्लोकमानमिदं स्मृतं।
सहस्रत्रयमय्येव पुनः सार्द्धचतुःशती॥

Colophon. इति श्रीदशवैकालिकशब्दार्थवृत्तिः समयसुन्दरोपाध्यायकृता समाप्ता॥

विषयः। दशवैकालिकाभिधानजैनसूत्रस्य व्याख्यानम्।

No. 3101. सुधा । Substance, country-made paper, 13 × 3½ inches. Folia, 205. Lines, 7—8 on a page. Extent, 3,203 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Incorrect.

Sudhá. A commentary on Jayadeva's Chandráloka—a treatise on rhetoric. By Vis'ves'vara *alias* Gágá Bhaṭṭa, son of Dinakara Bhaṭṭa.

Beginning. प्रणम्य परमात्मानं सच्चिदानन्दविग्रहम्।

चन्द्रालोकसुधां रम्यां गागाभट्टस्तनोत्ययं ॥

श्रीरिति भवतीति सर्व्वत्राध्याहारः। उपदेशकौशलरूपमस्तुतं। यत्रास्तृतपदेन प्रभु-सम्मितसुहृत्सम्मितकान्तासम्मितोपदेशत्रैविध्येऽपि उपदेशद्वयस्य शब्दार्थप्रधानतया।

End. जयन्तीति जयदेवस्यैव पीयूषवर्ष इति नामान्तरं। महादेव इति पूर्व्व-वत्। स्तुवन्त्वन्ये ग्रन्थं कथमपि च निन्दन्त्वपि परे महाराजस्तुष्ये++मपि तुष्येदपि परं + + + + + विघटनसमर्थेन बहुना श्रमेणायं तुष्येदथ जनकजापरिदृढः॥

Colophon. इति मीमांसकदिनकरभट्टसूनुविश्वेश्वरापरनामकगागाभट्टकृता सुधाख्या चन्द्रालोकटीका समाप्ता।

विषयः। पीयूषवर्षापराभिधानजयदेवमिश्रकृतचन्द्रालोकनामकालङ्कारसन्दर्भस्य व्या-ख्यानम्।

No. 3102. काव्यालङ्कारटिप्पनी। Substance, country-made paper, 12 × 4 inches. Folia, 85. Lines, 10 on a page. Extent, 1,580 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Paṇdit S'yámalála Duve. Appearance, fresh. Prose. Incorrect.

Kávyálaṅkára-ṭippaní. A gloss on Rudraṭa's *Kávyálaṅkára*—a treatise on rhetoric. By Namisádhu.

Beginning. निःशेषाऽपि त्रिलोकी विनयपरतया सन्नमन्ती पुरस्ताद्-
यस्याङ्घ्रिद्वन्द्वमत्ताङ्गुलिविमलनखादर्शसंक्रान्तदेहा।
निर्भीतिस्थानलीना भयदभवमहारातिभीत्येव भाति
श्रीमान् नाभेयदेवः स भवतु भवतां शर्म्मणे कर्म्ममुक्तः॥
पूर्व्वमहामतिविरचितवृत्त्यनुसारेण किमपि रचयामि।
संक्षिप्ततरं रुद्रटकाव्यालङ्कारटिप्पनकम्॥

इह शास्त्रकारः शिष्टस्थितिपालनार्थमविघ्नेन शास्त्रसमाप्त्यर्थञ्च प्रथममेव तावद्गणनायकस्य स्तुतिमाह । इत्यादि ।

End. जयतीति । सुगमम् ।

एवं रुद्रटकाव्यालङ्कृतिटिप्पनकविवचनात् पुण्यम् ।

यद्वापि मया तस्मान्मनः परोपकृतिरतिभूयात् ॥

— — — — — — — —।

पञ्चविंशतिसंयुक्तैरेकादशसमाशतैः ।

विक्रमात् समतिक्रान्तैः प्राटषीदं समर्थितम्॥

Colophon. इति श्रीनमिसाधुविरचितायां काव्यालङ्कारटिप्पन्यां षोड़शोऽध्यायः॥ समाप्तोऽयं ग्रन्थः ।

विषयः । रुद्रटकृतकाव्यालङ्कारनामकालङ्कारसन्दर्भस्य व्याख्यानम् ।

No. 3103. न्यासतिलकव्याख्या । Substance, country-made paper, 12 × 4 inches. Folia, 8. Lines, 6 on a page. Extent, 104 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, S'yámalála Duve. Appearance, fresh. Verse. Correct.

Nyása-tilaka-vyákhyá. A commentary on a hymn in praise of Rañgeśvara a form of Vishṇu. The object of the hymn is to develope the course of self-examination. Anonymous.

Beginning. श्रीमते रामानुजाय नमः ।

गुरुभ्यस्तद्गुरुभ्यश्च नमो वाकमधीमहे ।

वृणीमहे च तत्राद्यौ दम्पती जगतां पती ॥

प्रायः प्रपदने पुंसां पौनःपुन्यं निवारयन् ।

हस्तः श्रीरङ्गभर्त्तुर्मामव्यादभयमुद्रितः ॥

अनादेर्निःसीम्नो दुरितजलधेर्यन्निरुपमं

विदुः प्रायश्चित्तं + + + धुरीणाशयविदः ।

तदारम्भे तस्य गिरमवदधानेन मनसा

प्रपद्ये तामेकां श्रियमखिलनाथस्य महिषीम्॥ इत्यादि ।

End. वेदान्ताचार्य्यसन्दर्भव्याख्याने कृतसाहसम् ।

क्षमध्वं मां क्षमासारा विदुषामपि दुष्करे ॥

+ + + श्रीनिवासेन कौशिकान्वयशोभिना।
कृतेयं न्यासतिलकव्याख्या ग्राह्या विचक्षणैः॥

Colophon. इति श्रीन्यासतिलकव्याख्या सम्पूर्णा।

विषयः। स्तोत्रव्याजेन रङ्गेश्वरे भगवति आत्मन्यासविधिकथनम्।

No. 3104. रहस्यत्रयसारः। Substance, country-made paper, 12 × 4 inches. Folia, 9. Lines, 10 on a page. Extent, 174 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, S'yámalála Duve. Appearance, fresh. Verse. Correct.

Rahasyatraya-sára. An exposition of the three objects of life, *viz.*, desire for wealth, prosperity and emancipation. By Veñkaṭanátha Vedántáchárya.

Beginning. श्रीमद्वेङ्कटनाथार्य्यकवितार्किककेशरी।
वेदान्ताचार्य्यवर्य्यो मे सन्निधत्तां सदा हृदि॥
प्रपदनमये विद्याभेदे प्रतिष्ठितचेतसः
प्रतिपदमिह प्रज्ञा + + + + राधनाः।
शठरिपुशुकव्यासप्राचेतसादिनिबन्धन-
श्रमपरिणतशुद्धाशु + + + + टीकाः॥ इत्यादि।

End. रहस्यत्रयसारोऽयं वेङ्कटेशविपश्चिता।
शरण्य + म्यतिविदां + + + समरट्यताम्॥

Colophon. इति श्रीकवितार्किकसिंहस्य सर्व्वतन्त्रस्वतन्त्रस्य श्रीमद्वेङ्कटनाथस्य वेदान्ताचार्य्यस्य कृतिषु श्रीरहस्यत्रयसारः समाप्तः॥

विषयः। प्रपदनमुमुक्षुत्वादिनिरूपणम्।

No. 3105. श्रावकविधिप्रकाशः। Substance, country-made paper, 12 × 5 inches. Folia, 19. Lines, 12 on a page. Extent, 472 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect. Old Hindi.

S'rávaka-vidhi-prakáśa. A summary of the duties appropriate for Jain householders. By Kshamákalyána.

Beginning. प्रणम्य श्रीजिनाधीशं सद्गुरुञ्च प्रमोदतः ।
आद्याहोरात्रकृत्यानि लिख्यन्ते लोकभाषया ॥

तिहां प्रथमप्रभातसामयिकविधि लिखीयैछै। श्रावकके घड़ीपाछलीराते पोसहशालायै अथ वा गुरुसमीपें अथ वा गृहनें एकदेशें आवी प्रथमदिवस संध्यायें ———इत्यादि ।

End. मनमें धारीकाउ ममापारै । इति कृत्मासी तपचिं तनविधिः ।
श्रीजिनचन्द्रसूरिं दनिउ राजतगच्छराजने ।
वाचक अमृतधर्म्मगणिसीमचमाकल्यान ॥
सय अठारह+तौ मम+जेसलमेरसुखान ।
श्रावकविधिसंग्रहकीयौ मूलग्रन्थ अनुमान ॥
कमलादिमसुन्दर सुमनकोधमहाय प्रधान ।
जो+निहोय अशुद्ध इह सो सोधियो सुजान ॥

Colophon. इति श्रावकविधिप्रकाशः परिपूर्णः ।

विषयः। जैनगृहस्थानां दैनिककृत्यविधिनिरूपणं । तत्र प्रातःकृत्यनिरूपणं । प्रतिक्रमणादिकालनिरूपणं । सामयिकपारणादिविधिकथनं । सन्ध्यासामयिकविधिकथनं । देवताप्रतिक्रमणादिविधिकथनं। चारित्रदर्शन-ज्ञानशुद्धिविधिकथनं। चैत्यवन्दनविधिकथनं । आहारसंवरणनिमित्तादिकथनं। अष्टप्रहरोपवासग्रहणपारणयोर्विधिकथनं। सामायिकसव्वेविधिकथनं । प्रतिलेहनविधिकथनं । रात्रिसम्बन्धीयचतुःप्रहरोपासनाविधिकथनं । पाक्षिकादिप्रतिक्रमणविधिकथनं । अथ षाण्मासिकतपोविधिकथनं ।

No. 3106. सिद्धान्तरत्नावली । Substance, country-made paper, 13 × 5 inches. Folia, 98. Lines, 17 on a page. Extent, 6,111 ślokas. Character, Nágara. Date, ? Place of deposit. A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, decayed. Prose. Generally correct.

Siddhánta-ratnávalí. A commentary on the Sanskrit grammar entitled *Sárasvata-prakriyá*. By Mádhava Bhaṭṭa. (Cf. No. 2543, VII, p. 294).

Beginning. श्रीमद्विष्णुपदाब्जमङ्गलिदलं सज्ज्ञानकिञ्जल्किकं
पीयूषोन्म + + मृद्यदसमा + + जितं स्तोयतं ।
योगीशामरकिङ्करालिनिकरैः पेपीय्यमानं मुदा
ज्ञानानन्दभरप्रदायि नितरां सच्चिन्तये संविदे ॥

वागीश + + + तमोऽपि यस्याः कृपाकटाक्षे चणतः प्रयाति ।
सा मे मतिं स्फारयतादवश्यं वागदेवता + + + + + ॥
— — — — — — — — —।

तत्र सारस्वतीं प्रक्रियामृजु चिकीर्षुः श्रीमदनुभूतिस्वरूपाचार्य्यस्तदविघ्नसमाप्तिप्रचयम- + + + + नार्थमिष्टदेवतापरमात्मप्रणतिलक्षणमङ्गलमाचरन् विषयप्रयोजनसम्बन्धाधिकारिणोऽपि सूचयन् प्रतिजानीते प्रणम्येत्यादिना श्लोकेन । अस्यायमर्थः । अहं प्रक्रियन्ते व्युत्पाद्यन्ते शब्दा अनयेति प्रक्रिया——इत्यादि ।

End. आदिनान्यस्याप्येवं जातीयकस्य विद्वद्भिर्विचारा ज्ञेया इति । इति कृत्यप्रक्रिया समाप्ता ।

Colophon. इति भट्टमाधवविरचितायां सिद्धान्तरत्नावल्यां सारस्वतटीकायां कृत्यप्रकरणं सम्पूर्णं । सम्पूर्णोऽयं ग्रन्थः ॥

विषयः । अनुभूतिस्वरूपाचार्य्यकृतसारस्वतप्रक्रियाभिधानव्याकरणस्य व्याख्यानम् ।

No. 3107. वसुपालतेजःपालप्रबन्धः । Substance, country-made paper, 14 × 4½ inches. Folia, 30. Lines, 9 on a page. Extent, 913 ślokas. Character, Nágara. Date, ? Place of deposit. A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose and verse. Incorrect. Sanskrit.

Vasupála-Tejapála-prabandha. Anecdotes of Vasupála and Tejapála, Jain householders, in illustration of Jain doctrines and duties. Anonymous.

Beginning. श्रीवस्तुपालतेजःपालौ मन्त्रीश्वरावुभौ + + ।
यौ भ्रातरौ प्रसिद्धौ कीर्त्तनसंख्यां तयोर्ब्रूमः ॥

पूर्व्वं धरित्रीमण्डनायां मण्डलीनगर्य्यां श्रीवस्तुपालतेजःपालयोराद्याः वसन्ति स्म । अन्यदा श्रीमत्पत्तनवास्तव्यप्राग्वाटान्वयठक्कुरश्रीचण्डपालात्मजठक्कुरश्रीचण्डप्रसादाङ्गजमन्त्रिश्रीसोमकुलावतंसठक्कुरश्रीआसराजनन्दनौ कुमारदेवीकुक्षिसरोवरराजहंसौ श्रीवस्तुपालतेजःपालौ श्रीशत्रुञ्जयगिरनारादितीर्थयात्रायै प्रस्थितौ । इत्यादि ।

End. त्रिषष्टिवारान् समरे जयश्रीर्गृहीता । अष्टादशवर्षाणि तयोः सर्व्वमुद्राव्यापृतिः । तदनु श्रीवीसलदेवसेवा ॥

Colophon. इति श्रीवस्तुपालतेजःपालकथा समाप्ता ॥

विषयः । वस्तुपालतेजःपालयोश्चरित्रकीर्त्तनव्याजेन जैनधर्ममाहात्म्यादिकथनं ।

No. 3108. कौतुकचिन्तामणिः। Substance, country-made paper, 12 × 6 inches. Folia, 74. Lines, 11 on a page. Extent, 1,656 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse and prose.

Kautuka-chintámaṇi. Magic, sorcery, and entertaining or startling experiments. By Maharájá Pratáparudra Deva.

Beginning. व्यामोहप्रथमौषधं मुनिमनोमुक्तिप्रहृत्तौषधं
दैत्योच्छित्तिकरौषधं त्रिभुवने सञ्जीवनैकौषधं।
भक्तार्त्तिप्रशमौषधं भवभयप्रध्वंसनैकौषधं
श्रेयःप्राप्तिकरौषधं पिव मनः श्रीकृष्णदिव्यौषधं॥

पूर्व्वं तावन्नीतिचिकित्सासम्पादितद्विविधराजस्थैर्य्यभृतां राज्ञां व्यसनानि निरस्य कौतुकावलोकनेनैव कालयापनं कर्त्तव्यमिति + + + + + + प्राप्तावसराणि कौतुकानि संक्षेपतो निरूप्यन्ते।

End. चारुचक्षुचिरारेचिचक्षुचारुरुचारुचः।
चचार रुचिराचारचारैराचारचञ्चुरः॥

Colophon. इति श्रीमहाराजाधिराजप्रतापरुद्रदेवकृतकौतुकचिन्तामणौ तृतीया दीप्तिः। कल्याणमस्तु।

विषयः। तत्रादौ आत्मशरीररक्षाविधिकथनं। अन्येषां दृष्टिबन्धविधिकथनं। सङ्ग्रामे जयविधिकथनं। खड्गस्तम्भनविधिकथनं। अग्निस्तम्भनविधिकथनं। अन्नपाकस्तम्भनविधिकथनं। गृहदाहस्तम्भनादिविधिकथनं। तण्डुलविषादिद्रव्यस्तम्भनविधिकथनं। जलस्तम्भनादिविधिकथनं। वर्य्यावीर्य्यादिस्तम्भनविधिकथनं। अथ वशीकरणविधिकथनं। तत्र राजवशीकरणविधिकथनं। स्त्रीवशीकरणविधिकथनं। पतिवशीकरणविधिकथनं। गजादिवशीकरणविधिकथनं। कामवृद्धिविधिकथनं। तत्र मदनेश्वररसविधिकथनं। मदनोदयरसकथनं। कामकलारसकथनं। रतिकामरसकथनं। मदनवर्द्धनरसकथनं। अनङ्गसुन्दरीवटिकाकथनं। कामनायकादिरसकथनञ्च। अथ नायिकादिभेदनिरूपणं। कामस्याननिरूपणं। विविधबन्धनिरूपणं। तत्र स्तम्भनद्रावणादिविधिकथनं। सङ्कोचनवर्द्धनादिविधिकथनं। अथ कृत्रिमवस्तुकरणविधिकथनं। मुक्ताकरणं। पद्मरागकरणं। इन्द्रनील-मरकत-प्रवाल-स्वर्णादिकरणविधिकथनं। कर्पूरकुङ्कुमादिसुगन्धिद्रव्यकरणविधिकथनं। निधिज्ञानोपायकथनं। निधिनिष्काशनविधिकथनं। वृक्षादीनां फलोद्यामविधिकथनं। पुष्पादिदोहदविधिकथनं। अथ पाषाणादिचर्व्वणविधिकथनं। रिक्तकुम्भे जलपानादिविधिकथनं। रक्तवर्णादिपुष्पाणां धावल्यादिकरणविधिकथनं। जले स्थितिविधिकथनं। यथेष्टभोजनादिविधिकनं। भोज्यद्रव्य-

कम्पादिजननविधिकथनं। शिरस्थग्निधारणादिविधिकथनं। कृत्रिमाग्निकरणविधिकथनं। भस्मीकरणादिविधिकथनं। जले चित्रकरणादिविधिकथनं। चौरपरिज्ञानविधिकथनं। सर्पोच्चाटनादिप्रयोगकथनं। मत्कुणमक्षिकाद्युच्चाटनविधिकथनं। मल्लराजादिदर्पहरणादिविधिकथनं। बुद्धिवर्द्धनादिचूर्णकथनं। सारस्वतामृतविधिकथनं। सङ्ग्रामे विजयोपायकथनादिकं। ग्रहणप्रदर्शनादिविधिकथनं। कपाटोद्घाटनविधिकथनं। बन्धनादिच्छेदनविधिकथनं। विविधरूपधारणविधिकथनं। विविधजीवोत्पादनविधिकथनं। कृत्रिमोल्कादर्शनादिविधिकथनं। पिशाचदर्शनादिविधिकथनं। केशरञ्जनादिविधिकथनं। लोमशातनादिविधिकथनं। कर्णादिवृद्धिकरणविधिकथनं। तनुदुर्गन्धादिहरणविधिकथनं। विषादिचिकित्साकथनं। गर्भपातनिवारणादिविधिकथनं। कूपादिखननविधिकथनं। शिलाभेदनादिविधिकथनं। चित्रकाव्यकथनञ्च।

No. 3109. व्याख्यालेशः। Substance, country-made paper, 14 × 6 inches. Folia, 26. Lines, 9 on a page. Extent, 590 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose. Generally correct. Sanskrit and Mágadhí.

Vyákhyáleśa. A gloss on the *Kalyánamandira*, a Jain hymn by Siddhasena A'chárya. Anonymous.

Beginning. श्रीमत्पार्श्वं जिनं नत्वा बालानां बोधहेतवे।
कल्याणमन्दिरस्तोत्रे व्याख्यालेशो विधीयते॥

तत्र प्रथमस्तोत्रस्य उत्पत्तिर्लिख्यते। तद्यथा। उज्जयिन्यां विक्रमपुरोधसः पुत्रो देवर्षिकाकुक्षिभूः मुकुन्द इति नाम वादार्थं भृगुकच्छपुरं प्रति प्रचलितः। तत्रान्तरा मार्गे वृद्धवादिगुरवो मिलिताः। तैः सह वादमकरोत्। तत्र गोपाः साक्षिकाः कृता संस्कृतमवदन्। गोपैरुक्तं न किञ्चिदिदम्। ततो गुरवोऽवदन् न विमारिय न विचोरियै परदारागमन न करियै — — — — — एवं महाप्रभावकैः श्रीसिद्धसेनाचार्य्यैः कृतमिदं श्रीकल्याणमन्दिरस्तोत्रं। तस्य व्याख्यालेशः प्रारभ्यते॥

End. शृण्वतां पठताञ्चेमां नृणां वाचयतामपि।
कल्याणं विपुलं भूयात् पार्श्वनाथप्रसादतः॥

Colophon. इति श्रीकल्याणमन्दिरस्तोत्रस्य टीका व्याख्यालेशः परिपूर्णः।

विषयः। कल्याणमन्दिराभिधानस्य जिनेन्द्रस्तोत्रस्य व्याख्यानम्।

No. 3110. उणादिवृत्तिः । Substance, country-made paper, 14 × 4½ inches. Folia, 24. Lines, 12 on a page. Extent, 1,116 ślokas. Character, Nágara. Date, ? Place of deposit, Ajimganj, Rámachandra Paṇḍit. Appearance, fresh. Verse. Generally correct.

Unádivṛitti. A commentary on the Unádisútra, a treatise on grammatical derivation, illustrated with a profusion of examples. By Ujjvaladatta.

Beginning. देवदेवं प्रणम्यादौ सर्व्वज्ञं पार्व्वतीपतिं ।
श्रीमदुज्ज्वलदत्तेन क्रियते वृत्तिरुत्तमा ॥
वृत्तिन्यासमनुन्यासं रचितं भागवृत्तिकां ।
भाष्यं धातुप्रदीपञ्च तट्टीकां वर्णदेशिनीं ॥
उपाध्यायस्य सर्व्वस्वं सुभूतिं सोमनन्दिनं ।
कलिङ्गदत्तचन्द्रादीन् समीक्ष्यैषा कृतिर्मम ॥
उणादिवृत्तयोऽनेका भूरिभिः सूरिभिः कृताः ।
तास्विदानीं विपर्य्यस्ताः सूत्रशब्दार्थधातवः ॥
ता एवाद्य समालोक्य ग्रन्थानन्यांश्च विस्तरान् ।
सर्व्वतः सारमाकृष्य मया वृत्तिर्विधीयते ॥
निरूप्य निश्चितं सत्यं सज्जनैश्च विचारितं ।
नमस्कुर्म्मः मना (?) युष्मान् दृष्टिमत्र करिष्यथ ॥
य इमां वृत्तिमालोक्य स्वपौरुषसमीहया ।
मत्सराच्छादनं कुर्य्यात् सुकृतं तस्य नश्यति ॥
प्रत्यायनाञ्च धातूनामागमादेशयोस्तथा ।
व्यक्तमेवानुबन्धानां पाठेनोदीरितं ततः ॥
प्रत्ययः । परश्च । आद्युदात्तश्च । अनुदात्तौ । इत्यादि ।

End. अया अग्निः स्वरादित्वादव्ययत्वमेव भाषायां । इति पञ्चमः पादः ॥

Colophon. इति श्रीमदुज्ज्वलदत्तविरचिता उणादिवृत्तिः समाप्ता ।

विषयः । उणादिसूत्राणां सोदाहरणं व्याख्यानम् ।

No. 3111. तर्कदीपिका । Substance, country-made paper, 13 × 4½ inches. Folia, 6. Lines, 11 on a page. Extent, 239 ślokas. Character, Nágara. Date, ? Place of deposit, Śántipur, Rámanáth Tarkkaratna. Appearance, fresh. Prose. Incorrect.

Tarkadípiká. A summary of the leading principles of logic. By Viśvanátha A'śrama, disciple of Mahádeva A'śrama. This is quite distinct from the work of this name noticed in Mr. Hall's Contributions, p. 69.

Beginning. यत्पादाम्बुजभृङ्गानि कलादिव सुरासुराः ।
वितर्कयन्ति सौन्दर्य्यं तं वन्दे गिरिजाप्रियं ॥

ननु किं तर्कलक्षणं । व्याप्यारोपे व्यापकारोप इति चेन्न, आत्माश्रयादावव्यापकत्वात् । यदि प्रमेयत्वं स्वस्मिन् वर्त्तेत तर्ह्यात्माश्रयः स्यात्——— इत्यादि ।

End. तर्करसोज्ज्वलवाक्यविहीनाः सन्ति नरा जड़बुद्धियुता ये ।
तन्मतिवाक्यसुकौशलसिद्धै तर्कनिरूपणमीरितमेतत् ॥

Colophon. इति श्रीमन्महादेवाश्रमशिष्येण योगिना विश्वनाथाश्रमेण रचिता तर्कदीपिका समाप्ता ।

विषयः । सप्रपञ्चतर्कलक्षणादिप्रपञ्चनम् ।

No. 3112. तार्किकरक्षाव्याख्यासारसङ्ग्रहः । Substance, country-made paper, 12 × 4 inches. Folia, 26. Lines, 20 on a page. Extent, 1,300 ślokas. Character, Nágara. Date, ? Place of deposit, Sántipur, Rámanátha Tarkaratna. Appearance, fresh. Prose. Incorrect.

Tárkika-rakshá-vyákhyá-sárasangraha. A gloss on Varadarája's *Tárkika-rakshá*, a treatise on the Púrṇaprajṇa doctrine. Anonymous.

Beginning. नमामि परमात्मानं स्वतः सर्व्वार्थदर्शिनं ।
विद्यानामादिवक्तारं निमित्तं जगतामपि ॥

प्रारिप्सितस्य ग्रन्थस्य प्रेक्षावदुपादित्साप्रयोजिकामभिमतफलसाधनतामभिध्याय श्रोतृबुद्धिमनुकूलयन् वर्त्तिष्यमानमेवाग्रे दर्शयति निःश्रेयसमिति ।

End. क्लं द्वितीयादिषु कचास्र सम्भवति । तदुत्तरकचोङ्काव्यमिति ॥

Colophon. इति वरदराजविरचिततार्किकरचाव्याख्यासारसङ्ग्रहे प्रथमः परिच्छेदः । शुभमस्तु ।

विषयः । वरदराजविरचिततार्किकरक्षायाः व्याख्यानम् ।

No. 3113. प्रौढ़बोधभूषणम् । Substance, country-made paper, 11 × 6 inches. Folia, 102. Lines, 12 on a page. Extent, 2,121 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Rámachandra Paṇḍit. Appearance, fresh. Verse, few. Prose. Generally correct.

S'ighrabodha-bhúshaṇa. On the philosophy of grammar and rhetoric. By S'ivaprasáda Upádhyáya. Cf. No. 2494, VII, p. 247.

Beginning. दुर्गमे शरणं नमामि नितरां दुर्गां जगद्दुर्गया
दुर्गायै + + रर्पयामि सततं सिद्धिप्रदायै द्रुतम् ।
दुर्गायाः परमः परः श्रवणगो नाभ्(?)श्रुतौ वा स्मृतौ
दुर्गायाश्चरणौ स्मरामि भवतां दुर्गा सुभक्तिर्म्मम ॥
त्यादिकृत्तद्धिता यत्र समासो वाक्ययोर्यतिः ।
तमुक्त इत्यहं वच्मि तत्रोक्तात् प्रथमा भवेत् ॥
अथ कर्त्तरीत्यादि । आत्मनेपदम् । इत्यादि ।

End. अथ ग्रामीणोक्तिलक्षणं ।
ग्रामीणास्ते प्रवीणा ये नीचवाचि सव + + ।
ग्रामीणोक्तिस्तदुक्तिः स्यात् सभामूढ़ा अनागराः ।

Colophon. इतः परं खण्डितत्वात् परिसमाप्तिवाक्यं नास्ति ।

विषयः । कर्त्तरि आत्मनेपदोदाहरणश्लोककथनं । एवं तत्र परस्मैपदोदाहरणश्लोककथनं । तत्र तदुभयपदप्रदर्शनञ्च । कर्मणि आत्मनेपदोदाहरणश्लोककथनं । एकस्मिन् श्लोके कर्त्तरि कर्म्मणि च प्रत्ययप्रदर्शनं । एवं कृत्प्रत्ययादिप्रदर्शनं । तथा तद्धितसमासादौ चेति विज्ञेयं । सहसाकंसार्द्धमाद्यव्ययोगोदाहरणश्लोककथनं । अथ कारकोदाहृतिश्लोककथनं । अथ वैषयिकोदाहृतिश्लोककथनं । अथ लिङ्गभेदोदाहृतिश्लोककथनं । संख्याभेदोदाहृतिश्लोककथनं । दशवल्लकारिकासतेन भ्वादिधातूनामुदाहरणकथनं । उपसर्गाणामुदाहरणकथनं । धातुभिर्योगे अर्थविशेषकथनञ्च । वर्णयोरभेदकथनं । शकारादिभेदनिरूपणं । अथच्छन्दोलक्षणादिकथनं । तत्र मात्राप्रस्तारादिकथनञ्च । प्रहेलिकादिकथनं । यमकादिकथनं । विविधचित्रकाव्यकथनं । वक्रोक्त्यादिकथनं । अर्थालङ्काराणां प्रत्येकं लक्षणकथनपूर्व्वकमुदाहरणकथनं । काव्यदोषनिरूपणं ।

No. 3114. रामाखेटकाव्यम् । Substance, country-made paper, 16 × 6 inches. Folia, 49. Lines, 13 on a page. Extent, 1,608 ślokas. Character, Nágara. Date, Sᴍ. 1865. Place of deposit, A'jimganj, Paṇḍit S'yámalála Duve. Appearance, fresh. Verse. Incorrect.

Rámákheṭa-kávya. An epic poem on the career of Ráma from the time of his marriage with Jánakí to the destruction of Rávaṇa. By Padmanátha Dvija.

Beginning. हेरम्बो विधुनोति विघ्ननिचयान् यद्दत्तया सत्तया
भास्वान् भासयते भवे प्रभुरभूदम्भोजभूर्भूतराट्।
भूतौघं प्रकृतिर्भिनत्ति तनुते वि+भावितं
स्वान्ते नौमि विवि + + न्त मतिभिः साकेतराकेश्वरं ॥
माणिक्यांशुविनिन्दैकनखराजीराजमानं सकृत्
योऽसौ संस्मरतां पदं शमयते तापत्रयं तत्क्षणात्।
सामन्तोडुगणानुरञ्जनकरं रेखाविशेषान्वितं
श्रीवत्साङ्कधरः स्मितामृतकरो वीरो जयत्यंशुमान्॥
श्रीरामं क्षणदाचरक्षयविधौ दक्षं सुदक्षं सतां
क्षोणीत्राणविचक्षणं क्षितिभुजामक्षौहिणीभिर्वृतं।
अत्यक्षं प्रतिपक्षकक्षदहनाक्षीणप्रतापानलं
देव+रवगम्यविक्षतमनातक्षो(?)ऽधिपोऽभूत् क्षणात् ॥ इत्यादि।

End. लक्ष्मीशानां गुरूणां चरणमानम्य गङ्गाधराणां
वेदान्तारण्यकण्ठी(?)रवदलितमहामोहदन्तावलानाम्।
श्रीरामाखेटकाव्यं शिवचरणसहायेन सन्दर्भितं
तत्प्रीत्यै स्यात् पाठकानामतिसरलतरं पद्मनाभद्विजेन ॥

Colophon. इति श्रीमदनारतब्रह्मानन्दाम्भोधिनिमग्नमानसमकलशास्त्रारण्यसन्देहध्वंसकवाग्गभस्तिश्रीमल्लक्ष्मीनाथाङ्घ्रिकमलसेवकेन सकलयोगिवर्गवर्य्यश्रीरामचन्द्रचकोरश्रीमद्गङ्गाधरवात्सल्यपात्रेण श्रीरामचन्द्रचरणसहायवता पद्मनाभद्विजेन विरचितं श्रीरामाखेटकाव्यं सम्पूर्णम्। संवत् १८६५।

विषयः। जानकीपरिणयादारभ्य रावणबधोत्तरं श्रीरामचरितवर्णनम्।

No. 3115. परिमलः। Substance, country-made paper, 12 × 4 inches. Folia, 35. Lines, 15 on page. Extent, 1,607 ślokas. Character, Nágara. Date, Sm. 1609. Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Prose. Correct.

Parimala. A commentary on Bhánu Miśra's *Rasamañjarí*, a treatise on Rhetoric. By S'eshachintámaṇi, son of S'esha-nṛisiñha.

Beginning. प्रेमार्द्रार्द्रनिरीक्षणादनुदिनं यच्चुम्बनालिङ्गनाद्
यो दन्तक्षतसीत्कृतान्नखपदोल्लेखादियोगाच्च यः।
लूनः कोऽपि परम्परागतसखीसम्भाषणाज्जायते

शृङ्गारः स विभूतये भवतु मे लक्ष्मीन्द्रसिंहाख्ययोः ॥
रदोद्भिन्नश्वीविनिर्य्यत्फणीन्द्र-
स्फुरद्दलकान्त्या मणिस्तम्भवद्या ।
पिदध्यां हि सस्मेरमालोकितो मां
कपोलौ विघर्षन् गणेशः पुनातु ॥
इन्द्रादिदेवपरिसेवितपादपद्मां
पद्मासनां विकचपद्मदलायताक्षीं ।
पद्मप्रभां विमलपद्मनिभाननां तां
वागीश्वरीमनुदिनं शरणं प्रपद्ये ॥
— — — — — — ।

इह खलु सकलकविकुलमुकुटमणिमरीचिमञ्जरीनीराजितचरणकमलो + + + श्रीभानु-करनामा कविः — — — — — — — — — — निष्प्रत्यूहपरि-समाप्तये च तन्निर्द्देशरूपं मङ्गलं शिष्यशिक्षार्थमुपनिबध्नाति । आत्मीयमिति । अत्रान्वयान्यथानु-पपत्त्या यद्दच्छाध्याहारेण योज्यं । इत्यादि ।

End. शेषावतंसश्रीशेषन्द्रसिंहतनयः सुधीः ।
यूनां मनोविनोदाय मञ्जरीव्याकृतिं व्यधात् ॥

Colophon. इति श्रीसकलपण्डितघटाग्रणीश्रीमच्छेषवेशालङ्कारभूतसकलविद्वज्जन-वृन्दचूड़ामणिमरीचिपिञ्जरितचरणयुगलकलिशेषावतारश्रीमच्छेषन्द्रसिंहतनयेन चौन्द्रसिंहच-रणोपासिना ब्रह्मपुरवासिना श्रीशेषचिन्तामणिना निर्म्मितो रसमञ्जर्य्याः परिमलः समाप्तः ॥ संवत् १९०८ ।

विषयः । भानुमिश्रविरचितरसमञ्जर्य्या व्याख्यानम् ।

No. 3116. जिनेन्द्रस्तवनम् । Substance, country-made paper, 12 × 6 inches. Folia, 2. Lines, 10 on a page. Extent, 40 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect. Sanskrit.

Jinendrastavana. A hymn in praise of Jina, in course of which the attributes of the saint are described and the merit of asceticism extolled. Anonymous.

Beginning. ओङ्कारस्फाररूपं परमपदगतं छिन्नमोहप्रमोहं
मायाहङ्कारमुक्तं त्रिगुणविरहितं त्यक्तनिःशेषसङ्गं ।

ध्यायन्ति ध्यानगम्यं यमिह हृदि पदे + + + योगिनाथा-
स्तं वन्दे देवदेवं निरुपमपरमज्ञानतेजःस्वरूपं ॥
न क्रोधो न भयं न मोहमहिमा नाहङ्कृतिर्नो रतिः
र्न द्वेषो न जरा न चारु + + + निद्रा न यस्य क्षुधा ।
लोकालोकविभासकं निरुपमं यज्ज्ञानमव्याहतं
नीरागाय निरञ्जनाय निरहङ्काराय तस्मै नमः ॥ इत्यादि ।

End. याचे नो प्राज्यराज्यं न विषयसुखं न श्रियं नापि भोगान्
न स्वर्गं न त्रिवर्गं न च वररमणीमङ्गमं नोरुकीर्त्तिं ।
इत्तादिप्रोक्तमन्तस्फुतिधृतिरुचिरं नित्यवैराग्यरङ्गं
चारित्रं सुन्दरं मे जिनजनिहरं देहि ते भक्तियुक्तिं ॥

Colophon. इति श्रीजिनेन्द्रस्तवनं समाप्तम् ।

विषयः। स्तुतिव्याजेन जिनेन्द्रस्य माहात्म्यादिकथनं। निजदैन्यनिवेदनेन वैराग्यादि प्रार्थनञ्च ॥

No. 3117. आदिजिनस्तोत्रम् । Substance, country-made paper, 12 × 6 inches. Folium, 1. Lines, 24. Extent, 23 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Verse. Incorrect.

A'dijina-stotra. A hymn in praise of the first Jina, Ṛishabha-nátha. By Rájaśekhara.

Beginning. नृपतिनाभिकुलाम्बुजभास्कर नृपतिसेवितपादसरोरुह ।
वृषभलाञ्छन देव जगत्पते भवभृतां नमतां कुरु मङ्गलं ॥
जलधरावलिधौतसुराचलप्रतिमदेहरुचे भव + + + ।
अमलकेवलकेलिनिकेतन प्रथमवैभव हे कुरु मङ्गलं ॥ इत्यादि ।

End. श्रीदण्डनाथ विमलप्रविधापितोच्च-
प्रासादभूषण जगत्त्रयवन्दनीय ।
श्रीआदिनाथ भगवन् मलहारि + +
श्रीराजशेखरकृतस्तव + + + + ॥

Colophon. इति श्रीआदिजिनस्तोत्रं सम्पूर्णम् ।

विषयः। स्तवनव्याजेन आदिजिनेन्द्रस्य ऋषभनाथस्य माहात्म्यादिकीर्त्तनम् ।

No. 3118. जगद्भूषणम्। Substance, country-made paper, 12 × 4 inches. Folia, 8. Lines, 8 on a page. Extent, 220 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, fresh. Verse. Incorrect.

Jagadbhúshaṇa. A guide to astrological calculations. By Haridatta Bhaṭṭa, son of Harají Bhaṭṭa.

Beginning. प्रणम्यादिदेवं प्रभुं नारसिंहं
ग्रहान् भास्कराद्यान् गणेशं भवानीं।
ग्रहर्क्षादितिथ्यादिपञ्चाङ्गसिद्धौ
करोमि प्रबन्धं जगद्भूषणाख्यम्॥
देवेन्द्रस्त्रिदशेषु वृक्षनिचये कल्पद्रुमस्तारका-
स्विन्दुः पर्व्वतसञ्चये सुरगिरौ रत्नेषु चिन्तामणिः।
गङ्गा सत्सरितां गणेऽमरगवी गोषु द्विपानां गणे
स्वर्नागोऽखिलराजवंशनिकरे श्रीसूर्य्यवंशस्तथा॥
— — — — — — — —॥
तत्सूनुः किलकर्णसिंह इति यन्नाम्ना यथार्थाङ्कयो
दानाधिक्यतया धनुर्द्धरतया यः शक्रतुल्योऽभवत्।
सत्यत्वेन युधिष्ठिराधिकरणं सौराज्यभावात्तथा
श्रीरामेण समः प्रतापनिकराधिक्यात्समो भानुना॥
तदङ्गजन्मा धरणीं प्रशास्ति श्रीमज्जगत्सिंहनृपो महौजाः।
धर्म्माधिकत्वेन दयालुतया यमेकलिङ्गं प्रवदन्ति सन्तः॥
— — — — — — — — —।
शालिवाहनमहीपतिशाकपूर्णबाणविषयेन्दुसमाने।
श्रीजगन्नरपतिर्निजशाकं भूरिदानजनितं कुरुते स्म। इत्यादि।

End. ग्रन्थेऽस्मिन् यद्यशौकं स्याज्जगद्भूषणसंज्ञके।
सुधीभिः शोधनीयं तत्सुविचार्य्य पुनः पुनः॥
पूर्णतर्कशरभूमित (१५६०) शाके कार्त्तिके धवलपक्षसमेते।
पञ्चमीतिथियुते बुधवारे भूषणं समकरोद्धरिदत्तः॥

Colophon. इति श्रीगणकचक्रचूडामणिभट्टश्रीहरजीतनूजहरिदत्तभट्टविरचिते निखिलराजमण्डलीमौलिमण्डनप्रतापनिकरविध्वस्तरिपुमण्डलविविधविद्याविनोदरसिकमहारा-

जाधिराजमहाराजश्रीजगत्सिंहनामाङ्किते जगद्भूषणे पञ्चाङ्गस्फुटीकरणाधिकारः । समाप्तोऽयं ग्रन्थः ।

विषयः । तत्रादौ चन्द्रसूर्य्यस्फुटीकरणादिकीर्त्तनं । चक्रभ्रमे संस्कारनिरूपणं । भौमादिस्फुटीकरणकथनं । लग्नादिस्फुटीकरणविधिकथनं । चन्द्रसूर्य्यग्रहणस्फुटीकरणकथनं । तिथ्यादिविधिकथनञ्च ।

No. 3119 हितोपदेशः । Substance, country-made paper, 12 × 4 inches. Folia, 38. Lines, 11 on a page. Extent, 1,119 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimganj, Ráya Dhanapat Siñh, Bahádur. Appearance, new. Prose and verse. Incorrect.

Hitopadeśa. A treatise on the diseases of women and children, and on toxicology. By S'ríkaṇṭha Paṇḍita.

Beginning. यत्कर्णमारुतहता गिरयो युगान्ते
चूर्णीभवन्ति किल मेरुहिमाचलाद्याः ।
शुष्यन्ति सप्तसरितां पतयोऽपि नित्यं
वन्देऽन्तरायशमनाय गणेश्वरं तं ॥
— — — — — — — ।
हितोपदेशनामायं ग्रन्थः श्रीकण्ठशम्भुना(?) ।
रोगिरोगापनोदाय क्रियतेऽतिसमासतः ॥
रसायनान्नपान्यादिविधिं वाग्निसमासतः ।
गुणदोषानुरूपेण वैद्यसिद्धान्तसङ्गतं ।
अथ ज्वरोत्पत्तिः ।
रुद्रकोपाग्निसम्भूतः सर्व्वभूतप्रणाशकः । इत्यादि ।

End. मुक्ता+लैरिव घनैः शुचिभिः सुवृत्तैः
सम्पूरिता विमलकान्तिगुणेन युक्ता ।
श्रीकण्ठपण्डितकृतिर्बुधकण्ठरासु
मुक्तावलीव विलुठत्व+ + चिराय ॥

Colophon. इति परमशैवाचार्य्यश्रीकण्ठपण्डितविरचिते वैद्यकसारसंग्रहे हितोपदेशनाम्नि बालस्त्रीरोगशस्त्रघातरोहणनाड़ीव्रण — — — — — — सर्पवृश्चिकादिविषप्रतीकारनामा दशमः समुद्देशः ।

इति हितोपदेशः समाप्तः ॥

विषयः । तत्र प्रथमतः संक्षेपेण द्रव्यगुणकथनं । पानीयादिगुणकथनं । दुग्धादिगुणकथनञ्च । रसायनविधिकथनं । शिरोरोगप्रतीकारकथनं । कर्णरोगप्रतीकारकथनं । नेत्ररोगप्रतीकारकथनं । नासिकारोगप्रतीकारकथनं । मुखरोगप्रतीकारकथनं । एवं कामशूलक्षयरोगगुल्महिक्कादिरोगप्रतीकारकथनं । अतीसारग्रहणीश्लीपदविचर्चिकादिरोगप्रतीकारकथनं । भगन्दरादिरोगप्रतीकारकथनं । कुष्ठवातरोगादिप्रतीकारकथनं । ज्वरप्रतीकारकथनं । बालस्त्रीरोगप्रस्रावाद्यावातरोहणनाड़ीव्रणविसर्परक्तपित्तादिविषादिप्रतीकारकथनञ्च ।

No. 3120. युगलकिशोरस्तोत्रम् । Substance, country-made paper, 15 × 6 inches. Folia, 2. Lines, 9 on a page. Extent, 45 ślokas. Character, Nágara, Date, ? Place of deposit, Ájimganj, Rámchandra Paṇḍit. Appearance. fresh. Verse. Correct.

Yugalakiśora-stotra. A hymn in praise of the dual form of the divinity as Rádhá and Kṛishṇa, in course of which the merits of several places of pilgrimage are extolled. An extract from the Brahmáṇḍa Puráṇa. Cf. No. 2945, *ante* p. 56.

नारद उवाच ।

Beginning. किं तद्गुह्यतरं ब्रह्म न यच्चिन्त्यमपीश्वरैः ।
तन्मे ब्रूहि सतत्त्वज्ञ योगेश मयि वल्लभ ॥
ब्रह्मोवाच ।
शृणु गुह्यतरं तात नारायणमुखाच्छ्रुतं ।
सर्व्वदा पूजिता देवै राधा वृन्दावने वने ॥
राधा विशेषतः कृष्णो ह्येकदा प्रेमविह्वलः ।
राधामन्त्रं जपन् ध्यायन् राधां सर्व्वत्र पश्यति ॥ इत्यादि ॥

End. अहं कृष्णात्मिका नित्या कृष्णश्चैव मदात्मकः ।
वृन्दावनेश्वरः कृष्णः स एवाराध्यते मया ॥
जिह्वाग्रे कृष्णनामेति नेत्रयोः कृष्णविग्रहः ।
कर्णाग्रे कृष्णसंकीर्त्तिर्मनोऽग्रे च हरेस्तनुः ॥
राधया पठितं स्तोत्रं श्रीकृष्णप्रीतये परं ।
यः पठेत् प्रयतो नित्यं स कृष्णवल्लभो भवेत् ॥

Colophon. इति श्रीब्रह्माण्डपुराणे नारदब्रह्मसंवादे युगलकिशोरस्तोत्रं सम्पूर्णं ।

विषयः । राधाकृष्णयोरभिन्नतानिरूपणमुखेन तयोर्माहात्म्यादिकीर्त्तनम् ।

No. 3121. आचार्य्यमतरहस्यम्। Substance, country-made paper. 13 × 5 inches. Folia, 23. Lines, 9 on a page. Extent, 468 ślokas. Character, Nágara. Date, ? Place of deposit, Jiyáganj, Jitendriya Bhaṭṭácbárya. Appearance, new. Prose. Correct.

A'chárya-matarahasya. An essay on the philosophy of Rámánuja, and designed for the refutation of all opinions adverse thereto. By Harirám̐a. Cf. No. 2371, VII, p. 140.

Beginning. सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्मेत्यत्र द्वितीयशब्देन सजातीयादिभेदशून्याङ्गीकारे कथं तादृशस्य जगद्व्यापारः। मायाङ्गीकारेणेति चेत्, किं तदानीं निर्विशेषज्ञानमात्रस्वरूपं ब्रह्ममाया तिष्ठतीति जानाति न वा। जानाति चेत्, ज्ञानमात्रस्य कथं ज्ञातृत्वं। न जानाति चेत्, अज्ञत्वात् कथमङ्गीकरोति। अपि च, यत्किञ्चिच्छक्तियोगं मायाङ्गीकारानन्तरमभ्युपेयते भवद्भिः, तत्पूर्व्वं मायाङ्गीकारानुगुण—इत्यादि।

End. प्राकृतहेयगुणराहित्येन निर्गुणत्वमिति विषयभेदवर्णनेन एकस्यैवावगमात् ब्रह्मद्वैविध्यं दुर्वचनमित्याचार्य्याणां मतं द्रष्टव्यम्।

Colophon. इति श्रीमदाचार्य्यमतरहस्यं सम्पूर्णम्।

विषयः। भगवद्रामानुजाचार्य्यमतोपपादनमुखेन अद्वैतवादखण्डनपुरःसरं विशिष्टाद्वैतवादसिद्धान्तनिरूपणम्।

No. 3122. सुबोधिनी, वैदिकखण्डम्। Substance, country-made paper, 13 × 5 inches. Folia, 33. Lines, 10 on a page. Extent, 215 ślokas. Character, Nágara. Date, ? Place of deposit, A'jimgáṇj, Rámchandra Paṇḍit. Appearance, fresh. Prose. Correct.

Subodhiní. A commentary on the Chapters of the Síddhánta-kaumudí, relating to Vedic grammar and accents. By Krishṇa Bhaṭṭa, son of Govardhana Bhaṭṭa.

Beginning सिन्दूरेण विराजितत्रिनयनं दिक्संख्यदोर्भिर्युतं
भक्तानुग्रहकारकं प्रमदया श्लिष्टं सदानन्दनम्।
अष्टाविंशतिवर्णकैस्तु सततं यं चिन्तयन्ते जना-
स्तं देवं गणपं स्मरामि सततं चन्द्रार्द्धचूड़ं विभुम्॥
यस्तर्कादिसमस्ततन्त्रकमलव्रातप्रभातेष्विव
प्रत्यक्षप्रमितः परः किरणवानन्वर्थगोवर्द्धनः।
सोऽयं पण्डितमण्डलीमुकुट + + वादीन्द्रवृन्दाग्रणीः

श्रीरामाङ्घ्रिनिषेवकः समजनि श्रीमौलिगोवर्द्धनः॥

— — — — — — — — ।

श्रीमत्सिद्धान्तकौमुद्याः स्वरवैदिकखण्डयोः।

नत्वा मुनित्रयं कुर्व्वे टीकां कुर्व्वे सुबोधिनीम्॥

— — — — — — — ।

इयता प्रबन्धेन लौकिकेषु शब्देष्वाख्यातेष्वपि वैदिकान्वाख्यानमवशिष्यते। न चेदमप्रयोजनं। रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति वदता भाष्यकारेण——— इत्यादि।

End. करदित्यादिना विसर्जनीयस्य सत्वं। अभीषुण इति इकः सुञीति दीर्घः। एवं षुणा इत्यत्रापि सर्व्वत्रोदाहरणे अस्मदा × + + नमः॥

Colophon. इति श्रीमन्मौनिकुलतिलकायमानश्रीगोवर्द्धनभट्टाङ्गजेन कृष्णभट्टेन विरचितायां सिद्धान्तकौमुदीव्याख्यायां सुबोधिन्यां वैदिकखण्डं समाप्तम्॥

विषयः। सिद्धान्तकौमदीव्याकरणीयवैदिकप्रकरणस्य व्याख्यानम्।

No. 3123. सुबोधिनी। Substance, country-made paper, 14 × 5 inches. Folia, 14. Lines, 11 on a page. Extent, 446 ślokas. Character, Nágara, Date, ? Place of deposit, A'jimganj, Rámachandra Paṇḍit. Appearance, fresh. Prose and verse. Incorrect.

Subodhiní. A hand-book for the performance of the Homa ceremony for the pacification of the nine planets. By Ananta Bhaṭṭa.

Beginning. प्रतिज्ञा (?) वरणञ्चैव स्वस्तिपुण्याहवाचनं।
आचार्य्यादेस्तु वरणं रक्षाकङ्कणबन्धनं॥
ईशानमण्डलं कृत्वा ग्रहाणां स्थापनं तथा।
अग्नेः प्रणयनं कृत्वा तत आवाहयेत् सुरान्॥ इत्यादि।

End. कृषरं शनये। छागमांसं राहवे। केतुभ्यश्चित्रौदनमित्यादि नैवेद्यमपि पूजनसमये देयमित्यास्तां पल्लवितेन।

Colophon. इति श्रीमदनन्तभट्टकृतौ सुबोधिनीहोमपद्धतिः समाप्ता॥

विषयः। नवग्रहहोमपद्धतिकथनम्।

No. 3124. **राधासहस्रनामस्तोत्रम् ।** Substance, country-made paper, 14 × 5 inches. Folia, 12. Lines, 9 on a page. Extent, 317 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Rámachandra Paṇḍit. Appearance, fresh. Verse. Incorrect.

Rádhá-sahasranáma-stotra. A hymn in praise of Rádhá. It comprises a thousand epithets, each called a name. It is an extract from the Rudra-jámala Tantra. S'iva is said to have first recited it for the edification of Nárada.

Beginning. एकदा देवदेवेशं शङ्करं लोकशङ्करम् ।
पप्रच्छ नारदो भक्त्या कैलासशिखरे स्थितम् ॥
श्रीनारद उवाच ।
भगवन् सर्व्वधर्म्माणां कर्म्मणाञ्च तथा पुनः ।
वेदानां सपुराणानामागमानां तथैव च ॥
सम्यग्रहस्यं जानासि त्वमेव परमो गुरुः ।
तस्योपायं हि त्वां पृच्छे हरिभक्तिविवर्द्धनम् ॥ इत्यादि ।

End. अथ किं बहुनोक्तेन वर्णनेन पुनः पुनः ।
वशयेद्राधिकाकृष्णौ नित्यं पाठकरः पुमान् ॥

Colophon. इति श्रीसर्व्वोत्तममाहात्म्ये तन्त्रे रुद्रयामले शिवनारदसंवादे शिवप्रोक्तं श्रीराधासहस्रनामस्तोत्रम् सम्पूर्णम् ।

विषयः । राधाया नाममाहात्म्यकीर्त्तनव्याजेन तस्याः सहस्रनामकथनम् ।

No. 3125. **रामार्च्चनसोपानः ।** Substance, country-made paper, 13 × 5 inches. Folia, 50. Lines, 10 on a page. Extent, 918 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Rámachandra Paṇḍit. Appearance, new. Prose and verse. Incorrect.

Rámárchchana-sopána. A manual for the worship of Ráma, giving all the necessary rituals and an introduction in praise of his divinity. By S'ivalála Páṭhaka.

Beginning. सीतारामपदाब्जप्रगलन्मकरन्दपानलुब्धोऽहम् ।
रामार्च्चनप्रयोगं वक्तुं गुरुपदपङ्कजं नौमि ॥
तत्र तावच्छ्र्याराध्यपादगुर्व्वनुग्रहः साधको रात्रे—इत्यादि ।

End. एवं संपूज्य भूतेशं मिलितैरुपचारकैः ।
एकाकी निस्पृहः शान्तो विहरेद्रामतत्परः ॥

Colophon. ॐतत्सदिति श्रीमज्ज्ञानकीरमणचरणकमलमकरन्दलुब्धेन पाठकशिवलालशर्म्मणा विरचितः श्रीरामार्चनसोपानः समाप्तिमगमत् ।

विषयः । रामचन्द्रस्य माहात्म्यादिकथनपुरःसरं तत्पूजायाः प्रयोगादिकथनम् ।

No. 3126. शिवपूजासंग्रहः । Substance, country-made paper, 13 × 5 inches. Folia, 47. Lines, 9 on a page. Extent, 1,110 ślokas. Character, Nágara. Date, ? Place of deposit, Ájimganj, Rámachandra Paṇḍit. Appearance, fresh. Prose and verse. Incorrect.

S'ivapújá-sañgraha. Rituals for the worship of S'iva; and a dissertation in praise of the merits of such worship. By Vallabhendra Sarasvatí.

Beginning ॐ भुशुण्ड कालाग्निरुद्रं भस्मस्नानविधिं ब्रूहीति होवाच ।
— — — — — —तत्र श्लोकाः ।
भस्ममुष्टिं समादाय संहितां मन्त्रसंहिताम् ।
मस्तकात् पादपर्य्यन्तं मलस्नानं पुरोदितम् ॥
तन्मन्त्रेण च कर्त्तव्यं विधिस्नानं समाचरेत् । इत्यादि ।

End. यस्तु शङ्करनिर्म्माल्यं पादेनाक्रमते नरः ।
षष्टिवर्षसहस्राणि तिर्य्यग्योनिषु जायते ॥

Colphon. इति श्रीवल्लभेन्द्रसरस्वतीकृतशिवपूजासंग्रहे पञ्चमोऽध्यायः ।

विषयः । शिवपूजाविधानकथनमुखेन शिवमाहात्म्यादिकथनम् । शिलामाहात्म्यादिकीर्त्तनञ्च ।

No. 3127. सहस्रचण्ड्यादिविधिः । Substance, country-made paper, 10 × 6 inches. Folia, 20. Lines, 10 on a page. Extent, 488 ślokas. Character, Nágara. Date, ? Place of deposit, Jiyáganj, Jitendriya Bhaṭṭáchárya. Appearance, new. Prose and verse. Incorrect.

Sahasra-chaṇḍyádi-vidhi. The rules for reading the Chaṇḍí section of the Márkaṇḍeya Puráṇa and the adoration of the goddess

Chaṇḍí. By Kamalákara Bhaṭṭa, brother of Dinakara Bhaṭṭa, son of Rámakṛishṇa Bhaṭṭa, grandson of Náráyaṇa Bhaṭṭa, and great-grandson of Rámeśvara Bhaṭṭa.

Beginning. नत्वा गणेश्वरं देवीं पितरौ राघवं शिवम् ।
रामकृष्णतनूजेन कमलाकरशर्म्मणा ॥
डामरं जामलञ्चैव योगिनीतन्त्रमेव च ।
वाराहीतन्त्रमन्यांश्च ग्रन्थानालोच्य यत्नतः ॥
सहस्रचण्डिकायाश्च शतचण्ड्यास्तथैव च ।
नवार्णन्यासविधिना प्रयोगः प्रोच्यतेऽधुना ॥

तत्र यजमानः शुभदेशे मण्डपं चिकीर्षुः गणेशकूर्म्मशेषवसुधानां पूजनं कृत्वा शतचण्ड्यां षोड़शहस्तं सहस्रचण्ड्यां विंशतिहस्तं मण्डपं प्रसाध्य ।——इत्यादि ।

End. विशेषस्तु मत्कृते निर्णयसिन्धौ नवरात्रिनिर्णये ज्ञेय इति ।

Colophon. इति श्रीमत्पदवाक्यप्रमाणपारीणरामेश्वरभट्टसूरिसूनुनारायणभट्टसुतमीमांसकरामकृष्णभट्टात्मजदिनकरभट्टानुजकमलाकरभट्टकृतसहस्रचण्ड्यादिविधिः परिपूर्णः ॥

विषयः । सहस्रचण्डीशतचण्ड्यादिपाठप्रयोगादिकथनम् ।

No. 3128. योगशतकं, सटीकम् । Substance, country-made paper, 13 × 4 inches. Folia, 22. Lines, 14 on a page. Extent, 943 ślokas. Character, Nágara. Date, ? Place of deposit, Jiyáganj, S'ítánátha Paṇḍit. Appearance, fresh. Text, verse, commentary, prose. Generally correct.

Yoga-śataka. A hundred recipes for the cure of fever and other diseases by simple remedies. By S'rípaṇḍita.

Beginning. टीकायाः,—
श्रीवर्द्धमानं प्रणिपत्य मूर्द्धा जनस्य सर्व्वस्य निरोगहेतोः ।
श्रीपूर्णसेनेन सुबोधनार्थं प्रारभ्यते योगशतस्य टीका ॥

अथ जीवा आदिनिधनाः । तेषां जीवानामाहारमन्वाहृतशीतातपवर्षाणि विषमाशनानि । इत्यादि ।

मूलस्य,—
कृत्स्नस्य तन्त्रस्य गृहीतधाम्ना चिकित्सितार्थप्रहृतस्य दूरात् ।
विदग्धवैद्यप्रतिपूजितस्य करिष्यते योगशतस्य बन्धः ॥
तेषां क्रिया प्रतिदिनं क्रियतां भिषग्भि-

रायुर्व्वयोऽ+बलसत्त्वसुदेशसात्म्यम् ?।
विज्ञाय सत्प्रकृतिभेषजतत्प्रमाणं
ज्ञात्वा तथान्यदपि कर्म्मगतं च शास्त्रे॥ इत्यादि ।

End. मूलस्य,—

गुणाधिकं योगशतं निबध्य प्राप्तं मया पुण्यमिहोत्तमश्च ।
नानाप्रकारामयनीड़भूतं कृत्स्नं जगत् तेन भवत्वरोगम् ॥

टीकायाः,—

एतानि लिङ्गानि च तत्कृतानां सर्व्वामया — — — — चैकनाम्नां कश्चित् प्राप्तिनिरोधपूर्व्वसंज्ञान्तरं येन तु संप्रयाति ॥

Colophon. इति श्रीश्रीपण्डितविरचितं योगशतकं समाप्तम् ।
इति योगशतकग्रन्थटीका सम्पूर्णा ।

विषयः । ज्वरादिषु रोगेषु सर्व्वत्र संक्षेपेण सुष्टियोगकथनम् ।

No. 3129. अष्टाङ्गहृदयम् । (सूत्रस्थानम् ।) Substance, country-made paper, 12 × 4 inches. Folia, 125. Lines, 8—9 on a page. Extent, 1,976 ślokas. Character, Nágara. Date, ? Place of deposit, Jiyáganj, Sítánátha Bhaṭṭáchárya. Appearance, old. Verse, interspersed with a few words in prose here and there. Incorrect.

Ashṭáṅga-hṛidaya. A comprehensive treatise on the Hindu system of medicine. By Vág-bhaṭa, whose name is not unfrequently written Vábhaṭa or Váhbhaṭa. The name of the work means the "essence of the eight-membered work," implying that it contains the substance of the original text of Suśruta, which comprises, in eight chapters, the surgical lectures of Dhanvantari, as also the substance of the medical lectures (also in eight chapters) of Punarvasu. The work of the latter is no longer extant. It is obvious that the work under notice is later than Suśruta, but it is widely known under the name of Vábhaṭa, and is highly esteemed, by Indian physicians. It has been also commented upon by several exegetes. Portions of the text have been printed three or four times, and an excellent edition with the commentary of Aruṇadatta and a Bengali translation is now being printed in Calcutta by Kaviràja Vijayaratna Sena. Thirty parts of the edition have already been published. The MS. under notice contains only the first chapter of the work, and is devoted to Materia Medica.

Beginning. अथात आयुष्कामीयमध्यायं व्याख्यास्यामः।
इतीह स्माहुरात्रेयादयो महर्षयः।
आयुः कामयमानेन धर्म्मार्थसुखसाधनः।
आयुर्व्वेदोपदेशेषु विधेयः परमादरः॥
ब्रह्मा स्मृत्वायुषो वेदं प्रजापतिमजिग्रहत्।
सोऽश्विनौ तौ सहस्राक्षं सोऽत्रिपुत्रादिकान् मुनीन्।
अग्निवेशादिकांस्ते तु पृथक् सूत्राणि तेनिरे॥
तेभ्योऽतिविप्रकीर्णेभ्यः प्रायः सारतरोच्चयः।
क्रियतेऽष्टाङ्गहृदयं नातिसंक्षेपविस्तरम्॥ इत्यादि।

End. अतिदग्धे + तं कुर्य्यात् सर्व्वं पित्तनिवर्हवत्।
स्नेहदग्धे भृशतरं रूक्षं तत्र तु योजयेत्॥
समाप्यते स्थानमिदं हृदयस्य + + ववत्।
अत्रार्थाः सूचिताः सूक्ष्माः प्रतन्यन्ते हि सर्व्वतः॥

Colophon. इति सूत्रस्थाने क्षाराग्निकर्म्मविधिरध्यायस्त्रिंशः। श्रीः।

विषयः। अष्टाङ्गलक्षणादिकथनं। वायुपित्तकफानां लक्षणतत्कार्य्यादिनिरूपणं। ऋतुचर्य्याविधिकथनं। रोगानुत्पादनीयविधिनिरूपणं। अथ द्रव्यगुणकथनं। तत्र तोयवर्गकथनं। क्षीरवर्गकथनं। इक्षुवर्गकथनं। तैलवर्गकथनं। मद्यवर्गकथनं। अन्नवर्गकथनं। तत्र शूकधान्यवर्गकथनं। शिम्बीधान्यवर्गकथनं। कृतान्नवर्गकथनं। मांसवर्गकथनं। शाकवर्गकथनं। फलवर्गकथनं। औषधिवर्गकथनं। विषादितः अन्नादिसंरक्षणविधिकथनं। शरीररक्षाविधिकथनं। भोजनविधिकथनमुखेन तन्मात्रादिनिरूपणं। षड्रसादिनिरूपणं। अथ दोषनिरूपणं। तत्र तत्र तत्तदुपक्रमनिरूपणञ्च। अथ भेदनस्नेहनादिविधिकथनं। वस्तिविधिकथनं। नस्यविधिकथनं। धूमविधिकथनं। गण्डूषादिविधिकथनं। आश्चोतनाञ्जनविधिकथनं। तर्पणपुटादिविधिकथनं। अथ यन्त्रविधिकथनं। अथ शस्त्रविधिकथनं। शिराव्यधविधिकथनं। शल्यहरणविधिकथनं। शस्त्रप्रयोगादिविधिकथनं। अथ क्षाराग्निकर्म्मविधिकथनञ्च। इति शम्।

No. 3130. वृहत्कल्पसूत्रम्। Substance, country-made paper, 13 × 4 inches. Folia, 30. Lines, 8 on a page. Extent, 522 ślokas. Character, Nágara. Date, ? Place of deposit, Jiyáganj, Váluchara, Kharataragachchhíya Panchâyatapausála. Appearance, fresh. Prose. Correct. Mágadhí.

Vṛihat-kalpa-sútra. A Jaina text on Achára. The work namad *Kalpa Sútra* is a life of Vardhamána Jina.

Beginning. ॐ सर्व्वज्ञाय नमः ।

लोकण्य इति गंथाणवा । निग्गंथीणवा । आमे तालपलं वेअभिणे पड़िग्गाहित्तोए कप्पति नगंथाणवा । निग्गंथीणवा । आमे तालपलं वेभिणे । —— इत्यादि

End. णिविसमाणकप्पठिइ णिविट्ठमाणकप्पठिइ । जिणे कप्पठिइ । थेरेकप्पठिइ + तिवेमि ॥

Colophon. इति श्रीकपपरमकट्टो उद्देसउ सम्मत्तो ॥
श्रीवृहत्कल्पसूत्रं समाप्तं ।

विषयः । अतीचारमलिनस्य साधोः विशुद्धिमापादयितुं जिनानुशासनेन प्रायश्चित्त-निरूपणं । तत्र क्रमेण सम्यग्दृष्टि-सासादन-चारोपशमिकादिनिरूपणं । सागारिकादिस्वरूप-कथनं । पुलाकादिनिरूपणं । सूचादिस्वरूपकथनं । षड्विधप्रस्तारनिरूपणं । चित्तचित्ततादि-स्वरूपकथनं । साधूनां विहिताविहिताचारनिरूपणञ्च । इति शम् ।

No. 3131. वृहत्कल्पवृत्तिः । Substance, country-made paper, 14 × 5 inches. Folia, 816. Lines, 15 on a page. Extent, 47,401 ślokas. Character, Nágara. Date, Sm. 1529. Place of deposit, Váluchara, Jiyágaṇj, Kharataragachchhíya Pancháyatapausála. Appearance, old. Prose. Incorrect. Partly Sanskrit and partly Mágadhí.

Vṛihat-kalpa-vṛitti. A gloss on the work noticed above. By Kshemakírti Súrí.

Beginning. प्रकटीकृतनिःश्रेयसपदहेतुस्थविरकल्पजिनकल्पं ।
नत्वाशेषनरामरकल्पितफलकल्पतरुकल्पं ॥
नत्वा श्रीवीरजिनं गुरुपदकमलानि बोधविपुलानि ।
कल्पाध्ययनं विवृणोमि लेशतो गुरुनियोगेन ॥
भाष्यं क्व चातिगम्भीरं क्व चाहं जड़शेखरः ।
यद्वा जानते पूज्या ये मामेवं नियुञ्जते ॥
अद्भुतगुणरत्ननिधौ कल्पे सहायकं महातेजाः ।
दीप इव तमसि कुरुते जयति यतीशः स चूर्णिकृत् ॥

इह शिष्याणां मङ्गलबुद्धिपरिग्रहाय शास्त्रस्यादौ मध्येऽवसाने च अवश्यं मङ्गलमभि-धातव्यं ।—— इत्यादि ।

End. योग्यविनेयानां दीपनामनालस्येन
व्याख्यानं करोति तस्यैव द्वारम् ।

Colophon. इति बृहत्कल्पवृत्तौ षष्ठ उद्देशकः समाप्तः ।

अतः परं श्लोकेन ग्रन्थकृत्परिचयो वर्णते । स च विलुप्ताक्षरतया सम्यक् न पठितुं शक्यते । संवत् । १५१९ ॥

विषयः । बृहत्कल्पसूत्राभिधानजैनग्रन्थस्य व्याख्यानम् ।

No. 3132. कृत्यतत्त्वं, वा प्रयोगसारः । Substance, country-made paper, 14 × 4 inches. Folia, 155. Lines, 7 on a page. Extent, 4,716 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágíśa. Appearance, old. Prose and verse. Correct.

Kritya-tattva ALIAS **Prayogasára.** A Calendar of the fasts, festivals and ceremonies appropriate for each month in the year, and the rituals thereof. By Krishṇadeva Smártavágísa, son of Náráyaṇa of the Vandyaghaṭíya sept.

Beginning. वेदान्तवेद्यं श्रीरामं प्रणम्य सन्मुदे मया ।
क्रमात् द्वादशमासेषु कृत्यतत्त्वं प्रचक्ष्यते ॥
नारायणो वन्द्यकुलाग्रजन्मा तस्यात्मजः श्रीयुतकृष्णदेवः ।
प्रणम्य रामस्य पदारविन्दं प्रयोगसारं कुरुतेऽब्दसम्भवं ॥
तिथितत्त्वेषु सन्धेयं प्रमाणञ्चास्य कोविदैः ।
वैशाखादिक्रमेणैव प्रयोगोऽत्र निबध्यते ॥
अथ वैशाखकृत्यं । पद्मपुराणं ।
तुलामकरमेषेषु प्रातःस्नानं विधीयते ।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनं ॥ इत्यादि ।

End. ततो मूलमन्त्रं यथाशक्ति जप्त्वा आवीरं दत्त्वा सप्तकृत्वः शनैः शनैः दोलयित्वा दक्षिणाच्छिद्रावधारणं कृत्वा ब्राह्मणान् भोजयेत् । इति दोलयात्रापद्धतिः समाप्ता ।

Colophon. इति श्रीकृष्णदेवस्मार्त्तवागीशकृते कृत्यतत्त्वे प्रयोगसारे दोलयात्रापद्धतिः । समाप्तोऽयं ग्रन्थः ।

विषयः । द्वादशमासेषु कृत्यविशेषविधानकथनपूर्व्वकं तत्र तत्र प्रयोगकीर्त्तनं । तत्र वैशाखकृत्यनिरूपणं । संक्रान्तिनिरूपणं । युगाद्याकथनं । मन्वन्तराकथनं । पिपीतकीविधानं यवश्राद्धविधानं । ज्यैष्ठकृत्यनिरूपणं । तत्र सावित्रीव्रतविधानं । अरण्यषष्ठीविधानं । दशहराविधानं । महाज्यैष्ठीविधिकथनं । आषाढ़कृत्यकथनं । तत्र नवोदकश्राद्धविधिः । रथयात्रादिनिरूपणं । चातुर्मास्यव्रतविधिः । हरिशयनविधिः । श्रावणकृत्यनिरूपणं । तत्र नागपञ्चमी-

विधानं। भाद्रकृत्यनिरूपणं। तत्र जन्माष्टमीविधिः। अघोराचतुर्द्दशीविधिः। कौशीचतुर्द्दशी-विधिः। आलोकामावास्याव्रतविधिः। नष्टचन्द्रविधिः। कुक्कुटीव्रतविधिः। दूर्व्वाष्टमीव्रत-विधिः। तालनवमीव्रतविधिः। श्रावणद्वादशीकथनं। शक्रोत्थानविधानं। अनन्तव्रतविधिः। अगस्त्यार्घदानविधिः। आश्विनकृत्यनिरूपणं। तत्र प्रेतपक्षश्राद्धविधिः। मघात्रयोदशीश्राद्ध-विधिः। नवान्नश्राद्धविधिः। दुर्गोत्सवविधानं। कोजागरकृत्यनिरूपणं। कार्त्तिककृत्यनिरूपणं। तत्र विषुवस्नानविधिः। प्रातःस्नानविधिः। तुलसीदानविधिः। हविष्यान्नभोजनादिविधिः। मत्स्यादिभक्षणनिषेधः। भूतचतुर्द्दशीविधिः। प्रेतोपाख्यानं। दीपान्विताविधिः। कालीपूजा-विधिः। द्यूतप्रतिपद्विधिः। भ्रातृद्वितीयाविधिः। गोष्ठाष्टमीविधानं। त्रेतायुगाद्याविधिः। वकपञ्चमन्वन्तराविधिः। उत्थानविधिः। कार्त्तिकीपूर्णिमा। काम्यवृषोत्सर्गविधिः। मार्गशीर्ष-कृत्यनिरूपणं। तत्र रोहिणीनक्षत्रयुक्तप्रतिपत्स्नानविधिः। पौषकृत्यनिरूपणं। तत्र अष्टका-विधिकथनं। माघकृत्यनिरूपणं। तत्र प्रातःस्नानविधिकथनं। मूलकनिषेधः। रटन्तीस्नान-विधिः। श्रीपञ्चमीकृत्यनिरूपणं। षट्पञ्चमीव्रतविधिः। शीतलषष्ठीविधानं। माघीसप्तमी-विधिः। विधानसप्तमीविधिः। आरोग्यसप्तमीविधिः। भीष्माष्टमीविधिः। सामान्यैकादशी-विधिः। फाल्गुनकृत्यनिरूपणं। तत्र शिवरात्रिविधानं। गोविन्दद्वादशीविधिः। चूतपान-विधिः। चैत्रकृत्यनिरूपणं। तत्र घण्टाकर्णपूजाविधानं। शीतलापूजाविधानं। स्कन्दषष्ठी-विधिः। वारुण्यादिनिरूपणं। अशोकाष्टमीकथनं। ब्रह्मपुत्रस्नानविधिः। श्रीरामनवमीविधिः। दोलयात्राविधानकीर्त्तनञ्च।

No. 3133. शुद्धिसारः। Substance, country-made paper, 14 × 4 inches. Folia, 101. Lines, 7 on a page. Extent, 2,625 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágísa. Appearance, old. Prose and verse. Correct.

S'uddhi-sára A digest of Smṛiti rules regarding impurity of the person caused by a death, or a birth in one's gotra, and the duties appropriate on such occasions. By Kṛishṇadeva Smártavágís'a, of the Vandyaghaṭíya sept.

Beginning. वेदान्तवेद्यं श्रीरामं प्रणम्य सन्मुदे मया।
बालानां सुखबोधाय शुद्धिसारः प्रतन्यते॥

तत्र शुध्येद्विप्रो दशाहेन द्वादशाहेन भूमिपः। वैश्यः पञ्चदशाहेन शूद्रस्तु त्रिंशता दिनैः। इत्यादि।

End. अतः पूर्व्वाधिकारिसत्त्वेऽपि पराधिकारिकृता सिध्यति, न तु क्लीवादि-

कृतेव असिद्वा। तेन पूर्व्वाधिकारिणा पुनः पर्णनरदाहादिकं न करणीयं। तत्र पूर्व्वं सर्व्वेऽधिकारिणोऽवश्यं कुर्य्युः।

Colophon. इति वन्द्यघटीयश्रीकृष्णदेवस्मार्त्तवागीशभट्टाचार्य्यकृतौ शुद्धिसारः समाप्तः।

विषयः। शौचाशौचलक्षणं। गर्भस्रावाशौचकथनं। बालाद्यशौचनिरूपणं। स्त्र्यशौच-निरूपणं। सपिण्डाद्यशौचनिरूपणं। मातामहाद्यशौचनिरूपणं। मृत्युविशेषाशौचनिरूपणं। तत्र तत्र प्रायश्चित्तनिरूपणञ्च। विदेशस्थाशौचनिरूपणं। दशविधाशौचनिरूपणं। शवानु-गमनादिव्यवस्था। अङ्गास्पृश्यत्वनिरूपणं। अचारलवणाशित्वनिरूपणं। अशौचसङ्करव्यवस्था। सहमरणानुमरणव्यवस्था। सापिण्ड्यनिरूपणं। अशौचे वर्ज्जनीयानि। रजस्वलाशौचनिरू-पणं। चताशौचव्यवस्था। मुमूर्षुकृत्यनिरूपणं। मृतकृत्यं। पर्णनरदाहविधिः। अशौचान्त-दिनकृत्यं। तद्द्वितीयदिनकृत्यं। उभयतोमुखीदानविधानं। हरिवंशदानविधिः। शाल-ग्रामदानविधिः। विपुलगृहदानविधिः। वृहद्दामान्नदानविधिः। प्रेतश्राद्धक्रमकथनं। सपिण्डीकरणविधिः। स्त्रीसपिण्डनविधिः। प्रेतत्वविवेचनञ्च। इति।

No. 3134. प्रायश्चित्तकौमुदी। Substance, country-made paper, 14 × 4 inches. Folia, 92. Lines, 6 on a page. Extent, 2,033 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágíśa. Appearance, old. Prose and verse. Correct.

Práyaśchitta-kaumudí. A digest of the laws and rituals for expiations of sins and transgressions. By Krishṇadeva Smártavágís'a. This is different from the work of this name noticed under No. 1984. (*ante*, Vol. VI, p. 5.)

Beginning. नमस्कृत्याखिलैर्वेदैर्वेद्यं श्रीपरमेश्वरं।
तन्यते कृष्णदेवेन प्रायश्चित्तस्य कौमुदी॥

अथ प्रायश्चित्तलक्षणं। तत्र पापक्षयमात्रकामनाजन्यकृतिविषयः पापक्षयसाधनं कर्म्म प्रायश्चित्तं। पापक्षयस्वर्गाभयकामनाजन्यकृतिविषयसहमरणाश्वमेधादिवारणाय मात्रपदं। इत्यादि।

End. आसनं वसनं शय्या जायापत्यं कमण्डलुः।
आत्मनः शुचिरेतानि न परेषां कदाचन॥
अत्र च हरेर्नाम हरेर्नाम हरेर्नामैव केवलं।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा॥

Colophon. इति श्रीयुक्तकृष्णदेवस्मार्त्तवागीशभट्टाचार्य्यकृता प्रायश्चित्तकौमुदी समाप्ता ॥

विषयः। पापलक्षणविचारः। अतिपातकमहापातकनिरूपणं। नवधासंसर्गनिरूपणं। अनुपातकोपपातकनिरूपणं। जातिभ्रंशकरपापकथनं। सङ्करीकरणविवेचनं। अपात्रीकरणनिरूपणं। मलावहनिरूपणं। प्रकीर्णकं। तन्त्रताविचारः। प्रसङ्गविवेचनं। प्रायश्चित्तत्रैविध्यनिरूपणं। अनुग्रहव्यवस्था। धेनुमूल्यादिनिरूपणं। प्रायश्चित्तपूर्व्वाहकृत्यनिरूपणं। ज्ञानकृतनिरूपणं। गोबधप्रायश्चित्तं। शूद्रस्वामिकादिगोबधप्रायश्चित्तं। गर्भिन्यादिबधे विशेषकथनं। एकप्रयत्ननिष्पाद्यानेकगोबधप्रायश्चित्तं। अज्ञानकृतबहुजनकृतगोबधप्रायश्चित्तं। मुण्डने विशेषकथनं। अपालनकृतादिप्रायश्चित्तं। अस्थिभङ्गादिप्रायश्चित्तं। अण्डमोक्षणादिप्रायश्चित्तं। गोमांसखादके गोविक्रयादिप्रायश्चित्तं। गोबधापवादः। व्रतानुकल्पनिरूपणं। पराकव्रतनिरूपणं। परिसंख्या। गोपने प्रायश्चित्तं। अष्टम्यादौप्रायश्चित्तनिषेधः। अतिपातकादिप्रायश्चित्तं। गर्भबधादिप्रायश्चित्तं। सुरापानप्रायश्चित्तं। सुवर्णस्तेयप्रायश्चित्तं। गुर्व्वङ्गनागमनप्रायश्चित्तं। पतितसंसर्गप्रायश्चित्तं। शूद्रबधप्रायश्चित्तं। स्त्रीबधप्रायश्चित्तं। भार्य्यायां मातृत्वादिवदतः प्रायश्चित्तं। पितृस्वस्रादिकन्यापरिणयप्रायश्चित्तं। उपवीतच्छेदनप्रायश्चित्तं। पर्व्वसु स्त्रीगमने प्रायश्चित्तं। श्राद्धदिने मैथुनप्रायश्चित्तं। तैलाभ्यक्तादेर्मूत्रोच्चारादौ प्रायश्चित्तं। उच्छिष्टभक्षणप्रायश्चित्तं। अशौचान्नभोजनप्रायश्चित्तं। मृत्तिकादिभोजनप्रायश्चित्तकथनञ्च।

No. 3135. महावाक्यरत्नावली। Substance, country-made paper, 5 × 8 inches. Folia, 62. Lines, 5 on a page. Extent, 658 ślokas. Character, Nágara. Date, ? Place of deposit, Śántipura, Kálidása Vidyávágíśa. Appearance, old. Verse. Correct.

Mahávákya-ratnávalí. A collection of one thousand and eight maxims taken from the Upanishads, of which one hundred and eight are named. By Rámachandrendra, disciple of Vásudevendra Sarasvatí.

Beginning. ॐ श्रीमद्विश्वाधिष्ठानपरमहंसमद्गुरुश्रीरामचन्द्राय नमः।

यो विश्वादिविदेहान्तमहावाक्यार्थविग्रहः।
श्रीरामचन्द्ररूपाय तस्मै भूमात्मने नमः ॥
यः पूज्यो यतिभिः स्वधर्म्मनिरतैर्ध्यायन्ति यं योगिना
येनात्तं निगमान्तवेद्यमनिशं यस्मै हविर्दीयते।
यस्मात् स्थावरजङ्गमं समभवद्यस्यांशमात्रो वरो
यस्मिन् लीनमिदं प्रणौमि सततं तं वासुदेवं गुरुं ॥ इत्यादि।

End. यन्महावाक्यसिद्धान्तं मुक्तचित्तैकगोचरं ।
वासुदेवेन्द्रसंज्ञं तं नौमि सर्व्वात्मकं महः ॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यवासुदेवेन्द्रसरस्वतीचरणकमलमकरन्दहृष्टस्वान्तरामचन्द्रेन्द्रग्रथिते शाद्यष्टोत्तरशतोपनिषत्सारमङ्गृहभूताष्टोत्तरसहस्रमहावाक्यरत्नावल्लौ सम्पूर्णा ।

विषयः । महावाक्यरत्नावल्लौपदयोजना । अष्टोत्तरशतोपनिषन्नामकीर्त्तनं । पञ्चशान्तिकथनं । साद्धान्तिकविधिवाक्यानि । बन्धमोक्षवाक्यानि । विद्वन्निन्दावाक्यानि । जगन्मिथ्यावाक्यानि । उपदेशवाक्यानि । जीवब्रह्मैक्यवाक्यानि । मननवाक्यानि । जीवन्मुक्तिवाक्यानि । स्वानुभूतिवाक्यानि । समाधिवाक्यानि । अष्टस्वरूपवाक्यानि । पुंलिङ्गस्वरूपवाक्यानि । स्त्रीलिङ्गस्वरूपवाक्यानि । नपुंसकलिङ्गस्वरूपवाक्यानि । आत्मस्वरूपवाक्यानि । सर्व्वस्वरूपवाक्यानि । ब्रह्मस्वरूपवाक्यानि । अवशिष्टवाक्यानि । फलवाक्यानि । विदेहमुक्तिवाक्यानि च ।

No. 3136. किरणावली । Substance, country-made paper, 5 × 8, inches. Folia, 70. Lines, 11 on a page. Extent, 2,887 ślokas. Character Nágara. Date, ? Place of deposit, S'ántipura, Kálidása Vídyávágíśa. Appearance, old. Prose. Correct.

Kiranávalí. A gloss on the work noticed under the next preceding No. By Brahmayogi, disciple of Vásudevendra Sarasvatí.

Beginning. अनन्तशक्तिसन्दोहपूर्णस्य परमात्मनः ।
विघ्नविध्वंसिनीं शक्तिं गणराजमुपास्महे ॥

हरिः ॐ । श्रीमद्विश्वाधिष्ठानपरमहंससद्गुरुश्रीरामचन्द्राय नमः ।

ईशाद्युपनिषत्प्रोद्यन्महावाक्यकलेवरं ।
विकलेवरकैवल्यं रामचन्द्रपदं भजे ॥
विश्वाधिष्ठानसन्मात्रवासुदेवेन्द्रमूर्त्तये ।
श्रीदेशिकस्वरूपाय परस्मै ब्रह्मणे नमः ॥
नत्वा श्रीदेशिकं ब्रह्म साक्षानन्दाप्तिमिच्छतां ।
महावाक्यरत्नजातकिरणावलिरीर्य्यते ॥

इह खलु परमदयाकलेवर—इत्यादि ।

End. यत् तेजोमात्रमवशिष्यते तत् स्वमात्रतया नौमि तत्पर्य्यवसन्नो भवामीत्यर्थः ।

Colophon. इति श्रीवासुदेवेन्द्रशिष्येण ब्रह्मयोगिना।
महावाक्यरत्नजातकिरणावलिरीरिता॥

विषयः। रामचन्द्रेन्द्रसङ्कलितमहावाक्यरत्नावल्या व्याख्यानं।

No. 3137. भजनक्रमसङ्ग्रहः। Substance, country-made yellow paper, 11 × 4 inches. Folia, 55. Lines, 5 on a page. Extent, 821 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágísa. Appearance, fresh. Prose and verse. Correct.

Bhajanakrama-sañgraha. Rules for the adoration of Krishṇa and Vaishṇava divinities generally, according to the principles inculcated by Chaitanya. By Rádhámohana Gos'vámí, of the Advaita sept.

Beginning. वन्दे श्रीकृष्णचैतन्यमद्वैताद्वैतविग्रहं।
परमानन्दसन्दोहविग्रहं नित्यमीश्वरं॥
श्रीमदद्वैतवंशेन राधामोहनशर्म्मणा।
क्रियते श्रीकृष्णनित्यभजनक्रमसङ्ग्रहः॥

अथ तमेव विदित्वाऽतिमृत्युमेतीतिश्रुत्या परमेश्वरमात्रविषयकज्ञानस्यैव संसारमोचनहेतुत्वमित्यादि।

End. एवमादिवचनैः + प्रागुक्तवचनैश्च भृन्दावनादिकमेव नित्यलीलास्पदं भगवतः केचिद्वर्णयन्ति तदप्यनुसन्धेयमिति शम्।

Colophon. इति कलियुगपावनावतारश्रीमदद्वैतवंशश्रीराधामोहनगोस्वामिभट्टाचार्य्यविरचितः श्रीकृष्णभजनक्रमसंग्रहः समाप्त इति।

विषयः। भगवद्विषयकज्ञानस्यैव मोक्षहेतुत्वं तज्ज्ञानञ्च तन्मात्रभजनेनैव जायते—इति निरूपणं। निर्व्वेदप्राप्तिपर्य्यन्तं कर्म्मणामनुष्ठेयता—इति निरूपणं। शान्तदासादिभेदेन भक्तानां पञ्चविधत्वकथनं। तत्र शान्तभक्तानां भगवद्भजनक्रमकीर्त्तनं। सायुज्यमुक्तिकामेन श्रीकृष्णाभिन्नतया स्वात्मा चिन्तनीय इति निर्णयः। प्रातःकृत्यविधानादिकीर्त्तनं। भगवदर्चनस्यावश्यकर्त्तव्यता। कुत्र वाह्यपूजाया आवश्यकत्वमिति तन्निरूपणं। ब्रह्मलक्षणं। तच्छरीरनिरूपणादिकं। निर्व्विशेषत्वेन उपासनापेक्षया भगवत्त्वेन आराधनस्य श्रेष्ठत्वनिरूपणं। भगवन्मूर्त्तीनां सर्व्वासामेव शान्तस्य भजनीयत्वकीर्त्तनं। शान्तेन श्रीकृष्णस्य रहस्यलीलाश्रवणादिकं पौरुषकामरागादिशून्यतया क्रियते चेन्न दोषायेतिकीर्त्तनं। शान्तभक्तद्वैविध्यकथनञ्च। दासभक्तानां भगवद्भजनक्रमकथनं। प्रेमभक्तिनिरूपणं। शान्तदासयोः भजनस्यावान्तरभेदनिरूपणं। श्रीकृष्णस्य रासलीलादिश्रवणं कामरागराहित्येन दासैः कर्त्तव्यमितिनिर्णयः। दासानां मुक्तिलाभ-

कथनं। भगवतः अवतारबाहुल्यप्रयोजनकथनं। श्रीसीताप्रभृतीनां तद्भक्तीनां मातृत्वबुद्ध्या सेवनादिकं कर्त्तव्यमितिकथनं। भगवत्परिकरदासीष्वपि भगिनीत्वमारोप्यमितिकीर्त्तनञ्च। दासैश्च भगवति पितृत्वबुद्धिः न कार्य्या इति निरूपणं। तेषां मुमुक्षुत्वे तत्प्रकारकथनं। मुमुक्षूणां समाधिभेदनिरूपणं। गुणमायायोगमायादिनिरूपणं। सख्यवात्सल्यमाधुर्य्यभाव-कथनं। तत्रापि इदानीन्तनानां श्रीकृष्णे परमेश्वरत्वबुद्धिरावश्यकीति तन्निर्णयः। श्रीकृष्णस्य कौमारलीलामाहात्म्यकथनं। कौमारवर्णनादिकं। तेषु ध्यानभेदकथनं। ऐश्वर्य्यज्ञानवतां भगवति कथं वात्सल्यरागरुचिर्भवेदिति तन्निरूपणञ्च।

वत्सलभक्तानां भजनक्रमकथनं। सख्यभजनक्रमकथनं। तत्त्रैविध्यनिरूपणं। शान्ता-दीनां चतुर्णामपि भक्तानां साधारणतः कर्त्तव्यनिर्देशः। श्रीकृष्णस्य पौगण्डलीलाकैशोर-लीला च। उज्ज्वलभक्तानां भजनक्रमकथनं। तत्र ध्यानादिकथनं। साधनावस्थायां तद्भाव-लब्धये वैधार्च्चनादीनामावश्यकताकथनं। श्रवणकीर्त्तनादीनां नित्यानुष्ठेयत्वनिरूपणं। वात्-सल्ये माधुर्य्ये च भावे स्वात्मनि स्त्रीत्वमारोप्यैव भजनं कर्त्तव्यमितिकीर्त्तनञ्च।

भजनसिद्धानां मुमुक्षूणां तदितरेषाञ्च प्राप्यस्थाननिरूपणं। यशोदानन्दादीनां वैकुण्ठ-प्राप्तिविवरणं। भगवल्लीलानां नित्यताकथनस्य अभिप्रायाभिधानं। कासाञ्चिद्गोपीनां मोक्षप्राप्तिकथनं। चैतन्यसम्प्रदायानुसारिणां नयेन श्रीकृष्णरूपतत्स्थानादिकीर्त्तनं। वैकुण्ठ-गोलोकादीनां वृन्दावनापरनामधेयताभिधानं। गोलोकशब्दनिर्वचनं। भगवत्प्रियाणां व्रजाङ्गनाणां न गोपजातिमत्त्वेन गोपीत्वं किन्तु अन्यथैवेतिनिरूपणं। सर्व्वेषामुपरि वर्त्त-मानमथुरादौ प्रेमसेवालाभेच्छया वासं कुर्य्यादितिकथनं। काशीविवरणं। वृन्दावन-विवरणकीर्त्तनञ्च।

No. 3138. प्रायश्चित्तनिरूपणं। Substance, country-made paper, 13 × 2 inches. Folia, 92. Lines, 5—6 on a page. Extent, 2,901 s'lokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágísa. Appearance, old. Prose and verse. Correct.

Práyaśchitta-nirúpaṇa. Definitions and explanations of the sins and offences which require expiations. By Bhavadeva Bhaṭṭa.

Beginning. ॐ नमो गणपतये।

अनादिभवसम्भूतपापप्रशमकारणं।
स्मरणं वासुदेवस्य यस्य तस्मै नमो नमः॥
मन्वादिस्मृतिमालोच्य सुविविच्य यथाक्रमं।
क्रियते भवदेवेन प्रायश्चित्तनिरूपणं॥

तत्र प्रायश्चित्ते निरूपणीये गुरुत्वात् पञ्चममहापातकप्रायश्चित्तनिरूपणपुरःसरमेव इतरप्रायश्चित्तनिरूपणे कर्त्तव्ये मन्वादिवचनक्रमानुरोधेन प्रथमं ब्रह्मबधप्रायश्चित्तमेव निरूप्यते।

End. याम्यं कृच्छ्रं समुद्दिष्टं मासे+श्रुतिपारगैः।
सर्व्वकामप्रदं ह्येतत् सर्व्वकल्मषनाशनं॥
स्वचापि पञ्च धेनवः। इति।

Colophon. इति नरभीभुजङ्गापरनामधेयभट्टश्रीभवदेवस्य कृतौ कृच्छ्रपरिच्छेदः समाप्तः। समाप्तश्चेदं पुस्तकं। शकाब्दाः १४०१।

विषयः। पञ्चमहापातकस्वरूपनिरूपणं। हननलक्षणादिविचारः। ब्रह्मघातकस्वरूपादिनिरूपणं। उपकारार्थमेव प्रवृत्तौ प्रमादतो मरणनिष्पत्तौ न बधदोषभागित्वमितिनिर्णयः। विनयाधानार्थं पुत्रभार्य्यादीनां दण्डकरणादौ दोषाभावादिकथनं। आततायिब्राह्मणबधे दोषाभावकथनं। आततायिनिरूपणादिकं। तदपवादकथनं। बधस्वरूपनिरूपणं। प्रायश्चित्तानुष्ठाने देशकालवयःशक्त्याद्यपेक्षाविवेचनं। कामतोऽकामतश्च भेदेन बधद्वैविध्यनिरूपणं। ब्रह्महत्यादीनां प्रायश्चित्तनिरूपणं। जलाग्निप्रवेशादिना मरणोद्यतस्य केनापि प्रतिबन्धकेन तत्राकृतार्थतायां प्रायश्चित्तकथनं। क्षत्रियादिबधप्रायश्चित्तकथनं। स्त्रीबधप्रायश्चित्तकथनं। तत्र गर्भिणीबधप्रायश्चित्तकथनं। व्यभिचारिणीबधप्रायश्चित्तकथनं। गोबधप्रायश्चित्तनिरूपणं। इतरप्राणिबधप्रायश्चित्तं। रहस्यकृतब्रह्मबधप्रायश्चित्तनिरूपणं। रहस्यप्रायश्चित्तलक्षणं। नानाविधरहस्यबधप्रायश्चित्तनिरूपणं। अभक्ष्यभक्षणप्रायश्चित्तनिरूपणं। तत्र सुरापानप्रायश्चित्तकथनं। सुराशब्दार्थादिनिरूपणं। पुनःसंस्कारविधिकथनञ्च। मूत्रपुरीषादिभक्षणप्रायश्चित्तकथनं। चण्डालोदकभाण्डस्पृष्टजलपानादिप्रायश्चित्तकथनं। चण्डालादिपरिग्रहवापीकूपतड़ागादिजलपानप्रायश्चित्तकथनं। आपदि रजकादिजलपानप्रायश्चित्तकथनं। अपेयक्षीरपानप्रायश्चित्तकथनं। अभक्ष्यभक्षणप्रायश्चित्तकथनं। ब्राह्मणादीनां शूद्राद्यन्नभोजनप्रायश्चित्तकथनं। शूद्रस्य अन्त्यजाद्यन्नभोजनप्रायश्चित्तकथनं। उच्छिष्टभोजनप्रायश्चित्तकथनं। सहभोजनप्रायश्चित्तकथनं। लशुनगृञ्जनादिभक्षणप्रायश्चित्तकथनं। निषिद्धमत्स्यमांसभक्षणप्रायश्चित्तकथनं। ब्रह्मचारिणोऽभक्ष्यादिभक्षणप्रायश्चित्तं। रहस्यकृतसुरापानादिप्रायश्चित्तकथनं। स्तेयशब्दार्थनिरूपणं। सुवर्णस्तेयादिप्रायश्चित्तनिरूपणं। धान्याद्यपहरणप्रायश्चित्तकथनं। रहस्यकृतसुवर्णस्तेयादिप्रायश्चित्तकथनं। अगम्यागमनप्रायश्चित्तनिरूपणं। तत्र गुर्व्वङ्गनागमनप्रायश्चित्तकथनं। गुर्व्वाङ्गनाशब्दार्थनिरूपणञ्च। स्त्र्यन्तराभिगमनप्रायश्चित्तकथनं। गुरुतल्पातिदेशप्रायश्चित्तकथनं। गवादितिर्य्यग्योनिगमनप्रायश्चित्तकथनं। अवकीर्णिप्रायश्चित्तकथनं। गुर्व्वङ्गनागमने रहस्यप्रायश्चित्तकथनं। संसर्गप्रायश्चित्तनिरूपणं। संसर्गप्रकारकथनं। पतितप्रतिग्रह-पतितान्नभोजन-पतितस्पृष्टान्नभोजनरूपसंसर्गप्रायश्चित्तकथनं। अस्पृश्यसंसर्गप्रायश्चित्तनिरूपणं। ब्राह्मणस्य अविक्रेयविक्रयप्रायश्चित्तकथनं। द्रव्यशुद्धिनिरूपणं।

No. 3139. लौकिकन्यायसङ्ग्रहः, प्रथमो भागः। Substance, country-made paper, 13 × 5 inches. Folia, 132. Lines, 5 on a page. Extent, 1,965 ślokas. Character, Nágara. Date, Sм., 1882. Place of deposit, S'ántipura, Kálidása Vidyávágíśa. Appearance, fresh. Prose. Generally correct.

Laukikanyáya-sañgraha. A collection of popular sayings used as logical illustrations, together with explanations and the stories and anecdotes which have given rise to them. By Raghunátha, son of Guláb-ráya Varmá, and disciple of Ráma-dayálu of the race of Nánaka.

Beginning. श्रीगणेशाय नमः।

यत्कीर्त्तिप्रभया सुशुक्लभुवने मायाप्रभावैः प्रभो-
र्नीलादेर्जनिता प्रतीतिरचला द्यौः संहता शोभते।
यच्छिष्योडुगणैः स मे गुरुरहो हार्द्दान्धकाराग्रहः
श्रीमद्रामदयालुरिन्दुरमलो मोदाय भूयात् सदा॥
नत्वा शम्भुं हरिं गौरीं विधिं ढुण्ढिञ्च भारतीं।
क्रियते रघुनाथेन लौकिकन्यायसङ्ग्रहः॥
लौकिकन्यायरत्नानामाकरे यत् प्रदर्शितं।
तस्य संक्षेप एवेह शीघ्रबोधाय दर्श्यते॥
न्यायार्थं विषयञ्चैवोदाहृतिञ्च यथामति।
वदिष्यामोऽत्र संक्षेपाद्विस्तरादपि च क्वचित्॥
प्रसङ्गादागतानान्तु न्यायानां तत्र विस्तृते।
अर्थमात्रं वदिष्यामः क्वचिदन्यामुदाहृतिं॥
प्रसङ्गदायाता अपि निगदविख्यातविषया
न ते व्याख्यास्यन्ते पुनरसकृदुक्ताश्च विरलाः।
पुनर्व्याख्यास्यन्ते विषयकथनादिप्रविततः
पुरा प्रोक्तान् कांश्चित् पुनरपि वदिष्यामि विषये॥
अर्थादर्थो न शब्दार्थ इत्याद्या हठसूक्तयः।
पूर्व्वैर्न्यायतया प्रोक्ता वदिष्यामस्ततस्तथा॥
उदाहृतिं वदिष्यामः प्रायो वेदान्तशास्त्रगां।
मीमांसान्यायगां काश्चित् काश्चिच्चापरशास्त्रगां॥

End. तुष्यतु दुर्ज्जन इति न्यायात् नित्यत्वापि व्यापारत्वापगमे प्रमाणप्रहत्त्वविच्छेद इत्यादयो दोषा वज्रलेपवदनिवार्य्या इति दिक्।

Colophon. इति सकलकल्याणगुणभूरुहारण्यश्रीनानकसद्वंशमौक्तिकश्रीरामदयालु-शिष्येण सोमवंशीयविन्दुरायकुलोत्तंसश्रीगुलाबरायवर्म्मात्मजेन उदासीनावस्थेन रघुनाथेन विरचिते लौकिकन्यायसङ्ग्रहे प्रमेयनिरूपणपरः पूर्व्वभागः समाप्तः। शुभमस्तु। संवत्। १८८२

विषयः। न्यायानां स्वरूपकथनपूर्व्वकं तेषामुदाहरणप्रदर्शनं। तत्र अनुबन्धनिरूपणा-दिकं। कण्ठचामीकरन्यायः। प्रसङ्गादधिकारिनिरूपणं। आत्मनिरूपणञ्च। लौकिकन्यायनिरू-पणं। तत्र पञ्चीकरणविवरणकीर्त्तनं। स्थूलारुन्धतीन्यायः। यत्परः शब्दः स शब्दार्थ इति न्यायः। अर्क्के चेन्मधु लभ्येत किमर्थं पर्व्वतं व्रजेदिति न्यायः। मज्जनोन्मज्जनन्यायः। कुशकाशावलम्बन-न्यायः। जलतुम्बिकान्यायः। पिञ्जरमुक्तपक्षिन्यायः। स्थूणानिखनन्यायः। सिंहावलोकन्यायः। परिषन्न्यायः। बकुहकाकहृन्यायः। वङ्गराजकपुरन्यायः। वरगोष्ठीन्यायः। स्वामिभृत्यन्यायः। मुञ्जादिषिकान्यायः। गड्डलिकाप्रवाहन्यायः। पटे पक्षिन्यायः। मल्लग्रामन्यायः। अहिच्छिपुच्छ इतिन्यायः। देवदत्तापुच्छन्यायः। प्रासादवासिन्यायः। कार्य्येण कारणसंप्रत्यय इतिन्यायः। कारणगुणक्रमन्यायः। पञ्जरचालनन्यायः। धर्म्मिकल्पनान्यायः। धर्म्मकल्पनान्यायः। सम्भवत्येक-वाक्यत्वे वाक्यभेदो न चेष्यते इतिन्यायः। भिक्षुपादप्रसारणन्यायः। सोपानारोहणन्यायः। ज्योतिर्न्यायः। साक्षात्प्रकृतावितिन्यायः। अध्यारोपापवादन्यायः। रेखागवयन्यायः। शाखा-चन्द्रन्यायः। प्रसङ्गादीश्वरनिरूपणं। तामसं परिवर्ज्जयेदितिन्यायः। व्रीहिबीजन्यायः। कीट-भृङ्गन्यायः। त्यज्या दुःखटिनीतिन्यायः। गणपतिन्यायः। येन उपक्रम्यते येन च उपसंह्रियते स वाक्यार्थ इतिन्यायः। सुन्दोपसुन्दन्यायः। अपन्थानं तु गच्छन्तं सोदरोऽपि विमुञ्चति इतिन्यायः। स्वपक्षहानिकर्तृत्वात् स्वकुलाङ्गारतां गत इतिन्यायः। एकसम्बित्सातोऽपरं प्रच्यवते इतिन्यायः। देवताधिकरणन्यायः। गुणोपसंहारन्यायः। यत् प्रायः श्रूयते यादृक् तत्तादृगवगम्यते इतिन्यायः। न हि निन्दा निन्दितुं प्रवर्त्तते अपि तु विधेयं स्तोतुमितिन्यायः। सर्व्वशास्त्रप्रत्ययमेकं कर्म्मेतिन्यायः। उपवासवासाद्वरं भिक्षेतिन्यायः। शालिसम्रद्धौ कोद्रव-नाशनन्यायः। कूपखानकन्यायः। निम्नगाप्रवाहन्यायः। यादृशो यक्षस्तादृशो बलिरितिन्यायः। शतपत्रपत्रशतभेदन्यायः। घटकुटीप्रपातन्यायः। वरघाताय कन्यावरणमितिन्यायः। नष्टाश्व-दग्धरथन्यायः। विधिनिषेधौ सति विशेषबाधे विशेषणमुपसंक्रामेत, इतिन्यायः। सावकाश-निरवकाशयोर्निरवकाशो बलीयानितिन्यायः। अहिकुण्डलन्यायः। प्रकाशाश्रयन्यायः। गुड़जिह्विकान्यायः। यत् कृतकं तदनित्यमितिन्यायः। उष्ट्रलगुड़न्यायः। न हि दृष्टे अनुपपन्नं नामेतिन्यायः। भक्षितेऽपि लशुने न शान्तो व्याधिरितिन्यायः। रज्जुसर्पन्यायः। वृक्ष-प्रकम्पनन्यायः। क्रिया हि विकल्प्यते न वस्त्वितिन्यायः। यः कारयति स करोत्येवेतिन्यायः। ज्ञानादेर्निष्कर्षवदुत्कर्षोऽप्यङ्गीकार्य्य इतिन्यायः। काकतालीयन्यायः। अजाकृपाणीयन्यायः। न हि भिक्षुको भिक्षुकमितिन्यायः। योजनप्राप्यायां कावेर्य्यां मल्लबन्धनन्यायः। अवश्या-पेक्षितानपेक्षितयोरितिन्यायः। कृताकृतप्रसङ्गी यो विधिः स नित्य इतिन्यायः। अनधीते

महाभाष्ये इतिन्यायः। फलवत्सहकारन्यायः। तदभिन्नाभिन्नस्य तदभिन्नत्वमितिन्यायः। लक्षणप्रमाणाभ्यां हि वस्तुसिद्धिरितिन्यायः। यद्दिवाहस्तङ्गीतगानमितिन्यायः। अन्धगजन्यायः। कूपमण्डूकन्यायः। चतुर्व्वेदविन्न्यायः। नृपनापितपुत्त्रन्यायः। स्वशिशुमपि चुम्बन्तमितिन्यायः। महिषी प्रसवोन्मुखीतिन्यायः। अन्धचटकन्यायः। घुणाक्षरन्यायः। पुत्त्रलिप्सया देवं भजन्त्या भर्त्ताऽपि नष्ट इतिन्यायः। वृद्धिमिष्टवतो मूलं विनष्टमितिन्यायः। चर्म्मतन्त्री महिषीं हन्तीतिन्यायः। मण्डूकप्लुतिन्यायः। सच्छिद्रघटाम्बुन्यायः। एकामसिद्धिं परिहरतो द्वितीया आपद्यते इतिन्यायः। उपपन्नधर्म्मा विकरोति हि धर्म्मिणमितिन्यायः। व्रणशोधनाय शस्त्रग्रहणमितिन्यायः। सर्व्वविशेषणं साधारणमितिन्यायः। सर्व्वं वाक्यं साधारणमितिन्यायः। वृद्धकुमारीवाक्यन्यायः। तिर्य्यगधिकरणन्यायः। अन्ते या मतिः सा गतिरितिन्यायः। आभाणकन्यायः। प्रसङ्गपठितन्यायः। ब्राह्मणश्रमणन्यायः। सूत्रशाटिकान्यायः। अजातपुत्त्रनामकरणन्यायः। जलानयनन्यायः। अग्न्यातपनन्यायः। इक्षुरसन्यायः। इक्षुविकारन्यायः। राजसं तामसञ्चेतिन्यायः। यः कुरुते स भुङ्क्ते इतिन्यायः। अश्मलोष्ट्रन्यायः। पाषाणेष्टिकान्यायः। बिल्वखल्वाटन्यायः। कोषपालन्यायः। विषभक्षणन्यायः। परशुग्रहणन्यायः। धटारोहणन्यायः। धर्म्माधर्म्मन्यायः। तप्तमाषकोद्धरणन्यायः। उदकनिमज्जनन्यायः। चौरापराधात् माण्डव्यनिग्रहन्यायः। काकदधिघातकन्यायः। तण्डुलन्यायः। नीरक्षीरन्यायः। विषवृक्षोऽपि संवर्द्ध्य स्वयं छेत्तुमसाम्प्रतमितिन्यायः। सन्दंशन्यायः। सुतजनिन्यतिन्यायः। सार्व्वजनीनतुल्यायव्ययन्यायः। पतन्तमनुधावतो बद्धोऽपि गत इतिन्यायः। श्यालशुनकन्यायः। यत्रोभयोः समो दोष इतिन्यायः। शते पञ्चाशदितिन्यायः। यादृशं मुखं तादृशं चपेटमितिन्यायः। मरणाद्वरो व्याधिरितिन्यायः। एकाकिनीप्रतिज्ञेतिन्यायः। न हि प्रत्यभिज्ञामात्रेण अर्थसिद्धिरितिन्यायः। रक्तपटन्यायः। न हि करकङ्कणदर्शनाय आदर्शापेक्षेतिन्यायः। प्रदीपन्यायः। भामतीन्यायः। वह्निन्यायः। कूर्म्माङ्गन्यायः। वातादिन्यायः। श्वादिन्यायः। अन्धपङ्गुन्यायः। लोहचुम्बकन्यायः। तुष्यतु दुर्ज्जन इतिन्यायः॥ इति प्रमेयनिरूपणन्यायाः। इति प्रथमखण्डस्य विवरणम्।

No. 3140. लौकिकन्यायसङ्ग्रहः, द्वितीयभागः। Substance, country-made paper, 13 × 5 inches. Folia, 75. Lines, 5 on a page. Extent, 1,017 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágísa. Appearance, fresh. Prose. Generally correct.

Laukika-nyáya-saṅgraha. A second part of the work described under the next preceding section. By the same author.

Beginning. नत्वा शम्भुं हरिं गौरीं विधिं ढुण्ढिञ्च भारतीं।
क्रियते रघुनाथेन लौकिकन्यायसङ्ग्रहः॥

अथ प्रमाणनिरूपणप्रचुरो द्वितीयो भाग आरभ्यते। अत्रैव च प्रसङ्गात् पूर्व्वोक्तार्थोऽपि दृढीक्रियते। यथा हि तरति शोकमात्मविदित्यादौ प्राचीनतार्किकमतमाश्रित्य अखिलपदार्थस्मरणाद्युगपदेव विशेष्ये विशेषणं तत्र विशेषणान्तरमितिन्यायेन सर्व्वपदार्थानामन्योऽन्यं क्रियाकर्म्मभावेन अन्वयरूपः शाब्दबोधः स्वीक्रियते, तदा खले कपोतन्यायोऽवतरति। यथाहुः, वृद्धा युवानः शिशवः कपोताः खले यथाऽमी युगपत्पतन्ति। तथैव सर्व्वे युगपत् पदार्थाः परस्परेणान्वयिनो भवन्ति—इति। अत्र वृद्धयुवशिशुभिः कपोतैरित्यादि।

End. यो ब्रह्मा यश्च विष्णुर्वसुतनुरपि यो यश्च गौर्य्यादिमूर्त्ति-
स्यात्माऽसौ सर्व्वजन्तोः श्रुतिशिखरगिरां यश्च तात्पर्य्यभूमिः।
यस्याबोधात् समस्तो व्रजति च विलयं यस्य बोधात् प्रपञ्च-
स्तं शुद्धं संप्रपद्ये शिवममरमजं शम्भुमीशानमीड्यं॥

Colophon. इति श्रीसाधुवृन्दवन्दितपादारविन्दवैराग्यादिरत्नाकरविद्वद्वरश्रीमद्रामदयालुशिष्येण सोमवंशीयविन्दुरायकुलोत्तंसश्रीसेवीदेव्याश्रितपादारविन्दश्रीगुलावरायवर्म्मात्मजेन उदासीनावस्थेन रघुनाथेन विरचितो लौकिकन्यायसङ्ग्रहः समाप्तः।

इति लौकिकन्यायसङ्ग्रहे उत्तरार्द्धं पूर्णं।

विषयः। खले कपोतन्यायः। विशेषणं विशेषेणेतिन्यायः। विशिष्टस्य वैशिष्ट्यमितिन्यायः। नाज्ञातविशेषणा विशिष्टबुद्धिः विशेष्यं संक्रामतीतिन्यायः। त्यजेदेककुलस्यार्थे इतिन्यायः। विषं मृत्युरितिन्यायः। लाङ्गलं जीवनमितिन्यायः। आयुर्घृतमितिन्यायः। दधिपयसि प्रत्यक्षो ज्वर इति न्यायः। अशोकवनिकान्यायः। पिष्टपेषणन्यायः। मृतमारणन्यायः। जलमन्थनन्यायः। काकदन्तपरीक्षान्यायः। गर्द्दभारामगणनान्यायः। स्थालीपुलाकन्यायः। सूचीकटाहन्यायः। यथासंख्यन्यायः। अवभक्षकन्यायः। वायुभक्षकन्यायः। कुम्भीधान्यन्यायः। ब्राह्मणपरिव्राजकन्यायः। ब्राह्मणवसिष्ठन्यायः। गोबलीवर्द्दन्यायः। करिबृंहितन्यायः। गजघटान्यायः। नीलेन्दीवरन्यायः। पर्व्वताधित्यकान्यायः। पर्व्वतोपत्यकान्यायः। वाजिमन्दुरान्यायः। मृगवागुरान्यायः। येन चाप्राप्ते यो विधिरारभ्यते स तस्य बाधको भवति इतिन्यायः। अश्मभूत्यन्यायः। अण्डकुक्कुटीन्यायः। नौनाविकन्यायः। न हि सुतीक्ष्णाप्यसिधारा स्वयमेव छेत्तुमाहितव्यापारा भवतीतिन्यायः। कौण्डिन्यन्यायः। पुरस्तादपवादा अनन्तरान् विधीन् बाधते नेतरानितिन्यायः। पूर्व्वमपवादा निविशन्ते पश्चादुत्सर्गा इतिन्यायः। प्रकल्प्यापवादविषयं पश्चादुत्सर्गोऽभिनिविशते—इतिन्यायः। यदर्था प्रवृत्तिः तदर्थः प्रतिषेध इतिन्यायः। उपजनिष्यमाणनिमित्तोऽप्यपवादो जातनिमित्तमप्युत्सर्गं बाधते इतिन्यायः। पूर्व्वात्परबलीयस्त्वन्यायः। स्थावरजङ्गमविषन्यायः। अनन्तरस्य विधिर्व्वा भवति प्रतिषेधो वेतिन्यायः। कृदभिहितो भावो द्रव्यवत् प्रकाशते इतिन्यायः। वीचितरङ्गन्यायः। कदम्बकुसुमन्यायः। सुन्दोपसुन्दन्यायः। मात्स्यन्यायः। शक्तिः सहकारिणीतिन्यायः। अत्र प्रसङ्गात् विधिस्वरूपादिविचारः। अत्यन्तं बलवन्तोऽपि पौरजान-

पदा जनाः। दुर्बलैरपि बाध्यन्ते पुरुषैः पार्थिवाश्रितैरितिन्यायः। रूढ़िर्योगमपहरतीतिन्यायः।
श्रुतयौगिकार्थलाभे सति अनन्वितरूढ्यर्थस्त्याज्य इतिन्यायः। प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य
प्राधान्यमितिन्यायः।भावप्रधानमाख्यातमितिन्यायः। इच्छेष्यमाणयोः समभिव्याहारे इष्यमाण-
स्यैव प्राधान्यमितिन्यायः। कामनागोचरत्वेन शब्दबोध एव शब्दसाधनतान्वय इतिन्यायः। शाब्दी
ह्याकाङ्क्षा शब्देनैव पूरणीयेतिन्यायः। न हि शाब्दमशाब्देनान्वेतीतिन्यायः। मत्स्यकण्ट-
कन्यायः। धान्यपललन्यायः। अर्द्धं त्यजति पण्डित इतिन्यायः। पदमप्यधिकाभावात् स्मारकात्
न विशिष्यत इतिन्यायः। ज्ञानधर्म्मिण्यभ्रान्तप्रकारे तु विपर्य्यय इति न्यायः। नागोष्ट्रपतिन्यायः।
उष्ट्रलगुड़न्यायः। पुष्टलगुड़न्यायः। जामात्रर्थं क्लिप्तस्य सूपादेरतिथ्युपकारकत्वमितिन्यायः।
तुलोन्नमनन्यायः। प्रधानमल्लनिर्वर्हणन्यायः। देहलीदीपन्यायः। काकाक्षिन्यायः। आषाढ़-
वातन्यायः। कैमुतिकन्यायः। दण्डापूपन्यायः। दण्डसर्पमारणन्यायः। वकबन्धनन्यायः। अन्ते
रण्डाविवाहश्चेदादावेव कुतो न स इतिन्यायः। ऋजुमार्गेण सिध्यतोऽर्थस्य वक्रेण साधनायोग
इति न्यायः। शिरोवेष्टनेन नासिकास्पर्श इतिन्यायः। अर्द्धजरतीन्यायः। अर्द्धवैशसन्यायः। सुभगा-
भिक्षुकन्यायः। एकत्र निर्णीतः शास्त्रार्थः अन्यत्रापि तथेतिन्यायः। कण्टकन्यायः। दग्धेन्धनवह्नि-
न्यायः। देवदत्तहन्तृहतन्यायः। तुष्यतु दुर्ज्जन इतिन्यायः। सर्व्वं कार्य्यं सकारणकमितिन्यायः।
यन्निष्टन्निमद्इतिन्यायः। उभयतः पाशरज्जुन्यायः। विशिष्टवृत्तेरितिन्यायः। गजभुक्तकपित्थन्यायः।
नारिकेलफलाम्बुन्यायः। अन्यभुक्तन्यायः। स्वश्वव्याघ्रन्यायः। इषुवेगक्षयन्यायः। चक्रभ्रमणन्यायः।
कारणनाशे कार्य्यनाशन्यायः। पटन्यायः। यावच्छिरस्तावच्छिरोव्यथेतिन्यायः। हस्तामलकन्यायः।
करस्थविल्वन्यायः। सति बोधे न जानातीतिन्यायः। दग्धरसनान्यायः। दग्धपटन्यायः।
चित्रपटन्यायः। चम्पकपटवासन्यायः। उत्पाटितदन्तनागन्यायः। अपसारिताग्निभूतलन्यायः।
चित्राङ्गनान्यायः। चितामृतन्यायः। चित्रानलन्यायः। अदग्धदहनन्यायः। आदावन्ते वेति-
न्यायः। ऊषरवृष्टिन्यायः। शवोद्वर्त्तनन्यायः। अन्धदर्पणन्यायः। श्वपुच्छोन्नामनन्यायः। अरण्य-
रोदनन्यायः। मूर्खसेवनन्यायः। समुद्रवृष्टिन्यायः। तालसर्पन्यायः। रोगिन्यायः। अश्वतरीगर्भ-
न्यायः। वृश्चिकीगर्भन्यायः किमज्ञानस्य दुष्करमितिन्यायः। व्याघ्रीक्षीरन्यायः। नहि विवाहान-
न्तरं वरपरीक्षा क्रियते इतिन्यायः। कृते कार्य्ये किं मुहूर्त्तप्रश्नेन इतिन्यायः। कूपन्यायः। भ्रमर-
न्यायः। चालनीन्यायः। मक्षिकान्यायः। जलौकोन्यायः। रासभरटितन्यायः। पूर्व्वाह्णच्छाया-
न्यायः। खलमैत्रीन्यायः। कुक्कुटध्वनिन्यायः। अपराह्णच्छायान्यायः। साधुमैत्रीन्यायः। गोक्षीरं
श्वदृतौ धृतमितिन्यायः। विधेयं हि सूयते वस्त्विति न्यायः। स्तनन्धयन्यायः। विवाहप्रवृत्तभृत्य-
न्यायः। कांस्यभोजिन्यायः। वैशेष्यात्तु तद्वाद इतिन्यायः। अन्धगोलाङ्गुलन्यायः। भूलिङ्गपक्षिन्यायः।
अन्धस्येवान्धलग्नस्य विनिपातः पदे पदे इतिन्यायः। प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति-
न्यायः। श्वः कर्त्तव्यमद्य कुर्व्वितिन्यायः। स्वकरकुचन्यायः। मृगभयेन शस्यानाश्रयणन्यायः। मूक-
भयेन कथात्यागन्यायः। एकदेशविकृतमनन्यवदितिन्यायः। स्फटिकलौहित्यन्यायः। आकाश-

परिच्छिन्नत्वन्यायः। देहाधीमुखत्वन्यायः। कौन्तेयराधेयन्यायः। राजपुत्रव्याधन्यायः। प्रयोजनमनुद्दिश्य न मन्दोऽपि प्रवर्त्तते इतिन्यायः। पिण्डं हित्वा करं लेढ़ीतिन्यायः। घटप्रदीपन्यायः। वस्तूनि मानान्यपेक्ष्य प्रयोजनानीतिन्यायः। बहूनामनुग्रहो न्याय्य इतिन्यायः। बहुच्छिद्रघटप्रदीपन्यायः। मूषानिक्तताम्रन्यायः। व्यञ्जकव्यङ्गन्यायः। दाहकदाह्यन्यायः। शैलूषीन्यायः। लोहाग्निन्यायः। वायुशैत्यौष्ण्यन्यायः। भूशैत्यौष्ण्यन्यायः। अहिमुक्त्वैवर्त्तन्यायः। अस्नेहदीपन्यायः। नदागमेऽपि दृश्यते इतिन्यायः। बध्यघातकन्यायः। खादकघातकन्यायः। प्रमाणवन्त्यदृष्टानि कल्प्यानि सुबहून्यपि इतिन्यायः। गले पादुकान्यायः। यस्याज्ञानं भ्रमस्तस्य भ्रातः सम्यक् च वेद स इतिन्यायः। तरतमभावापन्नमितिन्यायः। सन्दिग्धस्य सन्दिग्धं सप्रयोजनं चेत् विचारमर्हतीतिन्यायः। चिन्तामणिं परित्यज्य काचमणिग्रहणन्यायः। अभाण्डलाभन्यायः। स्वयंवरान्यायः। स्वप्ने मन्त्रलाभन्यायः। रथवड़वान्यायः। भच्छुन्यायः। भैरवन्यायः। वह्निधूमन्यायः। गोमहिषादिन्यायः। अहिनकुलन्यायः। रश्मिलवणादिन्यायः। तमःप्रकाशन्यायः। सिंहमृगन्यायः। गोमयपायसन्यायः। उपजीव्योपजीवकन्यायः। विपरीतं बलाबलमितिन्यायः। दानव्यालकटन्यायकीर्त्तनञ्च।

No. 3141. वेदान्तदीपः। Substance, country-made paper, 11 × 4⅓ inches. Folia, 109. Lines, 10—11 on a page. Extent, 4,067 ślokas. Character, Nágara. Date, Sm. 1889. Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, fresh. Prose. Correct.

Vedánta-dípa. A commentary on the Vedánta Sútras. By Rámánuja. This is an abridgment of an elaborate work of the author on the subject. The early work is entitled *S'ríbháshya*. It differs widely in many respects from the commentary of S'aṅkara Áchárya. Hall's Contributions, p. 95.

Beginning. श्रियः कान्तोऽनन्तो वरगुणगणैकास्पदवपु-
र्हताशेषावद्यः परमखपदो वाङ्मनसयोः।
अभूमिर्भूमिर्यो नतजनदृशामादिपुरुषो
मनस्तत्पादाब्जे परिचरणसक्तं भवतु मे॥
प्रणम्य शिरसा व्यासान् तदादिष्टेन वर्त्मना।
ब्रह्मसूत्रपदान्तःस्थवेदान्तार्थः प्रकाश्यते॥

अत्रेयं वेदविदां प्रक्रिया। अचिद्वस्तु स्वरूपतः स्वभावतश्च अत्यन्तविलक्षणः तदात्मभूतश्चेतनः प्रत्यगात्मा तस्माद्बद्धात् मुक्तात् नित्याच्च निखिलहेयप्रत्यनीकतया कल्याणैकताननतया च सर्व्वा-

वस्तुचिदचिद्व्यापकतया नियन्तृतया शेषितया च अत्यन्तविलक्षणः परमात्मा । यदुक्तमित्यादि ।

End. सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च इति शब्दादेव कदाचिदपि नावर्त्तयतीत्यवगम्यते । सूत्राहत्तिस्तु शास्त्रपरिसमाप्तिं द्योतयतीति सर्व्वं समञ्जसं । शास्त्रञ्च समाप्तं ।

Colophon. इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः । संवत् १८८९ ।

विषयः । स्वकृते श्रीभाष्ये श्रुतियुक्तिभ्यां विस्तरतो ब्रह्मसूत्रार्थं प्रदर्श्य ततोऽल्पाक्षरतया सूत्रान्तर्गतन्यायप्रदर्शनमुखेन वेदान्तसूत्रव्याख्यानं ।

No. 3142. वेदान्तसारः । Substance, country-made paper, 12 × 5 inches. Folia, 51. Lines, 11 on a page. Extent, 2,013 ślokas. Character, Nágara. Date, Sm. 1889. Place of deposit, S'ántipura, Kálidása Vidyávágis'a; another copy at Barhampur with Bábu Rádhikáprasád Sena. Appearance, fresh. Verse. Correct.

Vedántasára. A metrical paraphrase of the Vedánta Sútras. The colophon of this MS. attributes the work to Rámánuja himself, but the salutation at the beginning clearly shows that it owes its composition to a disciple of that author. It is confined to an exposition of the Sútras. It is distinct from Sadánanda's work which is the most popular in Bengal.

Beginning. यो नित्यमच्युतपदाम्बुजयुग्मरुक्म-
व्यामोहितस्तदितराणि तृणाय मेने ।
अस्मद्गुरोर्भगवतोऽस्य दयैकसिन्धो-
रामानुजस्य चरणौ शरणं प्रपद्ये ॥
समस्तचिदचिद्वस्तुशरीरायाखिलात्मने ।
श्रीमते निर्म्मलानन्दोदन्वते विष्णवे नमः ॥

श्रीमत्परमहंसपुरुषप्रसादेन वेदान्तसारः समुद्ध्रियते । अथातो ब्रह्मजिज्ञासा । अथ शब्द आनन्तर्य्ये वर्त्तते अतः शब्दशिरस्कत्वात् अथशब्दः पूर्व्ववृत्तस्य हेतुभावे पूर्व्ववृत्तञ्च कर्म्मज्ञानमिति ज्ञायते । इत्यादि ।

End. आविर्भूतापहतपाप्मत्वादिगुणोऽनवधिकातिशयानन्दं परं ब्रह्म अनुभवति न स पुनरावर्त्तते इति निश्चीयते । इति सर्व्वं समञ्जसं ।

Colophon. इति श्रीमद्रामानुजाचार्य्यविरचिते वेदान्तसारे चतुर्थाध्यायस्य चतुर्थः पादः । ग्रन्थोऽपि समाप्तः संवत् १८८९ । मार्गशीर्ष ।

विषयः। श्रीभाष्यार्थसारमाकलय्य मुग्धबोधार्थमतिसंक्षेपेण ब्रह्मसूत्रार्थप्रदर्शनं।
(ग्रन्थोऽयं केनचिद्रामानुजशिष्येण सङ्कलितः।)

No. 3143. सरस्वतीकण्ठाभरणम्। Substance, country-made paper, 13½ × 5 inches. Folia, 265. Lines, 9 on a page. Extent, 8,316 ślokas. Character, Nágara. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágís'a. Appearance, fresh. Prose and verse. Correct.

Sarasvatíkaṇṭhábharaṇa. An elaborate treatise on rhetoric. By Mahárájá Bhoja Deva.

Beginning. श्रीगणेशाय नमः।

ध्वनिर्वर्णाः पदं वाक्यमित्यास्पदचतुष्टयं।
यस्याः सूक्ष्मादिभेदेन वाग्देवीं तामुपास्महे॥
निर्दोषं गुणवत्काव्यमलङ्कारैरलङ्कृतं।
रसान्वितं कविः कुर्व्वन् कीर्त्तिं प्रीतिञ्च विन्दति॥ इत्यादि।

End. प्रत्याय्यते 'धिनोति न' इति त्वयमेव पक्षः श्रेयानिति ग्रन्थकारेण स्वाभिप्रायः प्रकाश्यते।

इति निगदितभङ्ग्यानङ्गसर्व्वस्वमेतद्-
विविधमपि मनोभिर्भावयन्तोऽप्यखेदं।
तदनुभवसमुत्थानन्दसम्मीलिताक्षाः
परिषदि परितोषं हन्त सन्तः प्रयान्तु॥
यावन्मूर्द्ध्नि हिमांशुकन्दलभृति स्वर्वाहिनी धूर्ज्जटे-
र्यावद्वक्षसि कौस्तुभस्तवकितं लक्ष्मी मुरद्वेषिणः।
यावच्चित्तभुवस्त्रिलोकविजयप्रौढं धनुः कौसुमं
भूयात्तावदियं कृतिः कृतधियां कर्णावतंसोत्पलं॥

Colophon. इति महाराजाधिराजश्रीभोजदेवविरचिते सरस्वतीकण्ठाभरणालङ्कारे रसविवेचनो नाम पञ्चमः परिच्छेदः। समाप्तश्चायं ग्रन्थः।

विषयः। १प्रथमे परिच्छेदे,—काव्यलक्षणं। दोषकथनं। पददोषविभागः। तत्र असाधु-अप्रयुक्त-कष्ट अनर्थक-अन्यार्थक-अपुष्टार्थ-असमर्थ-अप्रतीत-क्लिष्ट-गूढ़-नेयार्थ-सन्दिग्ध-विरुद्ध-अप्रयोजक-देश्य-ग्राम्यरूपषोड़शविधपददोषलक्षणादिकीर्त्तनं। वाक्यदोषविभागः। तत्र शब्द-हीनक्रमभ्रष्ट-विसन्धि-पुनरुक्ति-व्याकीर्ण-सङ्कीर्ण-अपदवाक्यगर्भित-भिन्नलिङ्ग-भिन्नवचन-न्यूनोपम अधिकोपम-भग्नच्छन्दो-भग्नयति-अशरीर-अरीति-नेयार्थ-असमस्त-अनिर्व्वूढ़-निरलङ्कारलक्षणा-

दिकथनं । वाक्यार्थदोषविभागः । तत्र अपार्थ-व्यर्थ-एकार्थ-ससंशय-अपक्रम-खिन्न-अतिमात्र-परुष-विरस-हीनोपम-अधिकोपम-असदृशोपम-अप्रसिद्धोपम--निरलङ्कार--विरुद्धादिलक्षणं । चतुर्विंशतिविधशब्दार्थगुणविभागः । तत्र श्लेष-प्रसाद-समता-माधुर्य्य-सुकुमारता-अर्थव्यक्ति-कान्ति उदारता-उदात्तता-ओज-और्ज्जित्य-प्रेयः-सुशब्दता-समाधि-सौक्ष्म्य-गाम्भीर्य्य विस्तर-संक्षेप-सम्मितत्व-भाविकत्व-गति-रीति-उक्ति-प्रौढ़ीनां लक्षणादिकथनं । वाक्यार्थदोषविभागः । तत्र श्लेषादि-चतुर्व्विंशतिविधानां लक्षणादिकथनं । असाधु-कष्टप्रभृतिपददोषाणां क्वचिद्गुणत्वकथनं । एवं शब्दहीन-क्रमभ्रष्टादिवाक्यदोषाणामपार्थादिवाक्यार्थदोषाणाञ्च क्वचिददोषत्वं क्वचन गुणत्वकथनञ्च । गुणानामुपादेयतादिनिरूपणं ।

२ये परिच्छेदे,—शब्दालङ्कारलक्षणं । तद्विभागकथनञ्च । तत्र जातिलक्षणं । भाषाविभागनियोगादिकथनं । शुद्धा संस्कृता जातिः । शुद्धा प्राकृता । शुद्धा मागधी । शुद्धा पैशाची । शुद्धा शौरसेनी । शुद्धा अपभ्रष्टा । संस्कृतप्राकृतयोः साधारणी । संस्कृतपैशाच्याः साधारणी । मिश्रा । सङ्कीर्णा । असाधारणा । अपभ्रष्टा च । गतिलक्षणं । गद्यपद्येषु द्रुतविलम्बितादिषु गतिभेदनिरूपणं । रीतिलक्षणं । तत्र वैदर्भी, पाञ्चाली, गौड़ी, आवन्तिका, लाटी, मागधी च । वृत्तिलक्षणं । तत्र कैशिकी, आरभटी, भारती, सात्त्वती, मध्यमकैशिकी, मध्यमारभटी च । छायालक्षणं । तत्र लोकोक्तिच्छाया, छेकोक्तिः, अर्भकोक्तिः । उन्मत्तोक्तिः, प्रौढोक्तिः, मत्तोक्तिश्च । मुद्रालक्षणं । तत्र पदमुद्रा, वाक्यमुद्रा, विभक्तिमुद्रा, वचनमुद्रा, समुच्चयमुद्रा, संवृतिमुद्रा च । उक्तिलक्षणं । तत्र विधिः, निषेधः, अधिकारः, विकल्पः, नियमः, परिसंख्या च । युक्तिलक्षणं । तत्र पदयुक्तिः, पदार्थः, वाक्यं, वाक्यार्थः, प्रकरणविषया प्रबन्धविषया च । भणितिलक्षणं । तत्र सम्भवा, असम्भवा, विशिष्टा, संवृतिः, कल्पना च । गुम्फनालक्षणं । तत्र शब्दकृता, अर्थकृता, क्रमकृता, पर्य्यायकृता, पदकृता, वाक्यकृता च । शय्यालक्षणं । तत्र प्रक्रान्तघटना, अप्रक्रान्तघटना, अतिक्रान्तघटना, पदघटना, वाक्यघटना, प्रकीर्णघटना, गौणीमुख्यालक्षणादीनाञ्चात्रैवान्तर्भाव इति निरूपणं । पठितिलक्षणं । तत्र काकु, अभिनयादिभिश्च । यमकलक्षणं । तत्र महायमकादिभेदकथनं । श्लेषलक्षणं । तत्र प्रकृतौ, वर्णे, पदे, प्रत्यये, भाषासु च । अनुप्रासलक्षणं । तत्र श्रुत्यनुप्रासादिभेदाः । वृत्त्यनुप्रासलक्षणं । तत्र, कर्णाटी, कौन्तली, कौङ्की, कौङ्कणी, वाणवासिका, द्राविड़ी, माथुरी, मात्सी, मागधी, ताम्रलिप्तिका, औड्री, पौण्ड्री, च । अन्यमतेन गम्भीरादिद्वादशविधवृत्त्यनुप्रासभेदकथनं । स्तवकवदादिद्वादशविधवर्णानुप्रासकथनं । मसृणादिद्वादशविधपदानुप्रासकथनं । नामद्विरुक्त्यनुप्रासभेदनिरूपणं । लाट-चक्रवालाद्यनुप्रासप्रभेदकीर्त्तनञ्च । चित्रलक्षणं । तत्र चतुर्व्यञ्जनं, त्रिव्यञ्जनं, द्विव्यञ्जनं, एकव्यञ्जनं, क्रमव्यञ्जनं । षड्जादिस्वरव्यञ्जनं । निष्कण्ठ्यादिह्रस्वदीर्घैकस्वरादि, अष्टदलं, चक्रबन्धः षोड़शदलादि, गतप्रत्यागतादि, भाषान्तरं, तुरगपदं, अर्द्धभ्रमणं, सर्व्वतोभद्रं, शृङ्गाटकादिबन्धः, विविड़ितबन्धः, व्योमबन्धः, मारयन्त्रबन्धः, एकाक्षरमुरजादिबन्धः, पादगोमूत्रिकादि, गोमूत्रि-

काधेनुः, शतधेन्वादिकञ्च। वाकोवाक्यलक्षणं। तत्र ऋजूक्तिः, वक्रोक्तिः, वैयात्योक्तिः, ग्रढ़ोक्तिः प्रश्नोत्तरोक्ति, चित्रोक्तिश्च। प्रहेलिकानिरूपणं। तत्र च्युताक्षरा-दत्ताक्षरा-विन्दुमतीप्रभृत्यष्टादशविधभेदकथनञ्च। अध्येयलक्षणं। एतत्प्रपञ्चकथनञ्च। श्रव्यलक्षणं। तत्र आशीः, नान्दी, नमस्कारः, वस्तुनिर्द्देशः, आक्षिप्तिका, ध्रुवा च। प्रेक्षणलक्षणं। तत्र लास्यं, ताण्डवं, छलिकं, शम्पा, हल्लीसकं, रासं, आङ्गिकादिषड्विधाभिनयनिरूपणञ्च।

इति शब्दालङ्कारनिरूपणम्।

३ये परिच्छेदे,—अर्थालङ्कारनिरूपणं। जात्यलङ्कारलक्षणं। तत्र संस्थानादिद्वादशभेदकथनं। विभावनालङ्कारः। कारणान्तर-विचित्रादिपञ्चविधभेदकथनं। हेत्वलङ्कारः। तत्र कारकहेतवः, ज्ञापकहेतुः, इत्थम्भूतादिलक्षणः, भावलक्षणः, प्रागभावादिहेतवः, विदूरकार्य्यहेतुः, सहज-कार्य्यान्तरज-युक्त-नयुक्त-व्यधिकरणादिहेतवश्च। अहेत्वलङ्कारः। तत्र वस्तु-शक्ति-स्वभावादिहानिहेतुना। कारणमालालङ्कारस्यात्रैवान्तर्भावकथनञ्च। सूक्ष्मालङ्कारः। तत्र इङ्गिताकारादिभिः प्रतीयमानेषु भेदकथनं। उत्तरालङ्कारः। तत्र धर्म्म-धर्म्मि-विशेषसामान्यादिषु। विरोधालङ्कारः। तत्रासङ्गति-प्रत्यनीकाधिक-विषमरूपभेदकथनञ्च। सम्भवालङ्कारः। तत्र विधिनिषेधादिविषयभेदकथनं। अन्योऽन्यालङ्कारः। तत्र अन्योऽन्यचूड़िका-भ्रान्तिप्रभृतिप्रभेदकथनञ्च। परिवृत्त्यलङ्कारः। तत्र व्यत्ययवत्यादिभेदकथनञ्च। निदर्शनालङ्कारः। तत्र ऋजु-वक्र-पूर्व्वोत्तरसमरूपभेदकथनं। भेदालङ्कारः। तत्र स्वजातिव्यतिरेकाद्यष्टविधभेदकथनं। समाहितालङ्कारः। तत्र आकस्मिक-दैवादैवभेदकथनं। भ्रान्त्यलङ्कारः। तत्र तत्त्वे अतत्त्वरूपा, अतत्त्वे तत्त्वरूपाद्येकादशविधभेदकथनं। वितर्कालङ्कारः। तत्र निर्णयान्तादित्रिविधभेदकथनं। मीलितालङ्कारः। तत्र पिहित-तद्गुणादिचतुर्व्विधभेदकथनं। स्मरणालङ्कारः। तत्र सादृश्यादृष्टादिषु। भावालङ्कारः। तत्र सोद्भेदनिरुद्भेदादिसप्तविधभेदकथनं। प्रत्यक्षालङ्कारः। अनुमानालङ्कारः। तत्र पूर्व्ववदादिभेदाः। आगमालङ्कारः। उपमानालङ्कारः। अत्राभिनयालेख्यमुद्रा प्रतिविम्बानामन्तर्भावकथनं। अर्थापत्त्यलङ्कारः। अभावालङ्कारः। एतत्प्रपञ्चकथनञ्च।

४र्थे परिच्छेदे,—शब्दार्थालङ्कारनिरूपणं। उपमालङ्कारः। अत्र विपर्य्यासोपमोत्पाद्योपादिपञ्चविंशतिविधभेदकथनं। रूपकालङ्कारः। अत्र समस्तव्यस्तादिद्वाविंशतिविधभेदकथनं। साम्यालङ्कारः। तत्र दृष्टान्तोक्ति-प्रपञ्चोक्तिप्रपञ्चनिरूपणञ्च। संशयालङ्कारः। वितर्कोक्तिप्रभृतीनामत्रान्तर्भावकथनं। अपह्नुत्यलङ्कारः। समाध्यलङ्कारः। तत्र निरुद्भेदसोद्भेदादिपञ्चविधभेदकथनं। समासोक्त्यलङ्कारः। तत्र श्लाघ्यादिनवविधभेदकथनं। उत्प्रेक्षालङ्कारः। तत्र द्रव्योत्प्रेक्षादिषड्विधभेदकथनं। अप्रस्तुतप्रशंसालङ्कारः। तुल्ययोगितालङ्कारः। तत्र स्तुत्यर्थादिभेदकथनञ्च। लेशालङ्कारः। तत्र गुणस्य दोषीभावे दोषस्य च गुणीभावादौ। सहोक्त्यलङ्कारः। समुच्चयालङ्कारः। तत्र क्रियासमुच्चयादिसप्तविधभेदकथनं। आक्षेपालङ्कारः। तत्र अनुकूलादि-

प्रपञ्चप्रपञ्चनं। अर्थान्तरन्यासालङ्कारः। तत्र प्रतीकादिषड्विधभेदकथनं। विशेषोक्त्यलङ्कारः। तत्र जातिक्रियादिवैकल्येषु। परिकरालङ्कारः। तत्र क्रियापरिकरादिषोड़शविधभेदकथनं। एकावल्यलङ्कारस्य अत्रान्तर्भावकथनञ्च। दीपकालङ्कारः। तत्र सम्पुटरसनाचक्रवालादि-षोड़शभेदकथनं। क्रमालङ्कारः। तत्र शब्दपरिपाट्यादिचतुर्व्विधभेदकथनं। पर्य्यायालङ्कारः। तत्र निराकाङ्क्षादिभेदकथनं। अतिशयोक्त्यलङ्कारः। अभावातिशयप्रभावातिशयाद्यष्टविध-भेदकथनं। भाविकालङ्कारः। तत्र स्वाभिप्रायोद्भेदादिषड्विधभेदकथनं। संसृष्ट्यलङ्कारः। एतत्प्रपञ्चप्रपञ्चनञ्च।

५मे परिच्छेदे, रसस्वरूपनिरूपणादिकं। सरसवाक्यं। कविशिक्षार्थं चतुर्व्विंशतिविधर-सान्वयविभूतिनिरूपणं। रसलक्षणं। स्थायिभावादीनां लक्षणं। रसनिष्पत्तिः। रसपोषकाः। रसाभास-प्रशम-शेष-विशेष-परिशेष-जन्म-विप्रलम्भ-पूर्व्वराग–मान–प्रवास–करुण–विप्रलम्भानां लक्षणादिकं। सम्भोगलक्षणादिकं। प्रेमपोषकाः। द्वादशनायकाः। प्रतिनायकोपनायकादीनां लक्षणं। उत्तमनायकलक्षणं। मुग्धादिनायिकाभेदाः। खण्डिताकलहान्तरितादिलक्षणं। पीठ-मर्द्दादीनि चीनपात्राणि। पाकविभागाः। नीलीकुसुम्भादिरागविभागादिनिरूपणं। प्रबन्ध-सन्धिनिरूपणं। उत्तमकाव्ये वर्णनीयानि। रतिलक्षणं। प्रीतिलक्षणं। रसभावतानिरूपणं। रसानुबन्धः। रतिहास-शोकादिरूपेण रसपोषणजननादिनिरूपणं। रतिहासादीनां लक्षणं। सञ्चारि-व्यभिचारिरूपेण रसस्य अनुबन्धानुगम-जन्म-पुष्टि-प्रकर्ष-सङ्कर-शेषाद्यवस्थानिरूपणं। तेषां प्रत्येकं लक्षणादिकथनञ्च। रसस्य द्वादशभेदाः। तत्र शृङ्गाररसः। वीररसः। करुणः। रौद्रः। अद्भुतः। भयानकः। वीभत्सः। हास्यरसः। प्रेयोरसः। शान्तरसः। उदात्तरसः। उद्धत-रसः। रतेर्नैसर्गिक्यादिसप्तविधभेदकथनं। एवं प्रीतेरपि ज्ञेयम्। युद्धवीरादित्रिविधभेद-कथनं। क्रोधस्य भीमादिचतुर्व्विंशतिभेदनिरूपणं। तत्र ललित-दुःखोत्पीड़-राजनिन्दोत्प्रासानां निरूपणञ्च। स्मितहसितादिनिरूपणं। स्वप्न-मरण-शमानां लक्षणं। रसाश्रय-विषय-ज्ञान-संस्का-राणां त्रैविध्यनिरूपणं। उद्दीपनविभावाः। सञ्चारिभावाः। लीला। विलासः। विच्छित्तिः। विभ्रमः। किलकिञ्चितं। मोट्टा(ट्टा)यितं। कुट्टमितं। विब्बोकः। ललितं। विहृतं। क्रीड़ितं। केलिः। हेला। हावः। भावः। व्याजः। विस्रम्भभाषणं। चाटु। प्रेमाभिसन्धानं। परिहासः। कुतूहलं। चकितञ्च। विप्रलम्भशृङ्गारनिरूपणं। सम्भोगशृङ्गारप्रपञ्चप्रपञ्चनं। विहरण-विमर्श बहुमान-इङ्गित दूतप्रेषण प्रश्न-लेखविधान-लेखवाचन-माध्यम दोहदैः प्रेमपरीक्षाकीर्त्तनं। प्रगल्भादीनां चेष्टितादिवर्णनं। प्रथमानुरागायाः चेष्टितादिवर्णनं। मानप्रवासकरुणेषु विरुद्ध-निषिद्धादिकथनं। अभ्यवहारानुभवार्थादिनिरूपणं। प्रथमानुरागादित्यादौ समासष्टत्यादि-विवेचनं। प्रवासादौ विप्रतिपत्तिखण्डनं। शक्तिविचारः। कामिनीनां विनोदनानि, तत्र कुन्द-चतुर्थी-सुवसन्तक-मदनोत्सव-चूतभञ्जिका-पुष्पावचायिका-क्रीड़ाकदम्बयुद्धः--कृत्रिमविवाहा-दिक्रीड़ा-शक्रार्चा-कौमुदीमहोत्सव-दीपोत्सव-जलक्रीड़ाप्रेक्षा-द्यूत-मधुपानादिवर्णनञ्च। चक्षुः-

प्रीति-मनःसङ्ग-प्रलाप-जागरादिस्मरदशानिरूपणं। नायकप्रतिनायकादीनां लक्षणं। धीरोद्धत धीरललितादीनां लक्षणं। शठधृष्टादिनायकानां लक्षणं। मुग्धादिनायिकालक्षणं। खण्डिता कलहान्तरितादीनां लक्षणं। हीनपात्रेषु शङ्कर-लल्लक-पीठमर्द्दविदूषकादीनां लक्षणं। पताकादिनिरूपणं। स्त्रिकापाकादिनिरूपणं। नानालङ्कारसंसृष्टिकथनं। रसालङ्कारसङ्करनिरूपणं। लक्षणादिनिरूपणं। प्ररोचनाप्रस्तावनादिभेदनिरूपणं। वीथ्यादिनिरूपणं। प्रबन्ध वर्णनीयनिरूपणञ्च।

No. 3144. श्रीभाष्यं वा शारीरकमीमांसाभाष्यं। Substance, country-made paper, 11 × 5 inches. Folia, 309. Lines, 11 on a page. Extent, 11,434 ślokas. Character, Nágara. Date, Sm., 1889. Place of deposit, S'ántipura, Kálidása Vidyávágíśa. Appearance, fresh. Prose. Correct.

S'ríbháshya. A commentary on the Vedánta aphorisms of Vyása. By Rámánuja. The object of this work is to establish the Visishṭádvaita theory. An edition of this work is now being printed by the Asiatic Society; and an abridgment of it has been noticed under No. 3142, (*supra*, p. 222).

Beginning. श्रीमते रामानुजाय नमः।

अखिलभुवनजन्मस्थेमभङ्गादिलीले
विनतविविधभूतव्रातरक्षैकदीक्षे।
श्रुतिशिरसि विदीप्ते ब्रह्मणि श्रीनिवासे
भवतु मम परस्मिन् शेमुषी भक्तिरूपा॥
पाराशर्य्यवचःसुधामुपनिषद्दुग्धाब्धिमध्योद्धृतां
संसाराग्निविदीपनव्यपगतप्राणात्मसंजीवनीं।
पूर्व्वाचार्य्यसुरक्षितां बहुमतिव्याघातदूरस्थिता-
मानीतान्तु निजाक्षरैः सुमनसो भौमाः पिबन्त्वन्वहं॥

भगवद्बोधायनकृतां विस्तीर्णां ब्रह्मसूत्रवृत्तिं पूर्व्वाचार्य्याः संचिक्षिपुः, तन्मतानुसारेण सूत्राक्षराणि व्याख्यायन्ते। अथातो ब्रह्मजिज्ञासा। अत्रायमथशब्द आनन्तर्य्ये भवति। इत्यादि—

End. वासुदेवः सर्व्वमिति स महात्मा सुदुर्लभ इति सूत्राभ्यासः शास्त्रपरिसमाप्तिं द्योतयतीति सर्व्वं समञ्जसं।

Colophon. इति श्रीभगवद्रामानुजाचार्य्यविरचिते शारीरकमीमांसाभाष्ये चतुर्थाध्यायस्य चतुर्थः पादः समाप्तः।

अविस्मृतास्तु गम्भीरा रामानुजमुनेर्गिरः।
दर्शयन्तु प्रसादेन स्वं भावमखिलं दृढ़॥
संवत् १८८९। पौष।

विषयः। ब्रह्मसूत्रव्याख्यानमुखेन विशिष्टाद्वैतत्वोपपादनं। अद्वैतवादादिनिरसनञ्च।

No. 3145. आनन्दमन्दाकिनी। Substance, country-made paper, 12 × 4 inches. Folia, 16. Lines, 8 on a page. Extent, 438 ślokas. Character, Nágara. Date, ? Place, of deposit, S'ántipura, Kálidása Vidyávágíśa. Appearance, new. Verse. Correct.

A'nandamandákiní. A hymn in praise of Kṛishṇa, in course of which his various attributes are eulogised. By Madhusúdana Sarasvatí, disciple of S'rídhara Sarasvatí. Madhusúdana flourished during the reign of Akbar.

Beginning. वाग्देवीचतुराम्यपञ्चवदना नित्यं मदस्याननोऽ-
प्युच्चैर्यंच जड़ात्मतामुपगताः केऽन्ये वराकाः सुराः।
मर्त्याः स्वल्पधियः कथं नु कुशलास्तत्राप्यहं प्रज्ञया
हीनः किं करवाणि तां व्रजकुलोत्तंसप्रशंसां तव॥
इत्यादि।

End ये पाण्डित्यकवित्वसून्नुधरणीधर्म्मार्थकामानिमा-
नीशित्वेन्द्रपदाग्निमीच्चमथवा वाञ्छन्ति भक्तिं हरौ।
सम्भूतां मधुसूदनस्य पदतः सन्ता भजन्त्वादरा-
त्ते संसारदवाग्निदाहशमनीमानन्दमन्दाकिनीं॥

Colophon. इति श्रीमत्परमहंसपरिव्राजकाचार्य्यश्रीधरसरस्वतीशिष्यश्रीमन्नन्दनन्दनपदद्वन्द्वसमुद्यन्नखचन्द्रचन्द्रिकाचयपानमत्तचित्तचकोरश्रीमधुसूदनसरस्वतीविरचिता आनन्दमन्दाकिनी समाप्ता।

विषयः। स्तोत्रव्याजेन श्रीकृष्णस्य रूपलीलामहिमादिवर्णनं।

No. 3146. वेदान्तस्यमन्तकः। Substance, country-made paper, 11 × 4 inches. Folia, 50. Lines, 5 on a page. Extent, 613 ślokas. Character. Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávagíśa. Appearance, new. Prose. Correct.

Vedánta-syamantaka. The elements of the Vedánta doctrine, in six chapters, the first treating of proof; the 2nd of the provable; the 3rd created beings; 4th, Nature. 5th and 6th, Time. By Rádhá-dámodara. Hall's Contributions, p. 103.

Beginning. सनातनं रूपमिहोपदर्शयन्
आनन्दसिन्धुं परितः प्रवर्द्धयन् ।
अन्तस्तमस्तोमहरः स राजतां
चैतन्यरूपो विधुरद्भुतोदयः ॥

प्रमाणैर्विना प्रमेयसिद्धिर्न इत्यतस्तानि तावत् निरूप्यन्ते। तत्र प्रत्यक्षमेकञ्चार्व्वाकः। इत्यादि।

End. तदेवमेतत्पञ्चकविवेकी वर्णितसाधनसम्पत्तिमान् विशुद्धः श्रीहरिपदमुपलभ्य तत्रैव सर्व्वदा दीव्यतीति ॥

नित्यं निवसतु हृदये चैतन्यात्मा मुरारिर्नः ।
निरवद्यो निर्वृतिमान् गजपतिरनुकम्पया यस्य ॥
राधादिदामोदरनाम बिभ्रता
विप्रेण वेदान्तमयः स्यमन्तकः ।
श्रीराधिकायै विनिवेदितो मया
तस्याः प्रमोदं स तनोतु सर्व्वदा ॥

Colophon. इति श्रीवेदान्तस्यमन्तके षष्ठः किरणः। समाप्तश्चायं ग्रन्थः।

विषयः। १मे किरणे,—प्रमाणनिरूपणं। तत्र प्रत्यक्षानुमानोपमाशब्दार्थापत्त्यनुपलब्धि-तिह्यसम्भवरूपचार्व्वाकादिपरिगृहीतप्रमाणाष्टकलक्षणं। प्रत्यक्षवादखण्डनं। उपमानार्थापत्त्या-दीनां प्रत्यक्षादिप्रमाणत्रितये अन्तर्भावनिरूपणं। शब्दप्रमाणस्य श्रेष्ठत्वकथनपूर्व्वकं प्रत्यक्षानु-मानयोः क्वचित् सव्यभिचारत्वप्रदर्शनञ्च।

२ये किरणे,—प्रमेयनिरूपणं तत्र ईश्वरलक्षणादिकं। स च सार्व्वज्ञ्यादिगुणवान् पुरुषोत्तम इति निरूपणं। परमैश्वर्य्यञ्च हरेरेव, रुद्रादिषु श्रूयमानमीश्वरत्वन्तु राजसेवकेषु राजत्ववदिति संस्थापनं। नारायणशब्दः खलु श्रीपतेरेव संज्ञेतिनिरूपणं। विधिरुद्रयोरुत्पत्तिमत्त्वादिना जीवत्वकथनं। नारायणस्य जगदुपादाननिमित्तत्वकथनं। तस्य सच्चिदानन्दविग्रहत्वादि-निरूपणञ्च। वक्ष्यमाणतेव भगवतो लक्ष्मीरूपशक्तियुक्तत्वनिरूपणं। राधायाः स्वयंलक्ष्मीत्व-कथनञ्च।

३ये किरणे,—जीवनिरूपणं,—तत्र तस्य अणुपरिमाणत्वं आनन्त्यकथनञ्च। एकजीववाद-निरसनं। जीवस्वरूपनिरूपणं। अणोरपि तस्य ज्ञानगुणेन सर्व्वाङ्गेषु व्याप्तिरितिप्रतिपादनं। जीवस्य परात्मांशत्वकथनं। तस्य कर्तृत्वभोक्तृत्वनिरूपणञ्च। सांख्यमतखण्डनं। जीवस्य भग-

वद्वासत्वनिरूपणं। जीवेश्वरयोर्भेदः सार्व्वदिक इति निरूपणं। अविद्याप्रतिविम्बितं ब्रह्मैव जीव इति मताक्षेपः। ब्रह्मणा जीवानामभिन्नत्वबोधिकानां श्रुतीनां समन्वयादिकीर्त्तनं। जगतः सत्यत्वकीर्त्तनं। अतो न मूलकत्ववादनिरसनञ्च।

४र्थे किरणे,—प्रकृतितत्त्वनिरूपणं। तत्र प्रकृतेः त्रिगुणात्मकत्वं द्रव्यत्वकथनञ्च। सत्त्वादीनां लक्षणं। प्रकृतिपरिणामेन जगत्सृष्टिप्रकारकीर्त्तनं। पृथिव्यादीनां लक्षणं। पञ्चीकरणप्रक्रियाकथनं। शरीरादीनां लक्षणं। कारणात् कार्य्यस्याभिन्नत्वनिरूपणञ्च।

५मे, ६ष्ठे. किरणे,— कालतत्त्वनिरूपणं। तत्र काललक्षणादिकं। तद्विभागादिकथनं। सृष्टेः प्रागपि तस्य सत्त्वनिरूपणञ्च। कर्म्मतत्त्वनिरूपणं। तल्लक्षणं। तस्य नित्यत्वादिविभागकीर्त्तनं। ज्ञानेन सति कर्म्मणि विनष्टे तेनैव जीवो हरिपदं प्राप्य अक्षयसुखभाक् तत्रैव निवसति ततः पुनर्न निवर्त्तते इतिनिरूपणं। परोक्षापरोक्षभेदात् ज्ञानस्य द्वैविध्यकथनं। तत्र अपरोक्षज्ञानं ऋादिनीमारसमवेतसम्बिद्रूपं, तच्च भक्तिशब्दव्यपदेश्यमितिनिरूपणं। अपरोक्षज्ञानस्य साक्षाद्ब्रह्मप्रापकत्वकीर्त्तनञ्च। इति शम।

No. 3147. रत्नदर्पणः। Substance, country-made paper, 13½ × 5 inches. Folia, 134. Lines, 10 on a page. Extent, 4,488 ślokas. Character, Nágara. Date, Sm. 1874. Place of deposit, S'ántipura, Kálidása Vidyávágíśa. Appearance, fresh. Prose. Correct.

Ratna-darpaṇa. A commentary on the Sarasvatí-Kaṇṭhábharaṇa of Bhojdeva—a treatise on Rhetoric. By Ratnesvara Mahámahopádhyáya.

Beginning. एकेन यस्य शमिनः प्रसदेव देह-
सर्द्धेन राजति पुमानिव चापरेण।
तत्त्वक्रमादथ च न प्रमादा पुमान् वा
श्रेयांसि वर्द्धयतु स स्मरशासनो वः॥
श्रीरामसिंहदेवेन दोर्द्दण्डदलितद्विषा।
क्रियतेऽवन्तिभूपालकण्ठाभरणदर्पणः॥
कण्ठाभरणमनर्घ्यं वाग्देवीरत्नदर्पणोत्सङ्गे।
अस्मिन् पश्यतु निभृतं प्रकाशमर्व्वाङ्गलावण्यं॥

ग्रन्थारम्भे समुचितेष्टदेवतानमस्कारेण शिष्टाचारमनुवर्त्तते, ध्वनिरिति। वाचामधिष्ठात्रीदेवी द्योतमाना स्वप्रकाशशब्दब्रह्मरूपा भारती, कथमुपास्यते, सूक्ष्मादिभेदेन इत्यादि।

End. तस्यात्ययः प्रध्वंसप्रध्वंसः पुनः सङ्गमसित्यनेन तस्यापि प्रध्वंसः, सुबोधमन्यत्॥

अद्य स्फुरतु वाग्देव्याः कण्ठाभरणकौतुकं ।
मयि प्रक्रमनोद्दत्तौ तन्वाने रत्नदर्पणं ॥

Colophon. इति महाहोपाध्यायमनीषिरत्नश्रीरत्नेश्वरविरचिते रत्नदर्पणनाम्नि सरस्वतीकण्ठाभरणविवरणे अर्थालङ्कारः तृतीयः परिच्छेदः ॥

रत्नेश्वरो नाम कवीश्वरोऽसौ
विराजते काव्यसुधाभिषेकैः ।
दुस्तर्कवज्राहत + + + +
वसुन्धरां पल्लवयन्नजस्रं।
संवत् । १८७४ । पौष ।

विषयः । भोजदेवकृतसरस्वतीकण्ठाभरणाभिधानालङ्कारसन्दर्भस्य व्याख्यानं ।

No 3148. त्रिमङ्गलं । Substance, country-made yellow paper, 14 × 7 inches. Folia, 106. Lines, 14 on a page. Extent, 3,895 ślokas. Character, Nágara. Date, Sм. 1930. Place of deposit, Government of India. Appearance, new. Verse. Generally correct.

Trimaṅgala. Poems on diverse subjects. Anonymous.

Beginning. अथ त्रिमङ्गलनामग्रन्थो लिख्यते ॥ जय जयानन्दमिश्रो परमगुरो सर्व्वलोकाभिराम त्वत्पदकमलमकरन्द उरस्थयमेव कामशिरोमणिः ।

End. एतच्छुभश्रवणतः श्रवणानि सिद्धिं संयान्ति हि श्रवणसारफलस्य लाभात् । संकेतबुद्धिरखिलश्रवणस्य तस्य श्रीमद्गुरोस्तरसि यच्चरणौ सहायौ ॥

Colophon. इति श्रीत्रिमङ्गलनाम्नि वार्त्तिकस्वरूपसुन्दरीतिलकरसमङ्गलं सम्पूर्णं ॥

विषयः । अत्र एकोनपञ्चाध्यायाः सन्ति तत्र १ अध्याये गुरुसंयोगकथनं । २ मायायुद्भवकथनं । ३ मायाब्रह्मविवेचनं । ४ इन्द्रियनिरूपणं । ५ प्रेमभक्तिप्रकाशनं । ६ प्रणवसंकेतार्थप्रकाशनं । ७ परमार्थसारसूचनं । ८ सूक्ष्मांशाव्यक्तनिरूपणं । ९ आत्मनः सर्व्वस्वरूपत्वकथनं । १० सर्व्वसंशयकथनं । ११ लक्ष्मीनारायणवर्णनं । १२ जगतः परस्परभेदसन्देहनिवारणकथनं । १३ सप्तसिन्धुवर्णनं । १४ सोपद्वीपभरतखण्डवर्णनं । १५ जम्बूद्वीपस्य अष्टभौमस्वर्गवर्णनं । १६ भूलोकविवरणं । १७ ज्योतिःप्रक्रमः । १८ सूर्य्यस्य गतिनिरूपणं । १९ प्रथममण्डलस्यचान्द्रीयसूक्ष्मगतिवर्णनं । २० नक्षत्रराशियुक्तद्वितीयमण्डलवर्णनं । २१ सप्तर्षियुक्ततृतीयचतुर्थमण्डलवर्णनं । २२ ध्रुवमण्डलकालभेदवर्णनं । २३ भुवर्लोकादिवर्णनं । २४ भूर्लोकेश्वरविवरणं । २५ ईश्वरभेदप्रकाशनं । २६ अखण्डानन्दस्वरूपशतकोटिकल्पद्रुमवर्णनं । २७ कालिन्दीभेदवर्णनं । २८ द्विपङ्क्तिभेदवर्णनं । २९ द्वादशकलाद्रुमवर्णनं । ३० सरोवरसमीपस्थशतमन्दिरवर्णनं ।

३१ सरोवरमध्यस्थैकशतस्तम्भवर्णनं। ३२ सकलोर्द्धभूरसभेदवर्णनं। ३३ आनन्दसरोवर्णनं। ३४ द्विपङ्क्तिपञ्चदशसोपानवर्णनं। ३५ मोहनमन्दिरस्तम्भोर्द्धभूमिभेदवर्णनं। ३६ सरोभेदगर्भस्तम्भभूमिवर्णनं। ३७ अष्टभुवां सर्व्वसिंहासनस्वल्पभेदवर्णनं। ३८ सोपानपथवर्णनं। ३९ नित्योज्ज्वलरसवर्णनं। ४० ब्रह्मवीजमहामन्त्रप्रकरणं। ४१ देवत्वसंयोगकथनं। ४२ चिच्छक्तिविभक्तिपरिमाणसंवोधनं। ४३ सहजानन्दांशविभागसंवोधनं। ४४ नित्यानित्यविभागप्रकाशनं। ४५ व्रजविनोदसंकेतरससूचनं। ४६ रासरहस्यवर्णनं। ४७ मथुरालीलोपसंहारः। ४८ द्वारकालीलोपसंहारः। ४९ वेदपूर्व्वार्थसन्देहनिवारणं। ५० कलौ साधुनिरूपणं। ५१ जीवपरिभाषानिर्देशः। ५२ ईश्वरपरिभाषानिर्देशः। ५३ सत्पदार्थपरिभाषानिर्देशः। ५४ आनन्दपदार्थपरिभाषानिर्देशः। ५५ अचिन्त्यशक्तिपरिभाषानिर्देशः। ५६ चैतन्यपदार्थपरिभाषानिर्देशः। ५७ श्रद्धापदार्थपरिभाषानिर्देशः। ५८ परलोकपटोद्घाटनं १।

No. 3149. वाणीभूषणं। Substance, country-made paper, 12 × 4⅓ inches. Folia, 21. Lines, 10 on a page. Extent, 718 ślokas. Character, Nágara. Date, Sм. 1897. Place of deposit, S'ántipura, Rámanátha Tarkaratna. Appearance, new. Prose and verse. Correct.

Váṇíbhúshaṇa. A treatise on versification. By Dámodara Miśra, of Mithilá.

Beginning. राजत्कुञ्जरराजकृत्तिविमलोद्यद्दुकूलावृति
भ्राजद्भोगिफणामणिप्रविलसन्मुक्तामणिग्रामणि।
पादाम्भोजभुजङ्गफूत्कृतिरणन्मञ्जीरमञ्जुद्युति
श्रेयो वः शिवशैलराजसुतयोर्दयादभिन्नं वपुः॥
सन्तीह यद्यपि महाकविसम्प्रणीत-
ग्रन्थास्तथापि मम वाग्विशताविलासः।
सम्पूर्णशारदविधावुदयं प्रपन्ने
किं नाम नाभ्युदयमश्नुति तारकापि॥
अल्पमधियः प्राकृतमधिसुधियः केचिद्भवन्तीह।
कृतिरेषा मम तेषामातनुतादीषदपि तोषम्॥
दीर्घघोषकुलोद्भूतो दामोदर इति श्रुतः।
छन्दसां लक्षणं तेन सोदाहरणमुच्यते॥

End. मात्रावृत्तमिह प्रोक्तं चत्वारिंशत्त्रयाधिकं।
त्रयोदशाधिकशतं वर्णवृत्तमिदं शुभं॥

Colophon. इति श्रीमैथिलदामोदरमिश्रविरचितो वाणीभूषणं नाम छन्दोग्रन्थः समाप्तः। संवत् १८९७। मार्गशीर्ष।

विषयः। प्रथमे उल्लासे,—प्रस्तारनिरूपणं। षटकल-पञ्चकल-चतुष्कल-त्रिकल-द्विकल-एककलेषु गणानां नामकीर्त्तनं। अष्टगणानां देवताकथनं। मकारादिगणानां शुभाशुभसूचकत्व-निरूपणं। मात्राणामुद्दिष्टनिरूपणं। मात्रानष्टनिरूपणं। वर्णानामुद्दिष्टकथनं। वर्णमेरुकथनं। मात्रामेरुकथनं। वर्णपताकाकथनं। मात्रापताकाकथनं। वर्णमर्क्कटीकथनं। मात्रामर्क्कटी-कथनं। गाथालक्षणोदाहरणकीर्त्तनं। उपगीतिनिरूपणं। विगाथा। गीतिः। गाथिनी। सिंहिनी। स्कन्धकं। दोहा। ललितं। रोला। गन्धानकं। चौपैया। घत्तावृत्तं। षट्पदं। पद्मा-वती। कुण्डलिका। गगनाङ्गनं। द्विपदी। खञ्जा। पज्झटिका। अरिल्ला। पादकुलकं। शिखा। माला। चुलियाला। सोरठा। हाकलिः। मधुभारः। आभीरं। दुर्म्मिला। रुचिरा। दीपकं। सिंहविलोकितं। प्लवङ्गमः। लीलावती। हरिगीतं। त्रिभङ्गी। हीरकं। जनहरणं। मदनगृहं। मरहट्टा। नवपदं। अत्र सर्व्वेषां लक्षणोदाहरणनिरूपणञ्च।

द्वितीये उल्लासे,—वर्णवृत्तनिरूपणं। तत्र श्रीवृत्तनिरूपणं। कामः। मधु। मही। हारु। तालौ। प्रिया। शशी। रमणः। पाञ्चालः। मृगेन्द्रः। मन्दरः। कमलं। तीर्णा। धारि। नगा-निका। सम्मोहा। हारी। हंसः। यमकं। शेषा। तिलका। विमोहा। चतुरंशा। मन्थानः। शङ्खनारी। सुमालतिका। दमनकः। समानिका। सुवासकं। करहञ्चि(?)। शीर्षा। विद्युन्माला। मल्लिका। प्रमाणिका। तुङ्गा। कमलं। माणवकक्रीड़ितं। अनुष्टुप्। महालक्ष्मी। मारङ्गिका। पायित्ता। कमलं। बिम्बं। तोमरं। रूपमाली। संयुतका॥ चम्पकमाला। सारवती। सुषमा। अमृततिलका। बन्धुः। सुमुखी। शालिनी। दमनकं। सेनिका। मालती। इन्द्रवज्रा। उपेन्द्र-वज्रा। उपजातिः। रथोडता। स्वागता। विद्याधारः। भुजङ्गप्रयातं। लक्ष्मीधरं। तोटकं। सारङ्गं। मौक्तिकदाम। मोदकं। तरलनयनिः। सुन्दरी। प्रमिताक्षरा। मायावृत्तं। तारकं। कन्दं। पङ्क्तावलिः। पुष्पिताग्रा। वसन्ततिलका। चक्रं। सारङ्गी। चामरं। मालिनी। भ्रमरा-वली। मनोहंसः। शरभः। निशिपालः। नाराचः। नीलं। चञ्चला। ब्रह्मा। पृथ्वी। माला-धरः। शिखरिणी। मन्दाक्रान्ता। हरिणी। मञ्जीरा। चर्च्चरी। क्रीड़ाचन्द्रः। शार्द्दूलविक्री-ड़ितं। चन्द्रः। धवलं। शम्भुः। गीतिः। गण्डका। स्रग्धरा। नरेन्द्रः। हंसी। सुन्दरिका। दुर्म्मि-लिका। किरीटं। शालूरं। सर्व्वत्र लक्षणोदाहरणकथनञ्च।

No. 3150. पर्य्यायरत्नमाला। Substance, country-made paper, 12 × 4 inches. Folia, 18. Lines, 8 on a page. Extent, 221 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rámanátha Tarkaratna. Appearance, old. Verse. Incorrect.

Paryáyaratnamálá. A vocabulary of medical terms. By Mádhava Kara.

Beginning. प्रणम्य परमं देवं दुःखत्रयहरं परं ।
संसारसागरोत्तारहेतुं सेतुमिवोत्थितं ॥
पर्य्यायरत्नमालेयमायुर्व्वेदार्णवोत्थिता ।
विविच्यते मया सारा नातिसंक्षेपविस्तरा ॥
(धार्य्या भिषग्विदा कण्ठे नातिसंक्षेपविस्तरा) ।
किं करोति नरः शूरः समरे शस्त्रवर्ज्जितः ।
तद्वत्पर्य्यायरहितश्चिकित्सायां चिकित्सकः ।
तेन नामानि वक्ष्यामि श्लोकेनार्द्धेन पादतः ।
इत्यादि ।

End. सुरूपा सुपदन्यासा सत्कुलोत्था सुभाषिणी ।
प्रियेवास्तु सतां कण्ठे मालेयं यावदौषधं ।
भिषजा माधवेनैषा शिलाह्रदनिवासिना ।
यत्नेन रचिता रत्नमाले + करसूनुना ॥

Colophon. इति सद्वैद्यमाधवकविरचिता रत्नमाला समाप्ता ।

विषयः । आयुर्व्वेदीयोक्तशब्दानां पर्य्यायकथनं ।

No. 3151. राक्षसकाव्यटीका । Substance, country-made paper, 12 × 4 inches. Folia, 8. Lines, 7 on a page. Extent, 285 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rámanátha Tarkaratna. Appearance, old. Prose. Correct.

Rákshasakávya-ṭíká. A commentary on a poem called the Rákshasakávya. By Premadhara S'armá. Other commentaries have been noticed in Vol. II, p. 186, No. 782; Vol. VII, p. 153, No. 2389; Vol. VIII, No. 2821.

Beginning. गौर्य्याः प्राणपतिञ्चैव नत्वा श्रीप्रेमशर्म्मणा ।
टीका राक्षसकाव्यस्य क्रियते साधुबोधिनी ॥
कश्चित् अनिर्द्दिष्टः ना पुरुषः—इत्यादि ।

End. कीदृश्या देव्या रुचिरया दीप्तिमत्या सुन्दर्य्या इत्यर्थः ।

Colophon. इति श्रीप्रेमधरशर्म्मविरचिता राक्षसकाव्यटीका सम्पूर्णा ।

विषयः । राक्षसकाव्याभिधानप्रहेलिकामयकाव्यस्य व्याख्यानम् ।

No. 3152. भक्तिसन्दर्भः। Substance, country-made paper, 12 × 4 inches. Folia, 112. Lines, 12 on a page. Extent, 4,536 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágíśa. Appearance, very old. Prose and verse. Correct.

Bhaktisandarbha. An essay on the Bhakti system of religion as described in the Bhágavata Puráṇa, By Jíva Gośvámí. *Vide ante* Vol. IV, pp. 231, 243, 244, 245.

Beginning. तौ सन्तोषयता सन्तौ श्रीलरूपसनातनौ।
दाक्षिणात्येन भट्टेन पुनरेतद्विविच्यते ॥
तस्याद्यं ग्रन्थनालेखं क्रान्तव्युत्क्रान्तखण्डितम्।
पर्य्यालोच्याथ पर्य्यायं कृत्वा लिखति जीवकः ॥

तत्र पूर्व्वं सन्दर्भचतुष्टयेन सम्बन्धो व्याख्यातः। तत्र पूर्णसनातनपरमानन्दलक्षणपरतत्त्वरूपमित्यादि।

End. — — — — — —

यदेतत्तत् सर्व्वं चरणकमलं राजति ययोः।
कृपामाध्वीकेन स्नपितनयनाम्भोजयुगलौ
सदा राधाकृष्णावशरणगतौ तौ मम गतिः ॥

Colophon. इति कलियुगपावनस्वभजनविभजनप्रयोजनावतारश्रीभगवत्कृष्णचैतन्यदेवचरणानुचरविश्ववैष्णवराजसभासभाजनश्रीरूपसनातनानुशासनभारतीगर्भे श्रीभागवतसन्दर्भे भक्तिसन्दर्भो नाम पञ्चमः सन्दर्भः।

विषयः। स्वभावतो भगवद्भक्तानां नोपदेशान्तरापेक्षेति निरूपणं। भगवत्साम्मुख्योपदेशः। भगवतो गम्यत्वादिनिरूपणं। ज्ञानयोगकर्म्मणां भक्तिसचिवत्वकथनं। भक्तेः प्राधान्यं। भक्तेः स्वरूपगुणकथनं। स्वर्गादेः क्षयित्वकथनं। भक्तेर्निरपेक्षत्वं। भक्तिरेव अपवर्ग इति निरूपणं। परमात्मभगवतोर्वैलक्षण्यकथनं। अन्वयव्यतिरेकाभ्यां श्रीकृष्णतत्त्वनिरूपणं। भगवद्वहिर्मुखधर्म्मादीनां निन्दा। भगवदनर्पितकर्म्मणामनादरः। भक्तेर्नित्यत्वं। श्रवणादीनां लक्षणं। भक्त्याभासस्य दुष्टत्वकथनं। भगवतो निर्गुणत्वकथनं स्वप्रकाशतापरानन्दत्वकथनञ्च। निष्कामभक्तिप्रशंसा। तत्राधिकारादिभेदकथनं। सत्सङ्गः। भक्तिसाधकलक्षणं। भगवत्प्राप्तिनिदानं। महत्त्वलक्षणतद्भेदकथनं। विधिमार्गभक्तयोस्तारतम्यं। गुर्व्वाश्रयप्रकारः। भक्त्याविर्भावक्रमनिरूपणं। रुचिप्रधानमार्गस्य श्रेष्ठत्वं। साम्मुख्यभेदतल्लक्षणादिकथनं। अहंग्रहोपासना। भक्तेस्तटस्थलक्षणं। स्वरूपलक्षणञ्च। आरोपसिद्धा भक्तिः। सङ्गसिद्धा भक्तिः। स्वरूपसिद्धा भक्तिः। पुनः सकैतवाकैतवभेदेन भक्तेर्द्वैविध्यं। वैधीभेदकथनं। रागानुगा। श्रवणकीर्त्तनादिकं। अर्च्चनाविधिः। द्वात्रिंशदपराधाः। दास्यसख्यादि-

निरूपणं । अनुरागविचारः । भगवति पतिभावकर्त्तव्यता । भजनमाहात्म्यं । सिद्धिक्रमकथनञ्च ।
ग्रन्थोऽयं तत्त्वसन्दर्भादिवत् श्रीमद्भागवतटीकास्थानीयः ।

No. 3153. वृषोत्सर्गकौमुदी । Substance, country-made paper, 13 × 4 inches. Folia, 18. Lines, 11 on a page. Extent, 952 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Guptipáḍá, Rámadhana Vidyálaṅkára. Appearance, old. Prose and verse. Correct.

Vṛishotsarga-kaumudí. A digest of the rules regarding the consecration of a bull at the first S'ráddha ceremony. By Rámkṛishṇa.

Beginning. ब्रह्माख्यं नन्दतनयं प्रणम्य वरदं हरिम् ।

तन्यते रामकृष्णेन वृषभोत्सर्गकौमुदी ॥

अशौचान्तद्वितीयदिनवृषोत्सर्गदिने किं कर्त्तव्यमित्याकांक्षायां तदुच्यते । आदावनुदयसमये चाद्यश्राद्धाङ्गतया स्नानं कर्त्तव्यं । यथा श्राद्धाधिकारे देवलः ।

तथैवामन्त्रितो दाता प्रातःस्नातः सहाम्बरः ।

आरभेत नवैः पात्रैरन्वारम्भं सबान्धवः ॥ इत्यादि ।

End. स्वतोद्देश्यककर्म्मत्वमेव श्राद्धत्वं । उद्देश्यता च फलभागित्वेन स्वामित्वेन वेति । अन्ये तु अम्बुघटश्राद्धमाद्यमेवेति वदन्ति ।

Colophon. समाप्तेयं वृषोत्सर्गकौमुदी ॥

विषयः । वृषोत्सर्गकालः । अरुणोदयकाले प्रेततर्पणनिषेधः । त्रिविधस्नानादिनिरूपणं । अशौचस्य अशुभत्वकथनं । महागुरुनिपाते पुत्रस्य अतिथिपूजादिनिषेधः । रात्रौ सद्यःशौचे परदिने शय्यादिदानं नास्तीतिकथनं । एकादशेऽह्नि पुत्रेण तर्पणं न कार्य्यमिति निरूपणं । सर्व्वत्र यजुर्व्वेदोक्तशान्तिमन्त्रविधानं । तिलदानविचारादिकं । वैतरणीदानविधिः । अशौचान्तद्वितीयदिनकृत्यं । दानविचारः । दक्षिणावाक्यविचारः । दाने इतिकर्त्तव्यता । दानफलं । दानदैवतं । वृषोत्सर्गफलं । तत्संकल्पः । नीलवृषलक्षणं । अनुपनीतस्यापि अमावास्याश्राद्धाधिकारः । मासिकेऽपि वृषोत्सर्गकथनं । यज्ञपात्रनियमः । होमप्रकारः । वत्सतर्य्यादिलक्षणं । यूपकाष्ठनियमः । षोड़शश्राद्धसंकल्पः ।

No. 3154 चन्दनधेनुदानप्रमाणम् । Substance, country-made yellow paper, 15 × 3 inches. Folia, 6. Lines, 6 on a page. Extent, 162 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágísa; another copy at Dvárbháṅgá, Bábu Guṇeśvara Siñha. Appearance, old. Prose and verse. Correct.

Chandana-dhenudána. A manual for the consecration of a bull by marking its sides with sandal-paste at a S'ráddha ceremony. By Váchaspati Miśra. The rite here described is a Vaishṇavite modification of the rite described in the next preceding work. In the former case branding with a hot iron is prescribed, and in this the branding is replaced by marking with sandal-paste.

Beginning. नत्वा शिवं चन्दनचर्च्चिताया धेनोः प्रदाने सविधिप्रयोगम्।

रत्नाकरादेर्निखिलं विलोक्य तनोति वाचस्पतिरग्र्यबुद्धिः॥

अथ चन्दनधेनुदानविधिः। तत्र रत्नाकरे देवलः।

जीवद्भर्त्री तु या नारी पुत्रिणी म्रियते यदि।

सवत्सामङ्कितां धेनुमाचार्य्याय प्रदापयेत्॥ इत्यादि।

End यत्तु जीवत्पितृकवृषोत्सर्गनिषेधे पतिपुत्त्रवत्याः पृथगुपसंहारः सोऽपि तस्याः पुत्त्रानधिकारमात्रप्रत्युक्तवृषोत्सर्गाभावः।

Colophon. इति वाचस्पतिमिश्रविरचितं चन्दनधेनुप्रमाणं समाप्तम्।

विषयः। पतिपुत्त्रवत्या मरणे चन्दनधेनुदानकर्त्तव्यता। तत्र वृषोत्सर्गनिषेधः। यूपलक्षणादिकं। धेनुलक्षणं। त्रिदण्डिसन्न्यासिनां मरणे श्राद्धविधिः। न तु एकोद्दिष्टश्राद्धमिति निरूपणं। सपत्नीपुत्त्रेण चन्दनधेनुदानप्रतिषेधः। ज्येष्ठत्वनिरूपणं। धेनुदानप्रयोगः। तिर्य्यगधिकरणं। विरुद्धवचनानां समन्वयः।

No. 3155. तिथिद्वैधनिर्णयप्रकरणं वा तिथिविवेकः। Substance, country-made yellow paper, 15 × 3 inches. Folia, 12. Lines, 5—6 on a page. Extent, 297 ślokas. Character, Bengali. Date, ? Place of deposit, Sántipura, Kálidása Vidyáva'giśa. Appearance, old. Prose and verse. Correct.

Mantra-muktávali-tantra.
Mantratantra-prakás'a.
Manu-sañhitá.
Mátrikárṇava-tantra.
Mátriká-tantra.
Matsya-súkta-tantra.
Máyá-tantra.
Meruchandra-tantra.
Muṇḍamálá-tantra.
Nandikeśvara-sañhitá.
Náráyana-tantra.
Navaratneśvara-tantra.
Níla-tantra.
Nrisiñha-tápaníya.
Párijáta-tantra.
Phetkárí-tantra.
Piñgalá-tantra.
Prapanchasára-tantra.
Prayogasára-tantra.
Pújápradípa-tantra.
Purascharaṇa-chandriká
Rájarájeśvarí-tantra.
Ratnávali-tantra.
Rudrajámala tantra.
S'akti-tantra.

Sammohana-tantra.
Samayá-tantra.
Sanatkumára-sañhitá.
Sanatkumára-tantra.
Sañketa-chandrodaya-tantra.
Sáradátilaka-tantra.
Sárasamuchchaya.
Sárasañgraha.
Shaṭtriñśat-tattva-tantra.
Siddhajámala-tantra.
Siddhántaśekhara-tantra.
Siddhasárasvata-tantra.
S'ivágama-tantra.
Somabhujagábála-tantra.
S'ríkrama-tantra.
S'rírámárchchana-chandriká-tantra.
S'rívináyaka-sañhitá.
Svachchhanda-bhairava-tantra.
Svachchhanda-sárasañgraha-tantra.
Svatantra-tantra.
S'yámárahasya-tantra.
Tantra-chuḍámaṇí.
Tantra-kaumudi.
Tantra-pradípa.
Tantrarája.
Tantra-ratna.
Tantrárṇava-tantra.
Tantrasára.
Tárárṇava-tantra.
Tárápradípa-tantra.
Tárárahasya-tantra.
Táravilása-tantra.
Táriṇí-tantra.
Tattvaságara-tantra.
Tattvabodha-tantra.
Toḍala-tantra.
Trailakyamohana-tantra.
Trailakyasára-tantra.
Tripurárṇava-tantra.
Tripura-tantra.
Triśákti-tantra.
Uḍḍísa-tantra.
Unmatta-bhairava-tantra.
Uttara-tantra.
Vaisampáyana-sañhitá.
Vaishṇvámṛita-tantra.
Vámakeśvara-tantra.
Várahí-tantra.
Varṇavilása-tantra.
Vaśishṭha-sañhitá.
Vásishṭha-tantra.
Váyavíya-tantra.
Vijṇánalatiká-tantra.
Vírabhadra-tantra.
Víra-tantra.
Vishṇudharmottara-tantra.
Visuddhesvara-tantra.
Visvamátriká-tantra.
Visvasára-tantra.
Vṛihadgautamíya-tantra.
Yakshaḍámara-tantra.
Yoginíhṛidaya-tantra.
Yoginíjálakuraka-tantra.
Yoginí-tantra.

Beginning. ॐ नमः श्रीमते तस्मै गुरुदेवाय योगिने ।
अशेषासारसंसारसाराय शिवरूपिणे ॥
स्वगुरोश्चरणसरोजं शिरसि सरसिजे स्मरन् मुहुः श्रीमान् ।
आगमतत्त्वविलासं रचयति रघुनाथतर्कवागीशः ॥

End. अग्रे विनतासुतं तद्बहिरिन्द्रादीन् वज्रादीन् संपूज्य धूपादिविसर्ज्जनान्तं कर्म्म कुर्य्यात् ।

Colophon. (इति प्रथमखण्डं) (अस्य द्वितीयखण्डमत्र माम्प्रतं नास्ति) ।

विषयः । वीजवर्णनिर्णयः । सृष्टिक्रमः । दीक्षाप्रकरणं । दीक्षानित्यत्वकाम्यत्वनिरूपणं ।

दीक्षानामनिरुक्तिः। गुरुलक्षणं। गुरुदोषकथनं। पितृ-मातामह-कनिष्ठादितो दीक्षानिषेधः। स्वप्नलब्धमन्त्रविधिः। तत्र गुरुलाभे कर्त्तव्यताकथनं। शिष्यलक्षणं। दीक्षायां मासादिनियमः। समयाशुद्ध्यादिनिरूपणं। देवपर्व्वकथनं। षट्पदचक्रं। अष्टवर्गचक्रं। नक्षत्रचक्रं। तारामैत्रीविचारः। अकथहादिचक्रं। अंशकचक्रं। अकडमचक्रं। ऋणिधनिचक्रं। विशिष्टमन्त्राङ्ककथनं। ऋणिधनिचक्रस्य प्रकारान्तरं। हरचक्रं। महाविद्यानिरूपणं। उपासनानिर्णयः। मन्त्राणां दशविधसंस्कारकथनं। दशसंस्कारप्रयोगकथनञ्च। मातृकायन्त्रक्रमः। दीक्षायां पूर्व्वकृत्यानि। दीक्षाप्रयोगः। संक्षेपदीक्षा। सर्व्वतोभद्रमण्डलं। गुरुशिष्ययोर्दीक्षानन्तरं निषिद्धानि। करमालानिरूपणं। मालाभेदकथनं। मालासंस्कारः। तत्र प्रयोगः। रुद्राक्षसंस्कारः। महाशङ्खमालासंस्कारः। कपालपात्रशुद्धिः। यन्त्रसंस्कारः। त्रिलोहीमुद्राकथनं। तत्प्रयोगकथनञ्च। बलिविधानं। तत्प्रयोगः। स्वगात्ररुधिरदानव्यवस्था। पूजास्थाननियमः। अशौचादौ वर्ज्यावर्ज्यनियमः। क्षताशौचव्यवस्था। क्षौरादिकर्म्मविशेषव्यवस्था। प्रातःकृत्यनिरूपणं। स्नानविधिः। सन्ध्याविधिः। विष्ण्वादिदेवतागायत्री। शक्त्यादिदेवतागायत्री। गायत्रीध्यानप्रकरणं। वस्त्रादिपरिधानं। त्रिपुण्ड्रव्यवस्था। पादप्रक्षालनविधिः। कुशाङ्गुरीयधारणक्रमः। आचमनविधिः। द्विराचमनप्रकरणं। आसनादिशुद्धिः। आसनप्रमाणं। तत्र मृदुचूड़कोमललक्षणं। काष्ठासनप्रमाणं। पूजादौ मुखनियमः। भूतशुद्धिः। मातृकान्यासः। प्राणायामः। पीठन्यासः। ऋष्यादिन्यासः / व्यापकन्यासः। अर्घ्यस्थापनविधिः। प्राणप्रतिष्ठाकथनं। सामान्यार्घ्यविधिः। अष्टादशोपचाराः। षोड़शोपचाराः। दशोपचाराः। पञ्चोपचाराः। मणिमुक्तादिद्रव्याणां निर्म्माल्यकालः। आसननियमः। पाद्यादिपात्रनियमः। अर्घ्यप्रमाणं। आचमनीयं। मधुपर्कः। पुनराचमनीयं। वसनाभरणे। गन्धः। पुष्पाणि। धूपः। दीपः। नैवेद्यप्रमाणं। पूजाकाले द्रव्यादिदाननियमः। प्रदक्षिणनमस्कारनियमः। शुद्ध्यादिनियमः। वाद्यनियमः। योगाङ्गासनानि। धारणमन्त्राणि। मन्त्रलेखनद्रव्यकथनं। संक्षेपतः सर्व्वदेवनित्यपूजाविधिः। पञ्चायतनीपूजा। नैमित्तिकविधिः। भुवनेश्वर्य्याः प्रयोगः। त्वरितायाः। दुर्गायाः। सरस्वत्याः। लक्ष्म्याः। गणेशस्य। सूर्य्यस्य। श्रीरामस्य। श्रीकृष्णस्य। नृसिंहस्य। भैरव्याः। सुन्दर्य्याः। छिन्नमस्तायाः। श्यामायाः। तारायाः। तर्पणविधिः। निग्रहोपायकथनं। तत्र आकर्षणं। वशीकरणं। विद्वेषणं। उच्चाटनं। स्तम्भनञ्च। अभिचारकथनं। षट्कर्म्मलक्षणं। तत्र आसनादिकथनं। भूतानामुदयः। भूतानां मण्डलानि। जपनिरूपणं। जपक्रमः। सेतुः। महासेतुः। ऋष्यादिन्यासः। सप्तच्छदा विद्याः। अमृता। जिह्वाशोधनं। चौरन्यासः। कामकला। योनिमुद्रा। जपप्रयोगः। जपफलं। युगसेवानियमः। पुरश्चरणं। तत्र भक्ष्यादिनियमः। तत्र वर्ज्यानि च। पुरश्चरणजपकालावधिकथनं। जपसंख्याकरणे विशेषकथनं। कूर्म्मचक्रं। पुरश्चरणप्रयोगः। ग्रहणपुरश्चरणप्रयोगश्च। रहस्यपुरश्चरणं। वीरसाधनं। तत्र पूजाद्रव्यादिकथनं। शवसाधनं। योगिनीसाधनं। मनोहरायाः। कनकवत्याः। रतिसुन्दर्य्याः। पद्मिन्याः। नटिन्याः। मधुमत्याश्च एतासां मुद्राकथनं। षट्किन्नरीसाधनं। पिशाचीसाधनं। मधुमतीपिशाचीसाधनं।

यक्षपत्न्यादिसाधने स्थानसमयादिकथनं। अदर्शनसिद्धिः। अन्यविधसिद्धिः। मन्त्रसिद्धिलक्षणं। मन्त्रसिद्धेरुपायकथनं। मन्त्राणां दोषादिनिरूपणं। तत्र दोषशान्त्युपायकथनं। बालकस्य संस्कारविधानं। शिवाबलिः। आचारकथनं। भावरहस्यं। अन्तर्यागः। तत्र प्रकारान्तरं। पूजाकथनं। होमकथनं। कुमारीपूजा। तत्र क्रमकथनं। दूतीयागः। तत्र सम्विदादिशोधनकथनं। जपनप्रकारः। तत्र कन्यानिरूपणं। शक्तिशोधनं। वीराणां पुरश्चरणं। मांसादिनिरूपणं। भक्ष्यविशेषस्य मुद्रापरिभाषा। वामाचारानुकल्पः। यन्त्रदर्शनफलकथनं। चक्रपादोदकमाहात्म्यं। यन्त्रादिनाशप्रायश्चित्तकथनं। पूजाकाले यन्त्रादिपतनप्रायश्चित्तकथनं। पूजाधारनिरूपणं। लिङ्गद्वयादिपूजानिषेधः। कुण्डनिरूपणं। स्रुक्स्रुवौ। हस्तप्रमाणं। कर्षादिमानं। दृहद्धोमपद्धतिः। संक्षेपहोमप्रयोगः। शाक्ताभिषेकनिरूपणं। मन्त्रादिभिर्देवतानिरूपणं। मन्त्रान्तरं। अत्र ध्यानं। हेरम्बध्यानादिकथनं। हरिद्रागणेशः। उच्छिष्टगणेशः। सूर्य्यः। मार्त्तण्डभैरवः। अजपामन्त्रः। चन्द्रः। अत्र प्रयोगः। विष्णुप्रकरणं। तत्त्वन्यासः। श्रीरामस्य पूजादिकथनं। श्रीकृष्णस्य। रत्नाभिषेकमन्त्रकथनं। बालगोपालस्य मन्त्रपूजादिकथनं। वासुदेवस्य लक्ष्मीवासुदेवस्य दधिवामनस्य हयग्रीवस्य नृसिंहस्य वराहस्य हरिहरस्य च। शिवस्य मन्त्रादिकथनं। मृत्युञ्जयस्य दक्षिणामूर्त्तेः नीलकण्ठस्य चण्डेश्वरस्य च।

(इति प्रथमखण्डस्य)।

अत्रोल्लिखिततन्त्रादिनामानि यथा,—

"स्वतन्त्रतन्त्रं फेत्कारीतन्त्रमुत्तरतन्त्रकं। नीलतन्त्रं वीरतन्त्रं कुमारीतन्त्रमुज्ज्वलं॥
कालीनारायणीतन्त्रे तारिणीतन्त्रमुत्तमं। बालातन्त्रञ्च समयातन्त्रं भैरवतन्त्रकं॥
भैरवीत्रिपुरातन्त्रे वामकेश्वरतन्त्रकं। कुक्कुटेश्वरतन्त्रञ्च मातृकातन्त्रमेव च॥
सनत्कुमारतन्त्रञ्च विशुद्धेश्वरतन्त्रकं। सम्मोहनाख्यतन्त्रञ्च गौतमीयञ्च तन्त्रकं॥
बृहद्गौतमीयतन्त्रं भूतभैरवतन्त्रकं। चामुण्डापिङ्गलातन्त्रे वाराहीतन्त्रकं तथा॥
मुण्डमालाख्यतन्त्रञ्च योगिनीतन्त्रमुत्तमं। मालिनीविजयं तन्त्रं तन्त्रं स्वच्छन्दभैरवं॥
महातन्त्रं शक्तितन्त्रं तन्त्रं चिन्तामणिं परं। उन्मत्तभैरवं तन्त्रं त्रैलोक्यसारतन्त्रकं॥
विश्वसाराह्वयं तन्त्रं तथा तन्त्रामृताभिधं। महाफेत्कारीयतन्त्रं वायवीयञ्च तोड़लं॥
मालिनीललितातन्त्रे त्रिशक्तितन्त्रकं तथा। राजराजेश्वरीतन्त्रं महामोहस्वरोत्तरं॥
गवाक्षतन्त्रं गान्धर्व्वं तन्त्रं त्रैलोक्यमोहनं। हंसमाहेश्वरं हंसपरमेश्वरतन्त्रकं॥
कामधेन्वाख्यतन्त्रञ्च तन्त्रं वर्णविलासकं। मायातन्त्रं मन्त्रराजं कुब्जिकातन्त्रमुत्तमं॥
विज्ञानलतिकां लिङ्गागमं कालोत्तरं तथा। ईशानसंहितां तद्वत् श्रीविनायकसंहितां॥
अगस्त्यसंहितां पुण्यां नन्दिकेश्वरसंहितां। वशिष्ठसंहितां दक्षसंहितां मनुसंहितां॥
ब्रह्मणः संहितां दिव्यां सनत्कुमारसंहितां। कुलानन्दसंहिताञ्च वैशम्पायनसंहितां॥
नृसिंहतापनीयञ्च दक्षिणामूर्त्तिसंहितां। ब्रह्मजामलकञ्चादिजामलं रुद्रजामलं॥

वृहज्ज्ञामलकं सिद्धजामलं कल्पसूत्रकं । मत्स्यसूक्तं कल्पसूक्तं कामराजं शिवागमं ॥
उड्डीशञ्च कुलोड्डीशमुड्डीशं वीरभद्रकं । भूतडामरकं तद्वत् डामरं यक्षडामरं ॥
कालिकाकुलसर्व्वस्वं कुलसर्वस्वमेव च । कुलचूड़ामणिं दिव्यं कुलसारं कुलार्णवं ॥
कुलामृतकुलावल्यौ तथा कालीकुलार्णवं । कुलप्रकाशं वाशिष्ठं सिद्धसारस्वतं तथा ॥
योगिनीहृदयं कालीहृदयं मातृकार्णवं । योगिनीजालकुरकं तथा लक्ष्मीकुलार्णवं ॥
तारार्णवं चन्द्रपीठं मेरुचन्द्रं चतुःशती । तत्त्वबोधं महोग्रञ्च स्वच्छन्दसारसङ्ग्रहं ॥
ताराप्रदीपं सङ्केतचन्द्रोदयमतिस्फुटं । षट्त्रिंशत्तत्त्वकं लक्ष्यनिर्णयं त्रिपुरार्णवं ॥
विष्णुधर्म्मोत्तरं मन्त्रदर्पणं वैष्णवामृतं । मानसोल्लासकं पूजाप्रदीपं भक्तिमञ्जरीं ॥
भुवनेश्वरीं पारिजातं प्रयोगसारमुत्तमं । कामरत्नं क्रियासारं तथैवागमदीपिकां ॥
भावचूड़ामणिग्रन्थं तन्त्रचूड़ामणिं परं । वृहच्छ्रीक्रमसंज्ञञ्च तथा श्रीक्रमसंज्ञकं ॥
सिद्धान्तशेखरं ग्रन्थं तां गणेशविमर्शिनीं । मन्त्रमुक्तावलीं तत्त्वकौमुदीं तन्त्रकौमुदीं ॥
मन्त्रतन्त्रप्रकाशाख्यं श्रीरामार्च्चनचन्द्रिकां । शारदातिलकं ज्ञानार्णवं सारसमुच्चयं ॥
कल्पद्रुमं ज्ञानमालां पुरश्चरणचन्द्रिकां । आगमोत्तरकं तत्त्वसागरं सारसङ्ग्रहं ॥
देवप्रकाशिनीं तन्त्रार्णवञ्च क्रमदीपिकां । तारारहस्यं श्यामाया रहस्यं तन्त्ररत्नकं ॥
तन्त्रप्रदीपं तारायाः विलासं विश्वमातृकां । प्रपञ्चसारं तं तन्त्रसारं रत्नावलीं तथा ॥

एवं षष्ठ्युत्तरशतं ग्रन्थानां स्फुटमागमे ।
कल्पान् कुमारीकल्पादीन् श्रुतीस्त्वोपनिषद्गणान् ।
ज्योतिःस्मृतिपुराणानि पाणिनीयादिकौशलं ॥ इति ।

No. 3187. जीवभेदसङ्ग्रहदीपिका । Substance, country-made paper, 10 × 3 inches. Folia, 9. Lines, 6 on a page. Extent, 137 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Harinátha Gośvámí. Appearance, old. Prose and verse. Generally correct.

Jívabheda-sańgraha-dípiká. Vaishṇavite philosophy, showing the distinction between the created and the creator, and that the creator is identical with Krishṇa. By Kálímohana S'armá.

Beginning. सर्व्वमूर्द्धण्यमूर्द्धण्यं सर्व्वसुन्दरसुन्दरं ।
सर्व्वोत्तमोत्तमं वन्दे वृन्दारण्यकलानिधिं ॥

जीवस्य चित्स्वरूपत्वे मुक्तस्वभावत्वादित्यादि ।

End. वैष्णवस्य च जीवस्य भेदसंग्रहदीपिका ।

समाप्तेयं पदाम्भोजदर्शनाय मतां हि तत् ॥
नानादर्शननैपुणेस्व कथमप्यन्यावतारे हरौ
नानादिग्गजधीरधारणमतेस्याद्बल्यमुज्जृम्भते ।
नानादुर्घटवासनाविसङ्कटं चित्तञ्च भूतं न्टणां
नानानिर्भरकेलिमोहनघनश्यामाभिरामे कुतः ॥

Colophon. इति समाप्तिः । (क्वचित् २ लुप्तप्रायः) ।

विषयः । सप्रयोजनप्रतिज्ञाकथनं । जीवस्य ईश्वरांशत्वेन चित्स्वरूपत्वकथनं । भक्तिलक्षणं । भक्तिसंस्कारेण अविद्योपाधिनिरासः । ईशलक्षणं । जीवलक्षणं । ब्रह्मैवाहमित्यभिमानिनां न भक्तावधिकारः । ब्रह्मजीवयोर्भेदः । साधूनां सिद्धविग्रहत्वं । हरेरस्य संसारार्णवतरणे प्लवत्वकथनादि । 'तमेव विदित्वा अतिमृत्युमेति' इत्यादौ पुंलिङ्गेन श्रीकृष्ण एव लभ्यते इत्यादिकथनं । भक्तियोगस्यैव परमपुरुषार्थत्वं । परमपुरुषार्थशब्दनिर्व्वचनं । पुरुषोत्तमनाममनिरुक्तिः । अतिप्रलयवादिमतनिरासः । भक्तियोगस्य मोक्षसाधनता नास्ति इत्यत्र आक्षेपपरीहारः ।

No. 3188. अशौचनिर्णयः । Substance, country-made paper, $15\frac{1}{3} \times 3$ inches. Folia, 42. Lines, 6 on a page. Extent, 850 ślokas. Character, Bengali. Date, Sk. 1614. Place of deposit, S'ántipura, Kálidása Vidyávágísa. Appearance, old. Prose and verse. Correct.

Aśaucha-nirṇaya. An abstract of the rules regarding impurities of the person resulting from birth or death in a clan. By Gopála Nyáyapanchánana Bhaṭṭácharya.

Beginning. नत्वा नीलोत्पलश्यामं कृष्णं राजीवलोचनं ।
न्यायपञ्चाननो विद्वान् कुरुतेऽशौचनिर्णयं ॥ इत्यादि ।

End. शाके शरैर्वह्निशरेन्दुमाने मन्वादिशास्त्राणि विचार्य्य यत्नैः ।
धीराः कृतेयं परिपालनीया विभाव्य दोषाः परिभावनीयाः ॥

Colophon. इति श्रीगोपालन्यायपञ्चाननभट्टाचार्य्यकृताशौचनिर्णयनामपुस्तिका समाप्ता । शकाब्दाः । १६१४ ॥

विषयः । निर्गुणाशौचनिर्णयः । अङ्गास्पृश्यत्वनिरूपणं । पुत्रकन्याजनने मातुरशौचनिर्णयः । बालाद्यशौचनिर्णयः । तत्र क्षत्रियविशोस्तु विशेषकथनं । स्त्र्यशौचनिर्णयः । गर्भस्रावाशौचं । विदेशस्थाशौचनिरूपणं । अशौचस्य गुरुत्वादिनिरूपणं । अशौचसङ्करव्यवस्था । असपिण्डाशौचनिरूपणं । मृत्युविशेषाशौचनिर्णयः । सहमरणाशौचनिरूपणं । परपूर्व्वाद्यशौचनिर्णयः । रजस्वलाशौचनिर्णयः । शवानुगमनाद्यशौचनिरूपणञ्च । इति ।

No. 3189. कृष्णभक्तिप्रकाशः। Substance, country-made paper, 14 × 3 inches. Folia, 42. Lines, 10 on a page. Extent, 1,608 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Harinátha Gośvámí. Appearance, old. Prose and verse. Generally correct.

Krishṇabhakti-prakáśa. On devotion to Krishṇa. The manuscript is incomplete, and the author's name is not apparent.

Beginning. श्रीकृष्णचरणाम्भोजं प्रणम्य परया मुदा ।
नानापुराणवाक्येन तस्य भक्तिः प्रकाश्यते ॥
अज्ञानतिमिरध्वंसी परमार्थप्रकाशकः ।
कृष्णभक्तिप्रकाशोऽस्तु प्रमोदाय सतां सदा ॥ इत्यादि ।

End. स वस्तारयते सर्व्वान् कलौ गोविन्दकीर्त्तनात् ।

Colophon. इत्यतः खण्डितत्वात् परिसमाप्तिवाक्यं नास्ति ।

विषयः। ग्रन्थोऽयं काण्डद्वयेन विभक्तः । तत्र प्रथमकाण्डस्य १म प्रकरणे, श्रीकृष्णभक्तप्रशंसा । २प्र, श्रीकृष्णाभक्तनिन्दा । ३प्र, श्रीकृष्णभजनादिकथनं । ४प्र, तद्भजनस्य सार्व्वकालिकत्व-कीर्त्तनं । ५प्र, तद्भजनेऽधिकारिनियमाभावकथनं । ६प्र, भगवद्भक्तिकारणादिकथनं । २काण्डस्य १प्र, निष्कामभक्तेर्गरीयस्त्वकथनं । २प्र, उत्तमादिभक्तिलक्षणं । अप्रारब्धपापहरत्वादिभक्तिफलक-थनञ्च । ३प्र, गुरुपादाश्रयादिभक्त्यङ्गकथनं । ४प्र, साधनभक्तिनिरूपणं । तत्र कर्म्मादीनां भक्त्यङ्ग-त्वकथनं । श्रवणकीर्त्तनादिस्वरूपकीर्त्तनञ्च । अतः खण्डितं ।

No. 3190. न्यायबोधिनी। Substance, country-made yellow paper, 17½ × 3½ inches. Folia, 8. Lines, 8 on a page. Extent, 268 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Harinátha Gośvámí. Also another copy at Jápharaganja, Baḍa A'khdá Post Nasipura, Zilá Mursidábáda, Gopáladása Mohanta. Appearance, new. Prose. Generally correct.

Nyáyabodhiní. A commentary on the Tarkasaṅgraha. By Govardhana S'armá.

Beginning. अखिलागमसञ्चारि श्रीकृष्णाख्यं परं महः ।
ध्यात्वा गोवर्द्धनसुधीस्तनुते न्यायबोधिनीं ॥

चिकीर्षितस्य ग्रन्थस्य निर्व्विघ्नपरिसमाप्त्यर्थमिष्टदेवतानमस्काराात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबध्नाति । निधायेतीत्यादि ।

End. आकाशगतैकत्वपरिमाणादेः । अतोऽनेक इति विशेषणं ॥ इति शब्दपरि-च्छेदः ।

Colophon. इति न्यायबोधिन्यां टीकायां गोवर्द्धनविरचितायां चतुर्थः परिच्छेदः ।
विषयः । तर्कसङ्ग्रहस्य व्याख्यानं ।

No. 3191. ऋतुसंहारचन्द्रिका। Substance, country-made paper, 17 × 4 inches. Folia, 37. Lines, 6 on a page. Extent, 863 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kṛishṇamaya Gośvamí. Appearance, old. Prose. Generally correct.

Ritusañhára-chandriká. A commentary on Ṛitusañhára of Kálidása. By Manirám Sármá, son of Nilkaṇṭha.

Beginning. यः समस्तविदुषां शिरोमणिर्येन राजति सभा विपश्चितां । तं महीश्वरकृताङ्घ्रिवन्दनं नीलकण्ठपितरं नमाम्यहं ॥
शृङ्गारैकप्रधानं यदृतुसंहारनामकं काव्यं तत्कालिदासीयं व्याख्यास्येऽहं यथामति ।
अप्रचारतमोमग्ना कालिदासकृतिर्यतः ।क्रियतेऽतश्चन्द्रिकेयं विबुधानन्ददायिनी ॥ इत्यादि ।

End. पूजितो न जगदीश्वरो मया नापि विश्वजननी सुसेविता ।
किन्तु यत् प्रलपितं निजेच्छया तत्र सद्गुरुकृपैव कारणं ॥

Colophon. इति श्रीमणिरामविरचितायां ऋतुसंहारचन्द्रिकाभिधायां टीकायां षष्ठः सर्गः समाप्तः ।
विषयः। कालिदासकृत-ऋतुसंहारस्य व्याख्यानं ।

No. 3192. विश्वसारतन्त्रम्। Substance, country-made yellow paper, 17 × 3½ inches. Folia, 224. Lines, 6 on a page. Extent, 5,108 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Kálidása Vidyávágíśa. Appearance, new. Verse. Generally correct.

Viśvsára-tantra. An elaborate digest of the doctrines of the Tantras, and various Tantric rituals. Attributed to Mahákála.

Beginning. प्रणम्य शङ्करं गौरीं जगदानन्दवर्द्धिनीं ।
सुखदुःखप्रदां रम्यां महाकालेन धीमता ।
क्रियतेऽद्दीमहातन्त्रं तन्त्राणां सारमुत्तमं । इत्यादि ।

End. स भवति पदमुच्चैः सम्पदापदनम्र-
चितिपमुकुटलक्ष्मीर्लक्षणानां चिरायुः ॥

Colophon. इति विश्वसारतन्त्रे सरस्वत्याः कवचं समाप्तं। समाप्तश्चाष्टमः पटलः। (अत्र पटलसंख्याविपरीत्यं वर्त्तते)।

विषयः। पार्व्वतीश्वरसंवादः। आगमनामनिरुक्तिः। सच्चिदानन्दरूपस्य सदाशिवस्य लीलावशात् सृष्टिः। मायामाहात्म्यकथनादि। मूलप्रकृतिरेव मायेतिकथनं। परब्रह्मैव स्त्रीपुरुषरूपेण द्विधा भूत्वा चराचरं सृजतीतिकथनञ्च। ब्रह्मविष्णुरुद्रप्रभृतीनां मायामयदेहप्राप्तिकथनं। जगतो ब्रह्मानतिरिक्तत्वं। आगमप्रशंसा। महामायैव पूजनीया सन्तुष्टायाञ्च तस्यां हरिहरादीनां सर्वेषां प्रीतिरितिकथनं। मोक्षकारणकीर्त्तनं। घोषप्रघोषसंघोषमहाप्राणादिकथनं। शक्तिं विना सृष्ट्यभावकथनं। मानसीमैथुनीभेदेन द्विविधसृष्टिः। विन्दुनादयोः स्वरूपं। विन्दुरेव जगत्कारणं। प्रणवनिरूपणं। रौद्री-वामा-ज्येष्ठाभेदात् त्रिविधा शक्तिः। इच्छाज्ञानक्रियाविमलादिभेदेन सदाशिवस्य शक्त्यानन्त्यकथनं। शब्दब्रह्मनिरूपणं। ककारादिवर्णानामुत्पत्तिः। तन्मात्रेभ्य आकाशादीनामुत्पत्तिः। जरायुजस्वेदजादिकथनं। उद्भिदादिदेहकथनं। आकाशादीनां मण्डलकथनं। पञ्चविंशतिसङ्ख्यकतत्त्वकीर्त्तनं। संक्षेपेण कलिकालवर्णनं। पञ्चवीजकथनं। शिवस्य विद्याविद्ये तनू। सृष्टिप्रक्रिया। कर्म्मप्रशंसा। गर्भे सन्तानोत्पत्तिप्रकारः। नाड़ीकथनं। वायूनां रूपस्थानादि। षट्कोषकथनं। स्त्रीपुरुषजननकारणं। वाल्यशैशवादिदशाकीर्त्तनं। अष्टैश्वर्य्यकथनं। सर्वस्यैव जगतो महामायात्मकत्वं। दीर्घस्वरवर्णानां पार्वत्यङ्गत्वं। ह्रस्वानाञ्च शिवाङ्गत्वं। एकस्यैव ब्रह्मणो नानावर्णात्मकत्वं। वैखरीकथनादि। कवर्गादीनां देवताकथनं। वर्णानां शक्तिव्यञ्जना। वर्णन्यासकथनं। सरस्वतीमहाकाल्यादिशक्तयः। केशनारायणादिन्यासः। मातृकाकथनं। मेषादिराशीनां यथास्थानं वर्णचिन्तनं। नक्षत्रन्यासः। तिथिन्यासः। पीठपूजाप्रकारः। तत्त्वन्यासादिकथनं। भूतशुद्धिप्रकारः। षट्चक्रस्थाननिर्द्देशादि। डाकिनीहाकिन्यादिकथनं। प्राणायामः। पाशवीजलज्जावीजादिनिरूपणं। प्राणप्रतिष्ठाकथनञ्च। इति प्रथमः पटलः।

योगलक्षणादिकथनं। तत्र ध्येयस्वरूपकीर्त्तनं। यमनियमादिलक्षणं। पद्म-स्वस्तिक-भद्र-वज्र-वीरासनानां लक्षणं। योगप्रक्रिया। योगाभासस्य त्रिविधलक्षणं। इड़ापिङ्गलादीनां संस्थानादिकथनं। कुण्डलिनीकथनं। तत्र ध्यानप्रकारः। शान्तिकपौष्टिकादिषट्कर्म्मकालनिरूपणं। योगमभ्यस्यतो हृदयाभ्यन्तरे भ्रमरगुञ्जनादिवत् नादो जायते—इति कथनं। नादप्रशंसा। नाद एव परब्रह्मेति कथनं। कर्म्मयोगकथनं। गुरुशिष्ययोर्लक्षणं। हविष्यान्नकथनं। पुंनिरूपणं। पूजास्थानकथनप्रसङ्गेन तीर्थस्थानकीर्त्तनं। श्रीमद्भागवतोक्तस्थानकथनं। (अत्र भागवतनामोल्लेखोऽप्यस्ति)। भैरवध्यानादिकं। कुण्डनिर्म्माणप्रकारः। अष्टविधकुण्डकीर्त्तनं। कर्म्मविशेषे कुण्डविशेषव्यवस्था। स्थण्डिलकथनं। मण्डलपद्मादिनिर्म्माणप्रकारः। पञ्चवर्णकचूर्णकथनं। वास्तुयागविधिः। षोड़शमातृकाकथनं। मङ्गलकर्म्ममात्रे नान्दीश्राद्धविधानादि। शिष्याय मन्त्रदानप्रकारः। होमविधिः। होमद्रव्याणि। वह्निमुखादिस्थानविशेषे होमकरणे फलविशेषकथनं। कर्म्मविशेषे वह्नेर्नामविशेषकथनं। वह्नेरूपगन्धादिकीर्त्तनं। तत्र फलकथनञ्च। अकथहचक्रकथनं। राशिचक्रं। नक्षत्रचक्रं। कुलाकुलचक्रं।

ऋणिधनिचक्रं । कूर्म्मचक्रं । अकडमचक्रं । एषां प्रशंसा । अङ्गन्यासः । मन्त्रोत्पत्तिः । पुंमन्त्रादिकथनं । छिन्न-रुद्ध-शक्तिहीनप्रभृतिमन्त्रलक्षणं । एतन्मन्त्रग्रहणे दोषः । छिन्नदुष्टादिमन्त्राणां शोधनप्रकारः । दीक्षाशब्दनिरुक्तिः । क्रियावती-वर्णमयी-कलावती-वेदमयीभेदेन चतुर्विधदीक्षानिरूणं । कुत्र स्नातव्यं कथङ्कारश्चेति तन्मन्त्रादिकथनं। मन्त्रे भौमादिसप्तविधस्नानकथनं। पूजाप्रणाली। ब्राह्म्यादिषोड़शमातृकाध्यानं । गुरुकर्तृकशिष्याधिवासकर्त्तव्यता । तत्र मन्त्रादिविधानं । दीक्षाग्रहणविधिः । तत्र पूजाविधानादि । मन्त्रसंस्कारः । तत्र जनन-जीवन-ताड़नप्रभृतिलक्षणं । धूपकथनं । मधुपर्कविधानं । पञ्चगव्यनिरूपणं । पञ्चामृतकथनञ्च । षोड़शोपचारपञ्चोपचारादिपूजाकथनं । दीक्षायां विहिततिथयः । विहितनक्षत्राणि च । सामान्यकाले मनःप्रसन्नतानिबन्धनदीक्षानिरूपणं। मासविशेषे दीक्षाफलं। चन्द्रादिग्रहणे तत्फलकथनञ्च । गुरुशिष्ययोः कर्त्तव्यता । मन्त्रजपस्थानादिकथनं । इति द्वितीयः पटलः ।

मनुष्यजन्मप्रशंसादि । विद्याकथनं । गायत्रीकथनं । मन्त्रवीजकथनादि । पुरश्चरणप्रकारः । सकल-निष्कल-कलातीतभेदात् त्रिविधध्यानकथनं। छिन्नमस्तामन्त्रकथनादि । अस्या ध्यानं। अस्या अन्यविधमन्त्रकथनपूर्वकं तत्र पूजाविधानादि। प्रचण्डचण्डिकास्तोत्रं । प्राणाग्निहोत्रकथनं । कौशिकीस्तवराजः । छिन्नमस्तामन्त्रयोः ऋषिच्छन्दआदिकथनं । अस्याः कवचकथनं । पुनः सपार्षदविष्णुपूजाकथनपूर्वकमस्याः पूजान्तरप्रणालीकथनं । अस्याः क्रमस्तोत्रकीर्त्तनं । आत्मसमर्पणमन्त्रादिकथनं । प्रचण्डचण्डिकासहस्रनामस्तोत्रं । मद्यमांसादिबलिदानपूर्वकं रजस्वलाया अङ्गविशेषदर्शनपुरःसरञ्च नानाविधसाधनविधानं । पुनश्छिन्नमस्ताया मन्त्रोद्धारादिकथनं। षड़क्षरीस्तवराजः। षड़क्षरीकवचं । अद्वैतचिन्तनप्रकारः । इति तृतीयः पटलः ॥

कालिकार्चनविधिः । आसनादिकथनं । कुक्कुट-महिष-मार्ज्जार-नरमांस-मद्यादिभिर्बलिविधानं। दिवसे हविष्यान्नभोजनश्रीमद्भागवतकथाश्रवणादिना कृतवैष्णवाचारो रात्रौ सामिषान्नभोजनपूर्वकं दन्ताख्यमालिकया तन्मन्त्रजपविधानादि । तत्र भक्ष्याभक्ष्यविचारादिकं नास्तीतिकथनं । मिथ्याभाषणपरित्यागविधानं । दक्षिणाया ध्यानकथनादि । तत्साधनप्रकारः । काल्या जन्ममन्त्रादिकथनं । कुण्डगोलविधानं । कुरुकुल्यादिपूजाकथनं । कालिकाया गायत्रीपुरश्चरणकथनादि । श्मशानकालीगुह्यकालीप्रभृतिपूजाविधिः । अपरविधध्यानद्वयकथनं । बलिदानादि । कर्पूरादिस्तुतिः। दक्षिणाकवचं । अस्या अन्यविधमन्त्रकथनं । तत्र ध्यानपुरश्चरणादि । तत्र साधनभेदकथनं। पुनस्तस्याः स्तोत्रञ्च ॥ इति चतुर्थः पटलः ।

दुर्गामन्त्रकथनादि । ध्यानं । अस्याः साधनवीजपुरश्चर्य्यादिकथनं । दुर्गाकवचं । दुर्गानामनिरुक्तिः। दुर्गासहस्रनामस्तोत्रं । दुर्गानामशताष्टकं स्तोत्रं । हरिद्रागणेशस्य वीजकथनं। अस्य ध्यानादिस्तवकथनं । लक्ष्म्याद्याकामाद्यादिदुर्गावीजकथनं । इति पञ्चमः पटलः ॥

गुह्यकालिकाया वीजकथनादि । अस्या माहात्म्यप्रकाशकश्रुतिप्रदर्शनं । पराशरवशिष्ठादि तत्सेवककीर्त्तनं । षोड़शीविद्या । चतुर्दशीविद्या । महाविद्या । भद्रकाल्या वीजादिकथनं । एकविंश-

तिविद्याकीर्त्तनं। आसां ध्यानकथनादि। त्रिपञ्चारचक्रं। तत्र पूजनप्रक्रिया। कालीगायत्रीकथनं। कालीस्तुतिः। अस्या अष्टोत्तरशतनामस्तोत्रं। कालीकवचं। गुह्यकालिकाक्रमस्तवः। इति षष्ठः पटलः।

त्रिपुरसुन्दरीबीजकथनादि। वह्नेर्दशकलानामकथनं। एवं सूर्य्यस्य द्वादशकलानामकथनं। चन्द्रस्य षोड़शकलानामकीर्त्तनञ्च। त्रिपुरसुन्दर्य्या रक्षामन्त्रस्तवराजः। अस्या ध्यानादिकथनं। त्रिपुरसुन्दरीकवचं। त्रिपुरसुन्दरीशतनामस्तोत्रं। अस्या यन्त्रकथनादि। अस्याः षोड़शी शक्तिः। अस्याः सहस्रनामस्तोत्रं। अस्याः षोड़शाक्षरी विद्या। अत्र मन्त्रोद्धारः। ध्यानादिकथनञ्च। त्रिपुरसुन्दरीश्रीविद्याकवचं। त्रिपुरभैरव्या मन्त्रोद्धारादिकथनं। अस्याः शान्तिकवचं। अस्याः सहस्रनामस्तोत्रं। इति सप्तमः पटलः।

महिषमर्द्दिन्याः पूजोपयोगिद्रव्यादिकथनं। अस्या मन्त्रोद्धारादि। ध्यानादिकथनञ्च। महिषमर्द्दिनीकवचं। महिषमर्द्दिनीसहस्रनामस्तोत्रं। नन्दिसमीपे महादेवस्य वेदमातुराविर्भाववृत्तान्तवर्णनं। भवानीसहस्रनामस्तोत्रं। सरस्वतीकवचकथनञ्च। इति अष्टमः पटलः। इति।

No. 3193. पूर्णप्रज्ञदर्शनम्। Substance, country-made paper, 17 × 4 inches. Folia, 104. Lines, 6—8 on a page. Extent, 3,072 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rádhikánátha Gośvámí. Appearance, decayed. Prose and verse. Incorrect.

Púrṇaprajṇa-darśana. An exposition of the Vedánta system of Vyása with a view to establish the theory of the Daitaváda and the supreme godship of Vishṇu. By A'nanda Tírtha.

Beginning. नारायणं गुणैः सर्व्वैरुपेतं दोषवर्ज्जितं।
ज्ञेयं गम्यं गुरुञ्चापि नत्वा सूत्रार्थ उच्यते॥

द्वापरे सर्व्वत्र ज्ञाने आकुलीभूते तन्निर्णयाय ब्रह्मरुद्रेन्द्रादिभिरभ्यर्थितो भगवान् नारायणो व्यासरूपेण अवततार। इत्यादि।

End. यस्य त्रीण्युदितानि वेदवचने दिव्यानि रूपाण्यलं
भक्त्या दर्शितमित्यमेव निहितं देवस्य भर्गो महत्।
वायो रामवचोनतं (?) प्रथमकं भीमो द्वितीयं वपु-
र्मध्वो यत्तु तृतीयकं कृतमिदं भाष्यं हरौ तेन हि॥

Colophon. इति श्रीकृष्णद्वैपायनकृतब्रह्मसूत्रभाष्ये श्रीमदानन्दतीर्थभगवत्पादविरचिते चतुर्थाध्यायस्य चतुर्थपादः समाप्तः। समाप्तश्चायं ग्रन्थः॥

विषयः। व्यासकृततन्त्रब्रह्मसूत्रव्याख्यानमुखेन विष्णुतत्त्वमेव सर्व्वोत्तममिति शुद्धद्वैतवादमतसंस्थापनं ॥

No. 3194. षट्कर्म्मदीपिका । Substance, country-made yellow paper, 18 × 3 inches. Folia, 11. Lines, 9 on a page. Extent, 466 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rámadhana Vidyávágíśa. Appearance, old. Prose and verse. Generally correct.

Shaṭkarma-dípiká. A collection of rituals for the worship of some of the Hindu divinities. Anonymous.

Beginning. अथ त्र्यम्बकमन्त्रप्रयोगः। शनैश्चरदिने अन्यदिने वा अश्वत्थमूलं स्पृष्ट्वा जपेत्। इत्यादि ।

End. यक्षादीनां सर्व्वेषां निषेधमन्त्रनः। इत्यादिमन्त्रैः शिरआदिस्थानं स्पृष्ट्वाऽभिमन्त्रयेत् ।

Colophon. इति षट्कर्म्मदीपिकायां नानाप्रकारशान्तिनियमस्तृतीय उद्देशः ।

विषयः । त्र्यम्बकमहादेवपूजाप्रयोगः । सुखप्रसवमन्त्राः । निगड़भञ्जनं । तत्र पूजाप्रयोगः । वृष्टिकरणं । चण्डीपाठावृत्तिफलकथनं । पार्थिवशिवलिङ्गपूजाकथनं । तद्दर्शनफलकीर्त्तनं । लिङ्गप्रमाणं । स्फाटिकादिलिङ्गकथनं । रुद्राक्षधारणादिमन्त्रकथनं । भस्मत्रिपुण्ड्रावश्यकता । शिवस्याष्टौमूर्त्तयः । लिङ्गमुद्रास्वरूपं । मुखवाद्यफलं । लिङ्गस्तुतिकथनञ्च । शिवभक्तस्य विष्णुनिन्दा-परहिंसादिवर्ज्जनकथनं । शिवपूजाप्रयोगः । अन्यविधशान्तिविधिः । अथर्व्वोक्तशान्तिविधानञ्च । हारीतोक्तज्वरशान्तिविधानं । शूलरोगप्रतीकारकथनं । मृतसञ्जीवनी । निगड़मोक्षविधिः । शिरोरोगनिवारणविधानकथनञ्च ॥ इति ।

No. 3195. ज्योतिःश्लोकसञ्चयः, अथवा, सर्व्वकर्म्म । Substance, country-made paper, 14 × 5 inches. Folia, 65. Lines, 7 on a page. Extent, 1,483 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Rámadhana Vidyávágíśa. Appearance, old. Verse. Incorrect.

Jyotih-śloka-saṇchaya ALIAS **Sarvakarma.** Astrological maxims with regard to every work of civil life pointing the most appropriate times for the same. By Rámají Sena.

Beginning. श्रीकृष्णं सच्चिदानन्दं प्रणम्य जगदीश्वरं ।
हिताय ज्योतिषः श्लोकान् सञ्चिनोमि यथोचितं॥
सूर्य्येन्दुक्ष्मेन्दुपुत्रत्रिदशगणगुरुं भार्गवं सूर्य्यपुत्रं

राज्ञं केतुञ्च नत्वा धरणिसुरसुदे सर्व्वकर्म्माभिधानं ।
जाम्नाग्रामाधिवासी कविवरचतुरो राणिहाटप्रदेशी
श्रीमान् वैद्यः सविद्यः प्रथयति सुहृदां रामजीसेनधीरः ॥ इत्यादि ॥

End. सुविक्रमः सत्यवचाः सुधीरः प्रियंवदो धर्म्मधनेश्वरश्च ।
सौम्ये च तुङ्गेऽपि बलप्रधानो विचक्षणः कीर्त्तियुतो बलिष्ठः ॥

Colophon. अतः परं विलुप्ततया परिसमाप्तिवाक्यं नास्ति ॥

विषयः । नवपञ्चीश्रवणफलकीर्त्तनं । वारकथनं । तिथयः । नक्षत्राणि । योगाः । दग्धदिनकथनं । वारवेला । कालवेला । विष्टिः । चन्द्रशुद्धिः । वामवेधशुद्धिः । घातचन्द्रकथनं । घातचन्द्रचक्रं । ताराशुद्धिः । यात्रिकतिथिः । तिथिदेवता । नक्षत्रदेवता । उत्पाटादिकथनं । कालघण्टायोगः । उग्रगणनक्षत्रकथनं । उग्रादिगणचक्रं । वारनक्षत्रास्तं । अमृतयोगः । अमृतयोगचक्रं । अवमदिनं । अहस्पर्शनिरूपणादि । सिद्धियोगः । अमृतयोगः । पापयोगः । मृत्युयोगः । करणानां भद्राभद्रकथनं । अशुभयोगत्यागः । एकाङ्गयात्रा । सप्ताङ्गयात्रा । सर्व्वाङ्गयात्रा । खनासिद्धिर्योर्वचनेन यात्राकथनञ्च । नववाहनयात्रादिनकीर्त्तनं । यमघण्टादिकथनं । सुतचरित्रकथनं । राशिनिर्णयः । लग्ननिरूपणं । रव्यादिभुक्तिमानं । नवांशसङ्ख्यादिकथनं । दिगीशानां नामकरणः । क्षेत्राधिपतयः । शत्रुमित्रकथनं । अत्र चक्रकथनञ्च । विवाहजोटनादिकथनं । वर्णनिर्णयः । गणकथनं । राशिज्ञानं । समयशुद्धिः । सप्तशलाकवेधः । पञ्चशलाकवेधः । तयोरपवादः । चन्द्रवेधः । विवाहलग्ननिरूपणं । सर्पचक्रकथनं । सूर्य्यवेधादिकथनं । रविशुद्धिः । विद्धनक्षत्रकथनं । युतयामित्रकथनं । तयोरपवादः । मूलत्रिकोणकीर्त्तनं । गोधूलिकथनादि । नववध्वागमनं । प्रथमर्त्तुनिरूपणं । तत्र वारनक्षत्रमासफलकथनादि । नामकरणं । अन्नप्राशनं । चूडाकरणं । कर्णवेधः । विद्यारम्भः । उपनयनं । अत्र नक्षत्रचक्राणि । यात्रा । तत्र तिथिभद्राभद्रकथनं । योगिनीस्थितिकथनादि । यात्रिकनक्षत्रनिर्णयचक्रं । तत्र उत्तमतादिकथनं । नक्षत्रदण्डकथनं । यात्रिकलग्नकथनं । चन्द्रवर्णकथनं । उपश्रादिनिषेधः । राहुकालानलचक्रं । तन्वादिद्वादशस्थानकथनं । वास्तुकथनं । वर्णध्वजादिकथनं । नागविचारः । वास्तुदिनं । गर्भिण्याः पञ्चामृतं । पुत्रकन्याजननगणना । नववस्त्रधारणं । शङ्खादिधारणं । नक्षत्रविशेषजातव्याधिफलकथनं । अत्र विरिञ्चिचक्रं । पञ्चस्वरचक्रं । औषधभक्षणं । वारभेदे वैद्योपवेशनप्रकारः । आरोग्यस्नानं । हलप्रवाहः । वीजवपनं । मुष्टिग्रहणं । नवान्नं । क्रयविक्रयदिनकथनं । जन्मपताकी । जातककथनं । रव्यादिभोगः । दशाभोगः । नक्षत्रादिदशा । वेलानियमः । ग्रहाणां भावः । भोजनशयनादिफलं । जन्मनक्षत्रफलाफलं । केतुपताकी । केतुकुण्डली । गुरुकुण्डली । जयपराजयौ । वन्धननक्षत्रकथनं । वर्षपातलक्षणानि । क्षौरविधिः । ज्येष्ठीपतनफलं । ग्रहणे दर्शनादर्शनविचारः । संक्रान्तिः । सन्नाडीफलं । सर्व्वतोभद्रचक्रं । ऋणादानं । नौकादिनिर्म्माणं । नावारम्भदिनं । जातचक्रं । यात्राया दिनफलं । दिनदशाप्रश्नगणना । केरलिमतेन भविष्यद्गणना । वृहस्पतिसञ्चारगणना । नवग्रहस्तुतिः । ग्रहाणां

जन्मस्थाननिरूपणं। ग्रहाणामधिदेवताः। ग्रहाणां प्रत्यधिदेवताः। ग्रहाणां मूर्त्तिकथनं। दशाङ्गधूपकथनं। षोड़शाङ्गधूपकथनञ्च। पञ्चोपचारादिकथनं। केन्द्रग्रहकथनं। तुङ्गीग्रहफलकथनादि॥।

No. 3196. स्मृतिदर्पणः। Substance, country-made yellow paper. $18\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 117. Lines, 6—7 on a page. Extent, 3,612 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Bhuvaneśvara Tarkálaṅkára. Appearance, fresh. Prose and verse. Generally correct.

Smṛitidarpaṇa. A digest of the rules of the Smṛiti for civil rites.

Beginning. प्रणम्य जगदानन्दं सानन्दं नन्दनन्दनं।
बालानां सुखबोधाय तन्यते स्मृतिदर्पणः॥ इत्यादि।

End. इहदामान्नमेतद्धि शङ्करेण च भाषितं।
एतन्निवेदयेत् सर्व्वं गुरवे भक्तिमान् नरः॥
युगाद्यावयने पुण्ये मन्वादौ च विशेषतः॥

Colophon. इति स्मृतिदर्पणः समाप्तः।

विषयः। उद्वाहनिरूपणं। सापिण्ड्यकथनं। पितृबान्धवादिकथनं। कौदृशी कन्या उद्वाह्या तन्निरूपणादि। गोविन्दविवाहपद्धतिः। अनध्यायनिरूपणं। उपनयनादिव्यवस्था। अकालवृष्टिव्यवस्था। संकल्पविचारादि। मलमासलक्षणादि। चान्द्रसौरादिभेदात् पञ्चविधमासकथनं। मासादीनां कुत्र कथमुल्लेख इति कथनं। विधिविचारः। तत्र विधिनियमपरिसंख्यानां लक्षणादि। त्रिविधार्थवादनिरूपणं। निषेधनिरूपणं। पर्य्युदासकथनं। विकल्पकथनं। इच्छाविकल्प अष्टविधदोषकीर्त्तनं। युग्मादितिथिव्यवस्था। जन्मतिथिकथनं। प्रतिपत्। द्वितीया। तृतीया। चतुर्थी। पञ्चमी। सनसादेवीपूजा। षष्ठी। सप्तमी। आरोग्यसप्तमी। विधानसप्तमी। अष्टमी। जन्माष्टमी। दूर्व्वाष्टमी। भीष्माष्टमी। अशोकाष्टमी। नवमी। श्रीरामनवमी। दशमी। दशहरा। दुर्गोत्सवः। कल्पारम्भव्यवस्था। चण्डीपाठप्रणाली। बोधनव्यवस्था। सप्तम्यादिपूजाव्यवस्था। बलिदानं। धूपलक्षणं। उपचाराः। एकादशी। चातुर्मास्यव्रतारम्भः। आरब्धव्रतत्यागे प्रायश्चित्तकथनं। मत्स्यादित्यागफलं। हरिशयनव्यवस्था। द्वादशी। श्रवणद्वादशी। त्रयोदशी। वारुणत्रयोदशी। चतुर्द्दशी। अनन्तव्रतं। उल्कादानविधिः। रटन्ती। शिवरात्रिः। मदनचतुर्द्दशी। पौर्णमासी। महाज्यैष्ठी। कोजागरः। दोलयात्रा। स्नानयात्रा। संक्रान्तिव्यवस्था। कार्त्तिककृत्यं। ग्रहणं। अमावस्या। अर्द्धोदययोगः। युगाद्याव्यवस्था। प्रायश्चित्तव्यवस्था। प्रायश्चित्तलक्षणं। अतिपातकानि। अनुपातकानि। उपपातकानि। महापातकानि। एषां प्रायश्चित्तानि। संसर्गप्रायश्चित्तकथनं। धेनुमूल्यव्यवस्था। प्रायश्चित्तपूर्व्वाहकृत्यं। बाल्यादिभेदेन प्रायश्चित्तव्यवस्था। ज्ञानकृतादिव्यवस्था। एकहायनादिगोबधप्रायश्चित्तव्यवस्था। रोधादिनिमित्तक-

गोवधप्रायश्चित्तव्यवस्था। अस्थिभङ्गादिप्रायश्चित्तव्यवस्था। अपालननिमित्तगोवधप्रायश्चित्तव्यवस्था। गोवधापवादः। क्षत्रियादिवधप्रायश्चित्तव्यवस्था। स्त्रीवधप्रायश्चित्तं। गर्भवधप्रायश्चित्तं। मार्ज्जारवध-प्रायश्चित्तं। मत्स्यादिवधप्रायश्चित्तं। देवगृहादिभेदनप्रायश्चित्तं। अभिचारप्रायश्चित्तं। अभक्ष्याणि। तद्भक्षणे प्रायश्चित्तं। शूद्राद्यन्नभक्षणप्रायश्चित्तं। भूमिदानं। सुवर्णदानं। शुद्ध्यशुद्धिकथनं। सह-मरणानुमरणयोर्व्यवस्थानिरूपणं। अनयोरशौचसङ्करः। अतिक्रान्ताशौचकथनं। अशौचे विधि-निषेधौ। अशौचसङ्करः। गर्भस्रावाशौचं। स्त्र्यशौचं। बालाद्यशौचं। विदेशस्थाशौचं। सपिण्डाद्य-शौचं। अशौचमध्ये वर्ज्यावर्ज्यानि। मातामहाद्यशौचं। मृत्युविशेषाशौचं। अशौचापवादः। शवानु-गमनाशौचं। अस्थिसञ्चयनाङ्गस्पर्शयोः कालः। द्रव्यशुद्धिः। वापीकूपतडागेषु मृते तज्जलशुद्धि-कथनं। गृहे मरणे तच्छुद्धिकथनं। सूतिकादिदाहव्यवस्था। मुमूर्षुकृत्यं। प्रेततर्पणव्यवस्था। पुत्रस्य वर्षमध्यकृत्यं। पिण्डदानं। अशौचान्तिमदिनकृत्यं। अशौचान्तद्वितीयदिनकृत्यं। वृषोत्सर्गः। चन्दनधेनुः। अनयोः पद्धतिः। दाननिरूपणं। दानाभासाः। दानपरिपाटी। षोड़शदानं। प्रेतक्रियाधिकारिणः। अनधिकारिणः। दत्तकपरिपाटी। सपिण्डीकरणादिश्राद्धं। उभयतोमुखी-दानं। विपुलगृहदानं। वृहदामान्नदानकथनञ्च। इति।

No. 3197. ज्योतिःप्रदीपः। Substance, country paper. $14\frac{1}{2} \times 3\frac{1}{2}$ inches. Folia, 44. Lines, 8 on a page. Extent, 1,144 ślokas. Character, Bengali. Date, ? Place of deposit, S'ántipura, Háradhana Bhattácharya. Appearance, decayed. Prose and verse. Incorrect.

Jyotih-pradípa. Astrology and horoscopy.

Beginning. जगद्ध्वान्तघ+घघ्नं जगतामेकलोचनं।
वन्दे बन्धूकसङ्काशमहःपतिमहर्निशं॥
जगत्प्रकाशको ज्योतिर्ग्रन्थः सूर्य्योपमो महान्।
ततः संक्षेपतो ज्योतिःप्रदीपः क्रियते परः॥ इत्यादि।

End. दुर्भिक्षं राजपीड़ा मरणभयकरा शस्यहानिश्च भूमिः।

Colophon. इति ज्योतिःप्रदीपः समाप्तः।

विषयः। तिथिनक्षत्रोद्देशः। नक्षत्रदेवताकथनं। योगकथनं। निषिद्धयोगाः। करणकथनं। करणाधिपकथनं। तिथीनां नन्दादिसंज्ञाकथनं। चन्द्रशुद्धिः। नक्षत्रशुद्धिः। नक्षत्रदोषप्रतीकारः। रविशुद्धिः। सर्व्वग्रहशुद्धिः। यमघण्टकथनं। दग्धदिनकथनं। तिथिपापयोगकथनं। मासदग्ध-कथनं। विष्टिकथनं। नक्षत्रपापयोगकथनं। मृत्युयोगकथनं। निषिद्धकथनं। दिवारात्रिकाल-वेलाकथनं। वारवेलाकथनं। तिथ्यमृतकथनं। अमृतयोगफलं। तिथिसिद्धियोगकथनादि। राश्युत्पत्तिकथनं। राशिस्वरूपकथनं। चेत्रकथनं। मेषादीनां संज्ञाकथनं। नवांशवर्गोत्तमव्यवस्था।

द्रेक्काणकथनं। केन्द्रस्थानकथनं। लग्नभोगमानकथनं। दिवामानकथनं। ग्रहाणां दृष्टिकथनादि। ग्रहाणामुच्चनीचकथनं। ग्रहाणां मित्रामित्रकथनं। इति १ म प्रकाशः।

यात्रादौ निषिद्धमासकथनादि। तत्र वारफलं। तिथिफलं। विहिताविहितनक्षत्रकथनं। लग्नफलं। तिथियोगिनीकथनादि। राहुस्थानकथनादि। उषायोगः। इति २ य प्रकाशः।

जातके गण्डकथनं। रात्रिदिवासङ्केतकथनादि। तनुस्थानादिकथनं। लग्नादिफलकथनं। सूर्य्यसोमादिविष्टिकथनं। मातृहा योगः। जारजयोगः। शुभवीक्षणकथनं। मङ्गमस्थभौमादिफलं। केन्द्रगुरुप्रशंसा। कर्म्मस्थानग्रहायुःकथनं। कोष्ठीफलकथनादि। कनकदण्डयोगः। अनफादि-योगकथनं। उच्चनीचग्रहफलकथनादि। ३ य प्रकाशः।

अन्नप्राशनं। नरान्नं। ४ र्थ प्रकाशः। चूड़ाकरणं। विद्यारम्भः। उपनयनं। विवाहप्रकरणं। ५ म प्रकाशः।

वीजवपनं। नागक्रोड़ादिकथनं। गृहकरणे मासादिकथनं। गृहप्रवेशादिकथनं। ६ ष्ठ प्रकाशः।

निषिद्धचन्द्रनक्षत्रयोराहुदर्शने दोषकथनादि। भूकम्पादिकथनं। आग्नेयादिमण्डलविचार-कथनं। ७ म प्रकाशः। इति।

No. 3198. यतिस्वधर्म्मभिक्षाविधिः। Substance, country-made paper, $9\frac{1}{2} \times 4$ inches. Folia, 16. Lines, 9 on a page. Extent, 288 ślokas. Character, Nágara. Date, Sk. 1750. Place of deposit, Calcutta, Government of India. Appearance, fresh. Verse. Generally correct.

Yatidharma-bhikshávidhi. Rules for mendicancy on the part of Yatis. By S'ankara A'chárya.

Beginning. श्राद्धान्नं यस्य कुक्षौ तु मुहूर्त्तमपि वर्त्तते।
भिक्षोश्चत्वारि नश्यन्ति आयुः प्रज्ञा यशो बलं॥
अयने विषुवे चैव ग्रहणे चन्द्रसूर्य्ययोः।
रात्रौ भक्ष्यन्तु नाश्नीयाद्भुक्त्वा चान्द्रायणं चरेत्॥
उपरागे तु सम्प्राप्ते तीर्थयात्रादिसङ्कटे।
दिवा यदि न भुक्तं स्याद्रात्रौ भुक्त्वा न दोषभाक्॥
नापो मूत्रपुरीषाभ्यां नाग्निर्दहनकर्म्मणा।
न वायुः स्पर्शदोषेण नान्नदोषेण मस्करी॥ इत्यादि।

End. अयने मकरे कर्के विषुवे तुलमेषयोः।
उपवासं प्रकुर्व्वीत मुनिर्मोक्षपरायणः॥

(अवत्यारत्नयावधि (?)) ॥

Colophon. इति श्रीमच्छङ्कराचार्य्यविरचितो यतिस्वधर्म्मभिक्षाविधिः समाप्तः ।

शाके १७५० ।

विषयः । सन्न्यासिनामाचारादिविधिनिरूपणं । तत्र तेषां भोज्याभोज्यतद्भोजनादिकाल-निरूपणं । वस्त्रादिशुद्धिनिरूपणं । भिक्षाविधिकथनं । गुरुशुश्रूषणादिविधिकथनं । अवस्थिति-योग्यदेशादिनिरूपणं । यत्यभिवादनविधिकथनं । पितॄनुद्दिश्य श्राद्धादिकरणे सन्न्यासिनां दोष-कथनं । शूद्रसम्भाषणादिनिषेधनिरूपणं । वैराग्यावश्यकताकथनं । अथ कुटिचक-बहूदक-हंस-परमहंसभेदेन सन्न्यासिनां चातुर्व्विध्यनिर्णयः । माधुकर्य्यादिभेदेन पञ्चविधभिक्षाकथनं । पीड़ादौ औषधसेवनविधिकथनं । मृतकसूतकनिरूपणं । उपवासविधिकथनञ्च । इति ।

No. 3199. यतिधर्म्मसङ्ग्रहः । Substance, country-made paper, $10\frac{1}{2}$ × $5\frac{1}{2}$ inches. Folia, 51. Lines, 11 on a page. Extent, 1,542 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Incorrect.

Yatidharma-sañgraha. A code of rules regarding the duties of Yatis, civil and religious. Anonymous.

Beginning. श्रीगणेशाय नमः। श्रीसरस्वत्यै नमः। श्रीगुरुभ्यो नमः। परमगुरुभ्यो नमः। परमेष्ठिगुरुभ्यो नमः। परात्परगुरुभ्यो नमः॥ अथ यतिधर्म्मसङ्ग्रहो लिख्यते। तत्रादावाचार्य्य-परम्परा। यद्बोधमसमुद्भूतं यद्बोधात् प्रविलीयते। नामरूपात्मकं विश्वं तस्मै पूर्णात्मने नमः। तत्पूर्णसच्चिदानन्दाद्वयसमस्तब्रह्मादिकाचार्य्यप्रसादादित्यादि ।

End. यदस्ति यद्भाति तदात्मरूपं नान्यत् ततो भाति न चान्यदस्ति।
स्वभावसंवित् प्रतिभाति केवला ग्राह्यं ग्रहीतेति मृषैव कल्पना ॥

Colophon. इति काशीस्थितिमोक्षः । ध्यानादिकथनञ्च । इति सामान्ययतिधर्म्म-सङ्ग्रहेणालम् ॥

विषयः । आचार्य्यपरम्पराकथनं । आचार्य्यलक्षणादिकथनं । शङ्कराचार्य्यजन्मादिकथनं । तत्कृतसाधनकथनञ्च । मठाम्नायसम्प्रदायनामव्याख्यानादिकथनं । पञ्चद्रविड़पञ्चगौड़भेदकथनं । दण्डस्वरूपलक्षणनाममुद्रादिकथनं । दण्डस्पर्शतद्वन्दनादिविधिकथनं । यतिपात्रनिरूपणं । तत्र कमण्डलुसंस्कारादिविधिकथनं । काषायवस्त्रकौपीनादिनिरूपणं । निषिद्धवस्त्रकथनं । तीर्थस्वामिनां प्रातःकृत्यादिमृत्तिकास्नानादिनिरूपणं । निषिद्धोदकादिनिरूपणं । सचेलस्नाननिमित्तानि । आ-चमनविधिकथनं । प्रत्याम्नायतावशेषकथनं । तिलकादिविधिकथनं । आसनादिविधिकथनं । प्राणायामप्रकारकीर्त्तनं । न्यासध्यानादिविधिकथनं । मालाभेदनिरूपणं । रुद्राक्षधारणादिफलकथनं ।

प्रणवगायत्र्यादिजपविधिकथनं। सन्ध्याप्रशंसाकीर्त्तनं। वन्दनादिविधिकथनं। प्रार्थनास्तोकादि-कथनं। सन्न्यासिप्रशंसाकीर्त्तनं। गुरोर्मातापित्रोश्च मरणादौ सन्न्यासिनां कर्त्तव्यताकथनं। स्वद्रुम-जलादिग्रहणे प्रतिबन्धकादिनिरूपणं। वास्तुविषये अशौचादिनिरूपणं। भिक्षाविषये माधुकर्य्यादि-विधानकथनं। मण्डलपर्य्यवेक्षणादिविधिकथनं। उच्छिष्टस्पर्शादिनिमित्तशौचादिनिरूपणं। प्राय-श्चित्तप्रकारकथनं। कृच्छ्रादिलक्षणं। मायन्तनविधिकथनं। पर्य्यटनादिविधिकथनं। चातुर्मास्यादि-विधिकथनं। क्षौरकालादिनिरूपणं। तत्र स्नानादिविधिकथनं। मठे वृद्धपूजागुरुपूजादिविधि-कथनं। विश्वरूपयात्राविधिकथनं। तत्र गीतापाठादिविधिकथनं। काशीवासादिमाहात्म्य-कथनञ्च। इति शम्।

No. 3200. दर्शपौर्णमासाख्ययागप्रयोगः। Substance, country-made paper, 8 × 3½ inches. Folia, 16. Lines, 8 on a page. Extent, 232 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, fresh. Prose and verse. Correct.

Darśapaurṇamásákhyayágaprayoga. A manual for the performance of the Darśa and the Paurṇamása rites, giving all the mantras. The codex is defective at the end, and the author's name has not been found. Frequently the names of the authors of Prayogas are not given in MSS.

Beginning. श्रीगणेशाय नमः। याजमानं व्याख्यास्यामो यजमानस्य ब्रह्मचर्य्यं दक्षिणा-दानं द्रव्यप्रकल्पनं कामानां कामनं। प्रत्यगो (प्रत्यगा) शिषो मन्त्रान् जपति अकरणानुपतिष्ठते-ऽनुमन्त्रयते। अथ दर्शपूर्णमासयोः (दर्शपौर्णमास्योः) शुचिः शुक्लवासा दर्भेष्वासीनो दर्भान् धारयमाणः पवित्रपाणिः पत्न्या सह प्राणानायम्य अद्येत्यादिकालादिसंकीर्त्तनानन्तरं पौर्णमासेन यक्ष्ये दर्शेन यक्ष्ये। इति संकल्प्य केशश्मश्रून् वापयेत्।

End. शेषखण्डितत्वात् परिसमाप्तिसूचकवाक्यं नास्ति।

विषयः। दर्शपौर्णमासाख्ययागस्यानुष्ठानकथनं।

No. 3201. त्रिशङ्कुवेदानुवचनं। Substance, country-made paper, 8½ × 4 inches. Folia, 2. Lines, 8 on a page. Extent, 22 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Correct.

Trisaṅku-vedánuvachana. Apparently a collection of the Sánti mantras, but the MS. is too defective to show what it really is.

Beginning. श्रीगणेशाय नमः। ॐ नमः परब्रह्मणे। शन्नो मित्रः शं वरुणः शन्नो भवत्व-र्य्यमा शं न इन्द्रो बृहस्पतिः शन्नो विष्णुरुरुक्रमः। नमो ब्रह्मणे नमस्ते वायो त्वमेव प्रत्यक्षं ब्रह्मासि

त्व (त्वा) मेव प्रत्यक्षं ब्रह्म वदिष्यामि ऋतुञ्च वदिष्यामि सत्यञ्च वदिष्यामि तन्मामवतु तद्वक्तार-मवतु अवतु मां अवतु वक्तारं।

End. शेषखण्डितत्वात् समाप्तिसूचकवाक्यं नास्ति।

विषयः। त्रिशङ्कुवेदानुवचनादिकथनं।

No. 3202. विधुरौपासनप्रयोगः। Substance, country-made paper, 12½ × 4 inches. Folia, 2. Lines, 11 on a page. Extent, 38 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Vidhuropásana-prayoga. A guide to the performance of the rite called Vidhuropásana. Anonymous.

Beginning. श्रीगणेशाय नमः। अथ विधुरौपासनप्रयोगो वक्ष्यते। आदावभ्यङ्गस्नानं ततः पुण्याहवाचनं। ततः प्राणानायम्य एवंगुणपुण्यतिथौ मम भार्य्यानाशनिमित्तार्थं नष्टौपासन-विच्छिन्न (?) दोषपरिहारार्थं विधुरौपासनहोमं करिष्ये।

End. शेषखण्डितत्वात् समाप्तिसूचकवाक्यं नास्ति।

विषयः। शान्त्यर्थं विधुराणामपत्नीकानाञ्च औपासननामकहोमविधिप्रयोगकथनं।

No. 3203. विधुराधानप्रयोगः। Substance, country-made paper, 9½ × 4 inches. Folia, 6. Lines, 8 on a page. Extent, 111 ślokas. Character, Nágara. Date, Sk. 1755, Sm. 1890. Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Correct.

Vidhurádhána-prayoga. A guide to the performance of the A'dhána rite by a widower. Anonymous.

Beginning. श्रीगणेशाय नमः। अथ मृतपत्नीकस्य विवाहेऽप्यसमर्थस्य तदग्न्याधान-प्रयोगोऽभिधीयते। दारकर्म्म सम्भवे आधानमग्निद्वारा पत्नीयजमानोभयार्थं तदसम्भवे आत्मार्थं तदा आत्मार्थमेव। तथापस्तम्बः। पत्नीयज्ञाङ्गमरणे विधुरत्वं प्रपेदिरे। विवाहेऽप्यसमर्थस्य आश्र-मस्य निवृत्तये।

End रामोऽपि कृत्वा सौवर्णीं सीतां पत्नीं यशस्विनीं।
ईजे बहुविधैर्यज्ञैः सह भ्रातृभिरच्यते।

Colophon. इति विधुराधानप्रयोगः समाप्तः।

विषयः। मृतपत्नीकस्य विवाहेऽसमर्थस्य अग्न्याधानानुष्ठानकथनं।

No. 3204. विहृतषोड़शी। Substance, country-made paper, $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 2. Lines, 12 on a page. Extent, 118 ślokas. Character, Mahíráshṭríya. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Generally correct.

Vihṛita-shoḍaśí. Sixteen hymns in regard to the Shoḍaśí rite.

Beginning. श्रीगणेशाय नमः। अथ विहृतषोड़शी। ऌभूर्भुवःस्वरों अध्वर्य्यो शो शों सावोमिन्द्र जुषस्व प्रवहाय हि शूरहरी इह। पिवासुतस्य मतिर्न मध्वस्य कामनश्चोरुम्मदायोन् विः।

End. ॐ थामो दैवमादे। मदामो दैवो मयेति प्रतिगरः। अवसाने प्रणव चंक्रमेण प्रप्रव इत्यादि प्राकृतप्रतिमरः।

Colophon. इति विहृतषोड़शी समाप्ता।

विषयः। अतिरात्रविहारे षोड़शीग्रहणविधिः।

No. 3205. योगार्णवः। Substance, country-made paper, $10\frac{1}{2} \times 4\frac{3}{4}$ inches. Folia, 12. Lines, 10 on a page. Extent, 337 ślokas. Character, Nágara. Date, Sm. 1815. Place of deposit, Calcutta, Government of India. Appearance, new. Prose. Correct.

Yogárṇava. Calculations of conjunctions with reference to the places of the planets in a horoscope, and their effect on the destiny of the person concerned. By Veṅkaṭeśa.

Beginning. नत्वा तं मनसा म × न्तवदनं श्रीवेङ्कटेशः सतां श्रीमानण्ययभूसुरात्मजवरो होराविदां प्रीतये। ज्योतिःशास्त्रमहार्णवे प्रतरणे संग्टह्य शास्त्रान्तराद्वच्ये जातकशास्त्रमार्गफलदं योगार्णवाख्यं प्लवं ॥१॥

End. आचार्य्यवर्य्योऽतिगमाङ्गशास्त्रे विनिश्चितार्थः सुमतिः सुशीलः। श्रीवेङ्कटेशो भुवि मानवानां चकार योगार्णवमत्र भूमौ।

विषयः। राशिचक्रे ग्रहाणां स्थितिविशेषेण योगकथनं।

No 3206. योगसारः सटीकः। Substance, country-made paper, 10 $\times 4\frac{1}{2}$ inches. Folia, 10. Lines, 5—11 on a page. Extent, 794 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Correct.

Yogasára. The essentials of the Yoga meditation according to the Jains. By Yogachandra Muni. The text is elucidated by a gloss, *Ṭabbá*.

Beginning. मूलस्य—

। ८५। श्रीजिनाय नमः। णिम्मल झाणपरिथिया कम्मकलङ्क दहेवि अप्पालद्ध उ जेणपरु ते परमप्पणवेवि ।१।

टीकायाः—

। ८५। श्रीगुरुभ्यो नमः। निर्म्मलध्याननैविधि स्थिरथई नइ। कर्म्मरूपजे कलङ्क मैलतेदहने आत्मानुं स्वरूपप्रत्यच अनुभते परमात्मापरमे ध्यानरूपअग्निवडीने बालीनुं स्वरने नमस्कारने जेणइ परमात्मालाधो कहतां करीने आत्मा ॥

End. मूलस्य—

संसारह भयभीय एह जोगचन्दमुणि पण अप्पासंवोहणकया दोहादइक्कमणेणिं ।१०८।

इति श्रीयोगसारः सम्पूर्णः। हिंसादिकपरिहरु कि करिजो अप्पाइववेइ सोविययउ चारित्र-मुणिजो पश्चमगइणिइ ।१०।

टीकायाः—

णिज्यो संसारचतुर्गतिउ हतौ एहवौ जे जोगचन्दमुनइं संबोधइं प्रतिबोधि थाका एकमनेङ्गइ-कीधा दोहानामच्छन्द सहितकीधा।

Colophon. इति श्रीयोगसारे टवार्थः सम्पूर्णः। हिंसादिकथा अवनइं परिजे जीव आत्मानइं विषइं ते वीजउ चारित्रवेदोपस्थापनोजे चारित्रपञ्चमगतिमुक्तिनइं हरीनइं स्थिर-थाइय चारित्रजां णिवौ पमादइ ।१०१।

विषयः। जैनानां योगकथनं।

No. 3207. उपलेखा। Substance, country-made paper, 10 × 4 inches. Folia, 6. Lines, 10 on a page. Extent, 127 ślokas. Character, Nágara. Date, Sm. 1863. Place of deposit, Calcutta, Government of India. Appearance, new. Verse. Generally correct.

Upalekhá. Sanskrit orthography, treating especially of the accents. By Sauinaka.

Beginning. श्रीगणेशाय नमः। अकारादयो द्वादश स्वराः शिष्टं व्यञ्जनं ककारादयः पञ्च पञ्च वर्गाः स्पर्शा यकारादयस्ततस्त्वोऽन्तस्थाः शकारादयोऽष्टा (?) उष्माणः कण्ठौ विसर्गानुस्वारौ

प्रथमद्वितीयौ वर्गाणामुष्माणश्च हकारवर्ज्यमघोषवच्छिष्टं घोषवत् ह्रस्वमेकमात्रं दीर्घं द्विमात्रं प्लुतं त्रिमात्रं व्यञ्जनमर्द्धमात्रं स्वरभक्तिश्चाक्रमे क्रमे त्वर्द्धौ नाक्रमद्वि पदग्रस्तयोरुत्तरेणोत्तरं पदं संदध्या-दर्द्धर्चान्ता दूं इतीमित्याकारे षत्वसंहितेष्विति पदे नः परेनावस्येत् ।

End. कृतञ्च सत्यं चैत्यपदक्रममिममुमयाभिगीतं द्विजवरगुणा गुरुणादरेण प्रपठितं परितोऽपि पुण्यकर्म्मा भवति शास्त्रमुपलेखं शास्त्रमुपलेखं । नमः शौनकाय नमः शौनकाय इति वा पाठः ।

Colophon. इत्युपलेखाख्यं पदशिष्टं समाप्तं । व्यञ्जनशिरसि सन्निविष्टो रेफऋत्ववर्णतां याति स तु सर्व्वत्र न कर्त्तव्यः कर्त्तव्यः शषसहेषु वा । आदित्यैर्यातमित्यस्मिन्नष्टा + + त्वर परे। पदाध्यायेऽनुदात्तत्वात् संहितायामुदात्तवत् ।

विषयः । अकारादिहकारान्तवर्णानां स्वरव्यञ्जनादिभेदकथनं । परिग्टह्यावग्टह्यादिलक्षण-निर्द्देशः । उदात्तानुदात्तादिभेदे कम्पादिकथनञ्च ।

No. 3208. निर्व्वाणस्थितिः । Substance, country-made paper, $9\frac{1}{2} \times 4\frac{1}{2}$ inches. Folia, 18. Lines, 10 on a page. Extent, 304 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India, Appearance, old. Verse. Generally correct.

Nirvánasthiti. A dissertation on final emancipation and the means thereof. An extract from the Rámáyaṇa of Válmíkí.

Beginning. श्रीगणेशाय नमः ।

दिक्कालाद्यनवच्छिन्नानन्तचिन्मात्रमूर्त्तये ।
स्वानुभूत्येकमानाय नमः शान्ताय तेजसे ॥१॥
अहं बद्धो विमुक्तः स्यामिति यस्यास्ति निश्चयः ।
नात्यन्तमज्ञो नो तज्ज्ञः सोऽस्मिन् शास्त्रेऽधिकारवान् ॥२॥
यावन्नानुग्रहः साक्षाज्जायते परमेश्वरात् ।
तावत् सद्गुरुतः कश्चित् सच्छास्त्रमपि नो लभेत् ॥३॥
महानुभावसम्पर्कात् संसारार्णवलङ्घने ।
युक्तिः संप्राप्यते राम दृढ़ा नौरिव नाविकात् ॥४॥
यस्मिन् देशे तु राम ज्ञो नास्ति सज्जनपादपः ।
सफलः शीतलच्छायो न तत्र निवसेद्बुधः ॥५॥

End. एतावदेव लिङ्गमलिङ्गमूर्त्तेः संशान्तसंस्तृतिचिरभ्रमनिर्दृतस्य । तज्ज्ञस्य यन्म दनकोपविषादमोहलोभापदामनुदिनं निपुणं तनुत्वं । २ २ ।

Colophon. इति श्रीवाल्मीकीये रामायणे निर्व्वाणस्थितिः सम्पूर्णा ।

विषयः । निर्व्वाणमुक्त्युपायकथनं ।

No. 3209. ग्रहयज्ञादिविधिः । Substance, country-made paper, $8\frac{1}{2} \times 5$ inches. Folia, 39. Lines, 17 on a page. Extent, 1,960 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose and verse. Generally correct.

Grahayajnádi-vidhi. Rituals for a number of domestic rites.

Beginning. आद्यखण्डितत्वात् प्रारम्भवाक्यं नास्ति ।

End. अन्तखण्डितत्वात् समाप्तिसूचकवाक्यं नास्ति ।

विषयः । ग्रहयज्ञविधिः । ग्रहाणां होमसङ्ख्याभेदे विभिन्नकुण्डलक्षणकथनं । ऋत्विक्सङ्ख्या-कथनञ्च । दिग्विशेषे कुण्डानां कर्त्तव्यतानिरूपणं । देवरूपादिप्रतिष्ठायां समयनिर्णयः । गणपति-प्रतिष्ठा ; सूर्य्यप्रतिष्ठा । शक्तिप्रतिष्ठा । भैरवप्रतिष्ठा । हनूमत्प्रतिष्ठा । नन्दिप्रतिष्ठा । दक्षिणा-मूर्त्तिचण्डप्रतिष्ठा । वैष्णवमूर्त्तिप्रतिष्ठा । गरुड़प्रतिष्ठा । राधाकृष्णमूर्त्तिप्रतिष्ठा । सर्व्वदृक्षदानविधिः । वापीकूपतड़ागोत्सर्गप्रयोगो विधिश्च । वृन्दावनोद्यापनं । घट्टगोपुरसेतूद्यापनविधिः । तेषां प्रयोगश्च । पुत्रदानप्रतिग्रहप्रयोगौ । वास्तुशान्तिप्रयोगः । प्रासादकरणविधिः । शिलान्यासप्रयोगः ।

No. 3210. ज्योतिषं । Substance, country-made paper, $5\frac{1}{2} \times 3\frac{1}{4}$ inches. Folia, 64. Lines, 7 on a page. Extent, 336 ślokas. Character, Nágara. Date, ? Place of deposit, Calcutta, Government of India. Appearance, old. Prose. Incorrect.

Jyotisha. The elements of civil astrology. The MS. is defective and the author's name has not been found. The name of the work as given, is obviously not correct.

Beginning. श्रीगणेशाय नमः । अथ होरा उपरि श्लोके । वारप्रवर्त्तिघटिका द्विघ्ना कालाप्यहोरापतयः शराप्ता । धिनाधिपाद्या रविशुक्रसौम्याः शशाङ्कशौरीज्यकुजाः क्रमेण । काकत्रयं विप्रचतुष्टयञ्च बभ्रुद्वयं चाष्टपाम्बराणि । मिलन्ति मार्गे रजकीकुमारि सूर्य्यस्य होराचलितस्य पुंसां ।

End. शेषखण्डितत्वात् समाप्तिसूचकवाक्यं नास्ति ।

विषयः । होरादिकथनं विंशोत्तरीदशादिनिरूपणं । रव्यादिषु सप्तसु वारेषु कार्य्यविशेषा-

